Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीउपदेशचिंतामणिः सटीकः ॥ भाग १ ॥

(कर्ता—श्रीजयशेखरसूरिः)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

वीरसंवत्—२४४५. विक्रमसंवत्—१९७५. सने—१९१९.

किं रु. ४–०–०

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. जामनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीउपदेशचिंतामणिः सटीकः ॥ भाग १ ॥

(कर्ता—श्रीजयशेखरसूरिः)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

वीरसंवत्—२४४५. विक्रमसंवत्—१९७५. सने—१९१९.

किं रु. ४–०–०

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. जामनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजगुरुभ्यो नमः ॥

॥ अथ श्रीउपदेशचिंतामणिः सटीकः प्रारभ्यते ॥

(कर्ता—श्रीजयशेखरसूरिः)

(द्वितीयोऽधिकारः)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

अस्याधिकारस्य पूर्वेण सह संबंधं प्रकरणकारः स्वयमेवाह—

॥ मूलम् ॥—जिणधम्मं जीवा न हु । लहंति सामग्गीबाहिरा सव्वे ॥ माणुस्सखित्त-कुलगुरु—सद्धाविरियाइया सा य ॥ १ ॥ व्याख्या—हुरेवकारार्थः, सर्वे जीवा भव्या अभव्याश्च सामग्रीबाह्याः संतो नैव जिनधर्मं पूर्वाधिकारोपवर्णितस्वरूपं लभंते, सामग्रीसद्भावे तु लभंते, तस्मादत्राधिकारे सामग्रीवक्तव्येति भावः. नन्वभव्याः सामग्रीसद्भावेऽपि जिनधर्मं न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लजंते इति प्रतीतं प्रावचनिकानां, ततः किमेवमुच्यते नैवं, श्रद्धारहितत्वेनाजव्यानां सदापि सामग्रीबाह्यत्वात्. अथ सामग्रीमेव नामग्राहमाह—' माणुस्सेत्यादि ' सा च सामग्री मानुष्यक्षेत्रकुलगुरुश्रद्धावीर्यादिका जवति. तत्र मानुष्यं मनुष्यजवः, क्षेत्रमार्यजूमिः, कुलमार्हतं, गुरुर्धर्मोपदेष्टा, श्रद्धा धर्मस्य परिणतिः, वीर्यं धर्मकृत्येष्वनालस्यं, आदिशब्दाद्रूपारोग्यायुःपरिग्रहः, इयं च सर्वापि समुदिता सम्यग्बोधिनिबंधनं. अत एव निधिरिव दुर्गतानां, पोत इव जलधिपतितानां, सुधारस इव तृष्णातरलितानां, ससार्थ इव मार्गच्युतानां, दीप इव तमोविप्लुतानां दुर्लजा सेयं कर्मवशानां प्राणिनां. ॥ १ ॥ तत्र प्रथमं मानुष्यं दुर्लजमाह—

॥ मूलम् ॥—दुलहं खलु माणुस्सं । सव्वुत्तमलाजमूलनीविसमं ॥ लंजे जस्स विसिठा । दस दिठंता लए दिठा ॥ २ ॥ व्याख्या-खलु निश्चितं प्रथमं प्राणिनां मानुष्यं मनुष्यत्वं दुर्लजं दुःप्रापं, कथंजूतं? सर्वेषामुत्तमलाजानामिह जवे सम्यग्ज्ञानादीनां प्रेत्य स्वर्गापवर्गादीनां च मूलनीविसमं मूलद्रव्यकल्पं, यथाहि—मूलनीव्या चौरादिजिरनुपहृतया कश्चिज्ञा-

For Private and Personal Use Only

ग्यवान् विशिष्टलाजं लजते, तथा मानुष्येन प्रमादादिजिरनुपहतेन जव्या अपि यथोक्त-लाजमिति. उक्तं च—जहा उ तिन्नि वणिया । मूलं घेत्तूण निग्गया ॥ एगोत्थ लप्जए लाजं । एगो मूलेण आगउं ॥ १ ॥ एगो मूलंपि हारित्ता । आगउं तत्थ वाणिउं ॥ ववहारे उवमा एसा । एवं धम्मे वियाणह ॥ २ ॥ माणुसत्तं जवे मूलं । लाजो देवगई जवे ॥ मूलछेएण जीवाणं । नरगतिरिक्खत्तणं धुवं ॥ ३ ॥ अथ मानुष्यस्य दुर्लजतयां दृष्टांतानाह—लंजे जस्सेत्युत्तरार्धं स्पष्टं, दृष्टांतसंग्रहश्चैवं—विप्राशनं पाशकमन्नराशिं । द्यूतं मणिं स्वप्नशशांकपानं ॥ चक्रं च कूर्मं च युगं पराणुं । दृष्टांतमाहुर्मनुजत्वलाजे ॥ १ ॥ तत्र विप्राशनदृष्टांतः पूर्वं प्रतिपाद्यते—

कांपिल्यपत्तने ब्रह्म—दत्तोऽजनि नरेश्वरः ॥ चुलनीकुक्षिनलिनी—हंसो ब्रह्मनृपांगजः ॥ ॥ १ ॥ यो दीर्घदर्शिनं दीर्घं । दीर्घनिद्रामलंघयत् ॥ स्फुरत्खड्गलताछाये । श्रांतं समरकानने ॥ २ ॥ संजाते चक्रवर्तित्वा-जिषेके द्वादशाब्दिके ॥ फलानीव तपःकल्प—तरोः सौख्यान्यजुक्त यः ॥ ३ ॥ बहुदुःखसहायोऽजू—द्भ्राम्यतस्तस्य जूतलं ॥ द्विजः कोऽपि पुरा दुःस्थो ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दारिद्र्यस्येव सेवधिः ॥ ४ ॥ स श्रुत्वा चक्रिणं ब्रह्म–दत्तं वित्ताभिलाषुकः ॥ कांपिल्यमाययौ
पांथ । इव नीराशया सरः ॥ ॥ ५ ॥ सिंहद्वारं विशन् विप्र—श्चक्रिणोऽवारि वेत्रिणा ॥ क
प्रस्थितोऽसि रे धृष्ट । तिष्ठ तिष्ठेति जल्पता ॥ ६ ॥ मम च ब्रह्मदत्तस्य । चास्ति प्रीतिश्चिरं-
तनी ॥ तमेकदा दिदृक्षोऽह–मित्युक्ते तेन सोऽवदत् ॥ ७ ॥ निष्ठिता नाकिनाथाः किं । क्षी-
णा वा खेचरेश्वराः ॥ नरेंद्रवृंदवंद्यांह्रि–र्यत्त्वां मित्रीयतिस्म सः ॥ ८ ॥ श्वानेनेवाभ्रभूर्जंतु–
र्सिंहेनेव दिवस्पतेः ॥ तस्य षट्खंडभूपस्य । का मैत्री दुःस्थ रे त्वया ॥ ९ ॥ पश्यन्नपि नृपा-
नेता–नप्रासादकरानिह ॥ क्षुधाकरंक रे रंक । विविक्षति कथं भवान् ॥ १० ॥ एवं निवा-
रितस्तेन । विप्रः क्षिप्रमपासरत् ॥ सिसाधयिषुरर्थं स्वं । बुद्ध्या द्यूतापणे गतः ॥ ११ ॥ तत्र
द्यूतकृतः कूट–बुद्धीनामाकरानिव ॥ उपाचरत्ययं पाना–शनदानादिना द्विजः ॥ १२ ॥ भूमि-
शायिषु कोपीन–वस्त्रेषु विरसाशिषु ॥ परद्रव्यैकतानेषु । त्वं किमस्मासु लिप्ससे ॥ १३ ॥ तै-
रित्युक्तो द्विजोऽवादी–त्सौम्यास्तां दत्त मे मतिः ॥ प्राग्बद्धसौहृदश्चक्री । यया संगच्छते मम
॥ १४ ॥ न मे वित्तं न मे मित्रं । न मे वस्त्रादिडंबरः ॥ किं तु मत्यैव युष्माक–महं द्रक्षा-

For Private and Personal Use Only

मि चक्रिणं ॥ १५ ॥ तेऽपि तं शिक्षयंतिस्म । ध्वजं द्विज पटच्चरैः ॥ विधायोत्तंभयेरुच्चै-रेवं
द्रष्टासि भूपतिं ॥ १६ ॥ सोऽथ संगृह्य सकला-न्युपानत्पूर्पवाससां ॥ रजोमहमहीनाथ । इव
चक्रे नवं ध्वजं ॥ १७ ॥ राजपाटिकया प्रात-र्यदा चक्री विनिर्ययौ ॥ निजं ध्वजं समुत्तभ्य।
। तदोच्चस्तस्थिवान् द्विजः ॥ १८ ॥ सेवायातनृपव्रात-ध्वजेष्वभ्रलिहेष्वपि ॥ चक्रिणो दृग्
विशश्राम । तस्मिन्नेव नवे ध्वजे ॥ १९ ॥ कः केन वा कुतो हेतोः । केतुरस्त्ययमुच्छ्रितः ॥ इ-
त्युक्ता भूभुजा भृत्या । द्विजंप्रति दधाविरे ॥ २० ॥ ध्वजोत्तंभनहेतुं तै-रनुयुक्तो द्विजो ज-
गौ ॥ निदध्यासामि चक्रेशं । पूर्वमित्रं धियानया ॥ २१ ॥ त्यक्त्वा गृहगृहापुत्रा-नागां यस्मै
बभूव सः ॥ चक्री चक्रवतो द्राक्षा-गुल्मवद् दुर्लभो मम ॥ २२ ॥ श्रुत्वेति चक्रिणः सर्वे ।
ते तदुक्तं न्यवेदयन् ॥ चिरोपकारिणं धैर्या-धारः सस्मार सोऽपि तं ॥ २३ ॥ मास्म वेलावि-
लंबोऽभू-त्तमानयत सत्वरं ॥ इति भर्तुर्गिरा भृत्या-स्तं द्विजन्मानमाह्वयन् ॥ २४ ॥ तं मू-
र्तमिव दारिद्र्यं । समुत्सृज्य ध्वजं द्विजः ॥ दधावे विस्मयस्मेरै-र्दत्तवर्त्मा नरेश्वरैः ॥ २५ ॥
चक्री कांचनभूषारुक्-पिंजरस्त्यक्तकुंजरः ॥ उत्पाटित इव प्रेम्णा । तमागच्छंतमभ्यगात् ॥

उप० ॥ २६ ॥ नमतो नेत्ररोगीव । यो नः कथमपीक्षते ॥ सोऽमुं दरिद्रमन्येति । प्रीत्या कस्येद-
मुच्यते ॥ २७ ॥ विज्ञापितोऽपि योऽस्माभि—र्जल्पत्यल्पं गलात्तवत् ॥ सोऽमुं विवक्षति स्वैरं
चिंता० ॥ स्वामित्वं ह्यसमंजसं ॥ २८ ॥ इति ध्यायत्सु भूपेषु । चक्री दत्ताशिषं द्विजं ॥ दृढमालिंग्य
१७४ चारोप्य । गजेंद्रमिदमालपत् ॥ २९ ॥ उपकारास्त्वया क्लृप्ता । आपद्यापन्नवत्सल ॥ क्षणं मम
न मुंचंति । चेतो न्यासीकृता इव ॥ ३० ॥ अमी गजा अमी अश्वा । अमी कोशा अमूः
श्रियः ॥ एषु स्वेप्सिततमादाय । तेभ्यो ममानृणीकुरु ॥ ३१ ॥ स प्रोचे तनुतृष्णस्तं । प्राक्
स्वसद्मनि भोजनं ॥ अदीनारं भदीनारं । दक्षिणायां च देहि मे ॥ ३२ ॥ ततो भरतसीमांतं
। सर्वसद्मसु दापय ॥ दक्षिणायुक्तमेकैकं । भोजनं भो जनेश्वर ॥ ३३ ॥ भुक्त्वा सर्वत्र या-
चिष्ये । भूयस्त्वामेव भोजनं ॥ स्वामिन्नेवं त्वत्प्रसादा—दीषदाढ्यं भवं मया ॥ ३४ ॥ आः किं
याचितवानेष । मयि तुष्टे नरेश्वरे ॥ यद्वांभः कियदादत्ते । वार्धौ क्षिप्तोऽप्युदंचकः ॥ ३५ ॥
श्वानस्तुष्टेऽपि देवेंद्रे । शश्वद्वांतं समीहते ॥ स्वचंचुपुटपूर्तिं च । शालेये फलिते द्विजः ॥३६॥
दृढं याचति भिक्षाको । भिक्षापात्रं सुरद्रुमं ॥ यांचापि प्रायसः पुंसां । प्रतिष्ठामनुवर्तते ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३७ ॥ अदातुं वा प्रदातुं वा । भवेन्न प्रभुरप्रभुः ॥ सरसां सूर एवेष्टे । शोषणे पोषणेऽपि वा ॥ ३८ ॥ ध्यात्वेति भूभुजाऽभोजि । विप्रः स प्राक्सदक्षिणं ॥ अंतःपुरीसहस्रैश्च । चतुःषष्ट्या ततः परं ॥ ३९ ॥ ततो द्वात्रिंशता राज—सहस्रैः क्षत्रियैस्ततः ॥ इभ्यैः प्रकृतिभिर्द्रंग—ग्रामादिषु ततः क्रमात् ॥ ४० ॥ सोऽयं द्विजो भारतमंदिरेषु । सर्वेषु भुक्त्वा भरताधिपस्य । भुंजीत भूयो भवने कदापि । भजेद् धर्मा न पुनर्नृजन्म ॥४१॥ इति. अथ पाशक दृष्टांतः—अस्त्यत्र भरतक्षेत्रे । गोल्लदेशो मनोहरः ॥ तत्राभूच्चणकग्राम—वासी चणिरिति द्विजः ॥१॥ स चतुर्दशविद्याब्धि—पारदृश्वा शुभाशयः ॥ अर्हद्धर्मे दधौ स्थैर्यं । सांद्रद्रुम इव द्विजः ॥ २ ॥ अन्यदा पुण्यदानेन । प्रीणयंतो जगज्जनं ॥ ईयुर्ज्ञानक्रियासत्रं । तत्र सागरसूरयः ॥ ३ ॥ स्वगृहाधित्यकायां तान् । विप्रः शांतानतिष्ठिपत् ॥ अभिरामपरिणामः । प्राणिनो निर्वृताविव ॥ ४ ॥ नाम्ना चणेश्वरी तस्य । कांतासूत सुतं तदा ॥ प्ररूढदाढमाजन्म । विंध्यभूरिव सिंधुरं ॥ ५ ॥ कृतजाणिक्यनामानं । तनयं दशमे दिने ॥ वंदयित्वा गुरून् दाढा—वृत्तांतमभणाच्च तं ॥ ६ ॥ बालोऽयं भूपतिर्भावी—त्युक्ते श्रीगुरुणा चणिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संतोषसेवधिर्गत्वा । गृहांतश्चेत्यचिंतयत् ॥ ७ ॥ राज्यमुग्रनरकार्तिकारणं । राज्यमग्न्यशमसौ-
ख्यदारणं ॥ राज्यमाज्यमिव हि प्रमेहिनां । देहिनां परिणतौ न सुंदरं ॥ ८ ॥ जघर्ष सोऽ-
थ तद्दाढा । बालकुंचिकया रयात् ॥ अबोध्यत च तद् वृत्तं । चणिना गणनायकः ॥ ९ ॥
गुरुः प्रोचे महाभाग । किं बालोऽयं कदर्थितः ॥ भाव्यं यद्यस्य तत्तस्य । भवत्येव न संशयः
॥ १० ॥ त्वया यद्यप्यघृष्यंत । दाढा बालस्तथाप्यसौ ॥ बिंबेनांतरितो भोक्ता । राज्यं
प्राज्यपराक्रमः ॥ ११ ॥ पित्रा पवर्धमानोऽसौ । पाठितः सकलाः कलाः ॥ अनुरूपां
द्विजकर्नी । यौवने पर्यणाय्यत ॥ १२ ॥ काले ताते दिवं याते । द्रव्यजाते गतस्पृहः ॥ अ-
पालयत् पितुः कोश-मिव संतोषमेव सः ॥ १३ ॥ अन्यदा बंधुविवाहे । महोत्साहेन वत्स्यें-
ति ॥ पितुर्गेहमतिस्नेहा—द्ययौ चाणिक्यगेहिनी ॥ १४ ॥ अन्या अप्याययुस्तस्याः । स्वसा-
रः सारवैभवाः ॥ सख्यादिसहिता राज—महिष्य इव लीलया ॥ १५ ॥ ता ऊढा धनप्रौ-
ढै-रित्यतिव्याकुलैरपि ॥ मातापित्रादिभिर्गेह-मानीयंत सगौरवं ॥ १६ ॥ अभ्यंगोद्वर्तनस्ना-
न—विलेपनविभूषणैः ॥ संमान्यंतेस्म ता देव्य । इव सर्वैः ससंभ्रमं ॥ १७ ॥ चाणिक्यपत्नी

For Private and Personal Use Only

निःस्वेति । तैर्दासीव दिवानिशं ॥ अकारि कर्म मध्याह्ने । यद्वा तद्वाप्ययोजि च ॥ १८ ॥
कल्पवल्लीषु कर्कंधु—मेरालीष्विव वायसी ॥ घनश्रीकासु निःश्रीका । ददृशे सोदरीषु सा
॥ १९ ॥ पितुस्ता दिव्यवस्त्राणि । विवाहादनुलेभिरे ॥ लेभे चाणिक्यपत्नी तु । वराशिमपि
कष्टतः ॥ २० ॥ बंधुभिः सह भूत्वा ताः । प्राप्यंत श्वशुरालयं ॥ दीना केनापि सार्धेन । प्रा-
हीयत चणिरनुद्रा ॥ २१ ॥ द्रव्यप्राणपरित्यागे । सा प्राप्ता पितृमंदिरं ॥ युक्तं दुःखाग्निना दा-
हे । ववले यत्तदद्भुतं ॥ २२ ॥ पितृधिक्कारदावोष्म— तप्ता बाष्पायतेस्म सा ॥ ईक्षा मिलि-
तमेघांबु-रिव संजग्मुषी प्रियं ॥ २३ ॥ अस्थानश्रणवद्वक्तु-मशक्ता पितृहीलनं ॥ भर्त्रा नि-
र्बंधतः पृष्टा । कथंचन जगाद सा ॥ २४ ॥ ततो दध्यौ स चाणिक्यो । माणिक्योज्ज्वलबु-
द्धिभूः ॥ लोके श्रीरेव गौरव्या । न कुलं न कला अपि ॥ २५ ॥ आस्तां यदखिलश्रीमा—
न्नरः स्याज्जगतः प्रियः ॥ काष्ठं श्रीखंडनामापि । पश्य कस्य न वल्लभं ॥ २६ ॥ साधुरोऽपि
सुवृत्तोऽपि । रूपवानपि रूपकः ॥ न दिजाति यथा द्रव्य—हीनस्तद्वत्पुमानपि ॥ २७ ॥ पंक्ति-
लो जलनाथोऽपि । क्षारः कुग्राहभूरपि ॥ कैः सादरैर्न सेव्येत । श्रीतात इति सागरः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ २८ ॥ शास्त्रोक्त्या मुखरः शमेन विधुरः स्थाम्ना पतंगोपमः । वाक्स्थैर्येण कदाग्रही ऋजुतया मूर्खो धिया धूर्तकः ॥ संतुष्ट्याप्यलसो भ्रमीव कलशाप्येवं यथा वर्जितो । दृष्येताप्यगुणोऽपि हंत मनुजस्तस्यै नमोऽस्तु श्रिये ॥ २९ ॥ श्रीर्हि जैर्याचया लभ्या । योग्या यांचाधिमे नृपे ॥ पर्जन्यवर्जमन्येभ्यो । नांभो याचेत चातकः ॥ ३० ॥ तद्याचे पाटलीपुत्र-वासिनं नंदभूपतिं ॥ वैवर्ण्यं याचकास्येषु । सुवर्णैः परिमार्ष्टि यः ॥ ३१ ॥ ध्यात्वेति सोऽगमद्भोज-सहायः पाटलीपुरं ॥ मनोरथरथारोह-श्वस्तव्यैहारिकक्रमः ॥ ३२ ॥ सोऽविशन्मंदिरं प्रातर्नांदमानंदमेदुरः ॥ दैवाद्दौवारिकेणापि । न वायुरिव वारितः ॥ ३३ ॥ सिंहासनेषु नांदेषु । नवसु क्रमवर्तिषु ॥ आद्यं सिंहासनं सिंह-शक्तिरध्यास्त तत्र सः ॥ ३४ ॥ परिमार्ष्टुं सज्जां प्रात-रायाता राजकिंकरी ॥ मूलसिंहासनासीनं । द्विजं वीक्ष्य दधौ रुषं ॥ ३५ ॥ ऊचे च रे द्विज द्वेधा । दधानो दीर्घसूत्रतां ॥ सिंहासनेऽत्र भूजंतु-रपि पूज्यो निषीदसे ॥ ३६ ॥ तवासनेऽत्र नैकस्य । स्वर्णांबुज इव स्थितिः ॥ न युक्तेति तया प्रोक्त-स्तत्र दंभं न्यधत्त सः ॥ ३७ ॥ नैजे सिंहासनं चान्य-त्ततोऽप्युत्थापितस्तया ॥ मुक्त्वा क्रमं क्रतुं तत्र । तत्तृतीयं स

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्यमे ॥ ३८ ॥ पुनस्तयोद्घाप्यमानो-ऽगौत्सीत्सर्वासनानि सः ॥ पादूपवीतवैकक्षा-कमाछाद्यकैरपि ॥ ३९ ॥ राज्याधिष्ठातृवरेण्या-क्रांते सिंहासनेंतिमे ॥ नंदः पुरोधसा सत्रा । तत्रायासीन्नरेश्वरः ॥ ४० ॥ कोऽपि राज्ञा सहायातः । सिद्धपुत्रोऽवदत्तदा ॥ अहो आक्रम्य नंदस्य । राज्यमेष द्विजः स्थितः ॥ ४१ ॥ याहि याहीति जल्पंत्या । स्वामिदृग्बलदीप्तया ॥ आशु निर्वासितो दास्या । स लोष्टुरिव संसदः ॥ ४२ ॥ यद्दसूयं रुषास्पोऽथ । गुंजापुंजायितेक्षणः ॥ परिस्पृश्य जलं विप्रः । प्रत्यज्ञासीदिदं तदा ॥ ४३ ॥ अतिकठिनमनक्षोत्तुंगमूर्धानमुच्चैः । पदकपटमदंचत्खङ्गमुत्तालसालं ॥ अहमनुन्हतौजा मंक्षु कल्पांतकाला - निल इव धरणींद्रं नंदमुत्पाटयामि ॥ ४४ ॥ अपनेया मया पूर्णे - प्रतिज्ञेनेयमित्यसौ ॥ बबंध मस्तके गाढ-गर्वग्रंथिमिवाली शिखा ॥ ४५ ॥ यत्किंचिद्वक्ति ही क्रोधा-वेशादेष द्विजब्रुवः ॥ तत्किं प्रत्युच्यतेऽस्येति । क्षितीशस्तमुपैक्षत ॥ ४६ ॥ भूतिस्थाने पराभूतिं । प्राप्तो भूपतिसद्मनि ॥ निर्गतो नगरादाशु । सोऽभिमानीति दध्यिवान् ॥ ४७ ॥ अशक्तेना प्रतिज्ञातं । मया राजतिकेन यत् ॥ तत्समारोढुमारेभे । पंगुनामरभूधरः ॥ ४८ ॥ प्रतिज्ञा क्रियते न प्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क् । कृता चेत्तर्हि पूर्यते ॥ अपूरितप्रतिज्ञस्य । जीवितान्मृत्युरुत्तमः ॥ ४९ ॥ एवं चिंतयत-
स्तस्य । तत्स्मृतं यत्पितुः पुरः ॥ बिंबांतरितराजत्व-मस्यादिश्यत सूरिजिः ॥ ५० ॥ परिव्रा-
जकवेषेण । बिंबं । लब्धुं भ्रमंस्ततः ॥ मयूरपोषकग्रामं । सोऽगमन्नादमन्यदा ॥ ५१ ॥ संप्रा-
प्तस्तत्र जिक्षार्थं । ग्रामाध्यक्षस्य सद्म सः ॥ अद्राक्षीदखिलदुःख—विछायवदनं जनं ॥५२॥
संजातप्रजावं तं । नत्वा ग्रामाग्रणीर्जगौ ॥ किं किं कल्याण वेत्सीति । गौरगौरवया गिरा
॥ ५३ ॥ न सा कला न सा विद्या । यां न जानात्ययं जनः ॥ एवं ग्रामाधिपस्याग्रे । गर्जं-
स्तिव जगाद सः ॥ ५४ ॥ स प्रोचे जगवन् सर्वं । संजाव्यं त्वयि तच्छृणु ॥ सेयं मे दुहिता
गुर्वी । शर्वरीशं पिपासते ॥ ५५ ॥ येन केनाप्युपायेना—मुष्याः पूरय दोहदं ॥ विपत्स्यतेऽ-
न्यथा बाला । त्रुटत्तैलेव दीपिका ॥ ५६ ॥ दोहदेनैव तद्गर्जं । राज्यार्हमवबुध्य सः ॥ प्रम-
दोत्पन्नरोमांचः । प्रोवाच चणिनंदनः ॥ ५७ ॥ दत्से चेद्गर्जमेतन्मे । दोहदं पूरयामि तत् ॥
॥ प्रायः प्रयाससाध्येऽर्थे । न बुधानां मुधादरः ॥ ५८ ॥ जनविष्यति जीवंती । बाला बाला-
न् बहूनपि ॥ इयं फलानि वल्लीवे—त्यंगीचक्रे स तद्वचः ॥ ५९ ॥ ततो ग्रामीणलोकेषु । सा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० क्षीभूतेषु तव सः ॥ गंभीरं कारयामास । पटुधीः पटमंरूपं ॥ ६० ॥ तस्योर्ध्वं रंध्रमेणाक—
प्रमाणेन च निर्मितं ॥ सोऽत्रस्थाप्य निशि ज्योत्स्ना । तत्र बालामसूषुपत् ॥ ६१ ॥ निशीथे
चिंता० तत्पुरो मुक्ते । शर्कराक्षीरपूरिते ॥ सुधाकुंभ इव स्थाले । संचक्राम निशामणिः ॥ ६२ ॥ सु-
१८१ धाभानुरिहानीतो । मंत्रैः पुत्र्येष पीयतां ॥ श्रुत्वेति तद्वचोऽपक—निद्रया सहसोत्थिता ॥
॥ ६३ ॥ ततस्तस्यां विधुधिया । धयंत्यां ससितं पयः ॥ रंध्रं पिधापयामास । चणिसूनुः शनैः
शनैः ॥ ६४ ॥ पूर्णायुर्भविता गर्भो । न वेति ज्ञातुमभ्यधात् ॥ चाणिक्यस्तामियानिंदुः । प्र-
जार्थं पुत्रि मुच्यतां ॥ ६५ ॥ सतृष्णा नेति जल्पंती । सा चंद्रं सकलं पपौ ॥ स्वमुखद्विष-
मासं हि । किं त्यजत्यर्धचर्वितं ॥ ६६ ॥ रंध्रेऽथ पिहिते सूची—भेद्ये तमसि विस्तृते ॥ विधुं
विना जनं वीक्ष्य । विधुरं निजगाद सः ॥६७॥ मया प्रजार्थमुत्पाद्यो । नव्य एवाथ चंद्रमाः
॥ एवं बुद्ध्या राजबिंबं । समासूत्र्य चचाल सः ॥ ६८ ॥ नार्थं विनार्थसिद्धिः स्या—दित्यसौ
धातुवादवित् ॥ संचिकाय गतो धातु—विवराणि घनं धनं ॥ ६९ ॥ निरीक्षितुं निजन्यास—
माजगाम निशामुखे ॥ गोधने विशति ग्रामं । तमेव स कदाचन ॥ ७० ॥ ददर्श तत्र तं बा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ल–मुक्तालयुतिमंकलं ॥ रेणुसिंहासनासीनं । खेलंतं राजखेलनैः ॥ ७१ ॥ परीतं परितो बा-
लैः । सामंतादिपदे स्थितैः ॥ निग्रहानुग्रहव्यग्र–मन्यायन्यायचारिषु ॥ ७२ ॥ युग्मं ॥ कल्प-
द्रुमायमाणं तं । याचकेषु यशस्विनं ॥ किंचिन्मह्यं प्रदेहीति । चणिजूरप्ययाचत ॥ ७३ ॥
स्थूललक्षः शिशुस्तस्मै । सकलं गोकुलं ददौ ॥ सोऽप्यवादीदिदं गृह्ण—न्मार्यै गोधनिकैर्न
किं ॥७४॥ हसन् बालो जगौ हीन–सत्त्व मा भैर्गृहाण भोः ॥ को व्यर्थयति मद्दत्तं । वीरभो-
ज्या वसुंधरा ॥ ७५ ॥ वयोऽनुमानशौर्याभ्या—मुपलक्षयतापि तं ॥ कोऽयमित्यर्भकः कोऽपि
पृष्टस्तेनेत्यभाषत ॥ ७६ ॥ चंद्रगुप्ताख्यया ग्राम—स्वामिनो दुहितुः सुतः ॥ अभ्रौ गर्भगतोऽ-
प्येष सर्वैर्दत्तोऽस्ति लिंगिनः ॥ ७७ ॥ प्राप्तराज्य इव प्रीतो । चाणिक्यस्तं ततो जगौ ॥ एहि
वत्स यथा कुर्वे । त्वामूर्वीशं यथातथं ॥ ७८ ॥ विश्वविश्वंभराभार–वहनोदात्तदोर्युगः ॥ अ-
र्भस्तं निर्भयं भेजे । क भयं किल तादृशां ॥ ७९ ॥ भ्रमन् वसुमतीं तेन । समं प्राग्मेलितैर्ध-
नैः ॥ अचिरेण चमूं चिक्ये । चाणिक्यश्चतुरंगिकां ॥ ८० ॥ चंद्रगुप्तं नृपं कृत्वा । स स्वेना-
हत्य मंत्रितां ॥ रुरोध नगरं नांदं । सेतुर्वारीव सारसं ॥ ८१ ॥ नंदः सर्वाभिसारेण । नगरा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरगान्निजात् ॥ प्रावर्तत मिथो युद्धं । सैन्ययोरुभयोरपि ॥ ८२ ॥ नंदस्य सुभटैरंशो-
रिवांशुभिरभिद्रुता ॥ कलेव चांद्री ध्वजिनी । जनस्यादृश्यतां ययौ ॥ ८३ ॥ आरूढौ चंद्र-
चाणिक्या-वेकमश्वं पलायितौ ॥ न हि तौ स्वहितौ वैरि-बलाभ्यावुपलायितौ ॥ ८४ ॥ पृ-
ष्ठानुपातिनं नंद—सादिनं वीक्ष्य कंचन ॥ तौ तुरंगमपि स्वाम्य—संपत्पिशुनमौज्झतां ॥
॥ ८५ ॥ पुरः सरस्तटे कंचि-द्रजकं चणिभूजगौ ॥ रे नश्य पश्य चंद्रेण । लोड्यते नंदपत्तनं
॥ ८६ ॥ श्येनैरिव निगृह्यंते । चंद्रगुप्तस्य सैनिकैः ॥ भ्रांत्वा भ्रांत्वाश्रितो नंद—वर्गीणाश्वट-
का इव ॥ ८७ ॥ उड्डीनात्मेव वासांसि । तत्याज रजकस्ततः ॥ मेने तेनोपसंख्यान-मपि भा-
राय नश्यता ॥ ८८ ॥ विशालनलिनीजाल—गुपिले सरसो जले ॥ चाणिक्योक्त्या चटुलदृक्
। चंद्रगुप्तो न्यलीयत ॥ ८९ ॥ उत्ताले स्मेरनलिने । निलीनो नलिनीवने ॥ अन्वभूज्जातिभूपो-
ऽसौ । सदंभछत्रसंपदं ॥ ९० ॥ तं चंद्रमपि पद्मिन्यो । ररक्षुरनिशं नवं ॥ गुणवत्यो हि नौ-
चित्या—च्यवतेऽरिजनेऽपि ताः ॥ ९१॥ स्वयं तु रजकीभूय । मंत्री वासांसि धौतवान् ॥ भ-
यार्त्तैर्गण्यते नैव । प्रायः कर्म विकर्म वा ॥ ९२ ॥ तावत्तत्रायर्यौ वैरि—सादी वादीव वाक्प-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रुः ॥ विपक्षपक्षमुछेत्तुं । दृढहेतौ कृतश्रमः ॥ ९३ ॥ अभाषत च साक्षेपं । रे रे रजक किं
त्वया ॥ नश्यंतौ चंद्रचाणिक्यौ । दृष्टौ कापि द्विषाविति ॥ ९४ ॥ सोऽवदद्वेद नोऽदंतं । चा-
णिक्यस्य द्विजन्मनः ॥ राजा चंद्रः पुनर्वारि—मध्यमध्यास्य तिष्ठति ॥ ९५ ॥ श्रुत्वेति को-
पकंप्रोष्टः । प्राप्तो वैरीति संमदी ॥ तुरगादुत्तरन्नेव । तुरगीति जगाद तं ॥ ९६ ॥ इमं हयं
च खङ्गं च । क्षणं धावक धारय ॥ यथा कृष्याम्यमुं नीरा—त्पाठीनमिव धीवरः ॥ ९७॥ म-
नो नाश्वासिविश्वासि । वस्त्रमात्ररुचेर्मम ॥ इत्युक्ते तेन तुरगं । तरुस्कंधे बबंध सः ॥ ९८ ॥
यावद्भूमिविमुक्तासि—रसौ विशति वारिणि ॥ तेनैव तावदसिना । चाणिक्यस्तं द्विधा-
करोत् ॥ ९९ ॥ एहि वत्सेति तद्वाचा । मौर्यः प्रादुरभूज्जलात् ॥ तमेव हयमारुह्य । तौ द्वा-
वथ प्रचेलतुः ॥ १०० ॥ प्राग्वत्तमपि मुक्त्वाश्वं । चाणिक्यो मौर्यमन्वयधात् ॥ किमध्यायस्त-
दा वत्स । यदा दिष्टोऽसि विद्विषः ॥ १ ॥ सोऽप्यभत्त तदा तात । ध्यातवानित्यनातुरः ॥
इदं राज्यं ममार्येण । ध्रुवं दृष्टं भविष्यति ॥ २ ॥ चाणिक्यश्चिंतयामास । प्राप्तराज्योऽप्यसौ
मम ॥ समुल्लंघिष्यते नाज्ञां । मर्यादामिव सागरः ॥ ३ ॥ अथ क्षुधातुरं चंद्र—गुप्तं मुक्त्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वनांतरे ॥ प्रविवेश कंचन ग्रामं । चाणिक्यो भैक्ष्यलिप्सया ॥ ४ ॥ काप्यत्र लभ्यते भोज्य-
मिति कंचन स द्विजं ॥ पप्रच्छ तत्क्षणग्रस्ता– हारजाराबलसक्रमं ॥ ५ ॥ स स्माह गेहिनोऽ-
मुष्य । गेहेऽद्यास्ति महोत्सवः ॥ त्वमत्र लप्स्यसे भैक्ष्य—मत्र लब्धं मया ह्यपि ॥ ६ ॥ आ-
यासभीरुणा तेन । मौर्यस्यापायशंकिना ॥ कुष्मांडवद् द्विजस्यास्यो—दरं क्षुर्या व्यदार्यत ॥
॥ ७ ॥ कलशादिव तत्कुक्षेः । कृष्ट्वा कुरकरंभकं ॥ अविनष्टेन तेनासौ । चंद्रगुप्तमभोजयत्
॥ ८ ॥ हृतद्विजोदराकृष्ट—करंभास्वादसादरं ॥ निशूकः इव राज्यार्हं । चाणिक्यो निश्चिका-
य तं ॥ ९ ॥ अथ तौ प्रस्थितौ सायं । कंचन ग्राममीयतुः ॥ चाणिक्यस्तत्र भिक्षार्थं । वृ-
द्धाभीरीगृहं गतः ॥ १० ॥ तया तत्कालमुत्तीर्ण, । पेया हुतवहोपमा ॥ स्थाले क्षुधाकराला-
नां । बालानां पर्यवेष्यत ॥ ११ ॥ दृष्ट्वा तां बालकः कोऽपि । प्रेयसीं पायसादपि ॥ दिव्य-
कारीव चिक्षेप । सत्वरः करमंतरा ॥१२॥ तया दग्धकरः क्रंद—न्नेवमालापि वृद्धया ॥ त्वं व-
त्स तुच्छधीः कस्मा—च्चाणिक्य इव चेष्टसे ॥ १३ ॥ स्वनामश्रवणाशंकी । चाणिक्यस्तामभा-
षत ॥ कोऽसौ मातस्त्वयाभाणि । चाणिक्योऽस्य निदर्शने ॥ १४ ॥ साप्युचे वत्स कोऽप्यस्ति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। चाणिक्यो दैवदोषतः ॥ स स्वेनाहृत्य मंत्रित्वं । चंद्रगुप्तं व्यधान्नृपं ॥ १५ ॥ मंत्री मंत्रवि-
हीनोऽसौ । मेलिताल्पपरिच्छदः ॥ रुरोध रभसा राज—धानीं नंदनरेशितुः ॥ १६ ॥ ततो नं-
देन निर्गत्य । तथालोड्यत तद्बलं ॥ यथा खरमरुन्नुन्न—सक्थुमुष्टितुलां ललौ ॥ १७ ॥ यच-
सो बालिशो देशं । प्राग्व्यजेष्यत तत्सुखं ॥ निःप्राकारमिवावर्त— -मुपादास्यत तत्पुरं ॥ १८ ॥
तथा शिशुरसौ पूर्व—मनादायैव पार्श्वतः ॥ दग्धः किलोष्णपेयाया । गर्त्त एव क्षिपन् करं ॥
॥ १९ ॥ एषा वृद्धामिषाज्ञात—देवी मे मतिदायिनी ॥ इति तस्या वचः शिक्षा—प्रायमादाय
सोऽचलत् ॥ २० ॥ मेलयित्वा शनैः सेनां । चंद्रगुप्तान्वितोऽथ सः ॥ मित्रीयितुं शबरेशं ।
जगाम हिमवद्गिरिं ॥ २१ ॥ स श्रीदानेन मानेन । कलाभिश्च महाबलं ॥ पल्लीशं पर्वतं तत्र
। चक्रे मित्रमभंगुरं ॥ २२ ॥ पर्वतं सोऽन्यदावोच—देहि मित्र मया सह ॥ उद्धरावो य-
था नंदं । मुस्ताकंदं किरी इव ॥ २३ ॥ तद्राज्यं च विभज्याहो—रात्रं शशिरवी इव ॥ आ-
वां भोक्ष्यावहे मुंच । मध्ये गिरिमुलूकतां ॥ २४ ॥ पर्वतः प्रतिपेदे त—दसंतुष्टा हि भूभुजः
॥ ततस्तौ चलितौ स्वस्व—चतुरंगचमूवृतौ ॥ २५ ॥ तौ निर्गतौ नगान्नाकि—सिंधुसिंधुप्लवा·

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विव ॥ देशमास्कंदतां नांदं । वर्धमानौ दिने दिने ॥ २६ ॥ तयोः प्रसरतोस्तस्थु–स्ते ये त्र्यं-
जुलवन्नताः ॥ शेषशाखिवदामूल– मुध्धृता अनताः पुनः ॥ २७ ॥ एकं तौ पर्यवेष्टेता–मन्नं-
गं डुंगमन्यदा ॥ न तु तं पर्वतं मेघा- विव जेतुमशक्नुतां ॥ २८ ॥ विवेश वीक्षितुं वास्तु ।
परिव्राजकवेषनाक् ॥ चाणिक्यस्तत्पुरं लिंगी । ह्यनिरुद्धगमागमः ॥ २९ ॥ स मध्येनगरं भ्रा-
म्यन् । कचिदिंद्रकुमारिकाः ॥ ददर्श सुप्रतिष्ठानाः । पुर्या वज्रांगिका इव ॥ ३० ॥ आसां प्र-
नावतोऽनंगो । डुंगोऽयमिति चिंतयन् ॥ उद्विग्नैश्चिररोधेन । स पौरैरित्यपृच्छ्यत ॥ ३१ ॥
प्रनो प्राप्ताश्चिरात्कारा–वेष्मवासव्यथां वयं ॥ कदा लप्स्यामहे मोक्ष–ममुष्मादरिचक्रतः ॥
॥ ३२ ॥ एता इंद्रकुमार्यश्चे–दुध्ध्रियतेऽधुनापि तत् ॥ पुरमुद्धेष्यते नात्र । भ्रांतिरेताह्यलक्षणाः
॥ ३३ ॥ खननोपक्रमेऽप्यासा–मिषद्रोधो निवर्त्स्यति ॥ तेनत्युक्ते जनः खिन्नः । खनितुं ताः
प्रचक्रमे ॥ ३४ ॥ युग्मं ॥ मनाग्निवर्तयामास । चाणिक्यः स्वां चमूं चरैः ॥ ततः प्रत्ययतः
पौरै–रामूलं ताः समध्धृताः ॥ ३५ ॥ ततस्तत्पुरमालोड्य । लीलया चंद्रपर्वतौ ॥ स्वीकृत्य
देशमक्लेशं । पाटलीपुत्रमीयतुः ॥ ३६ ॥ सर्वशक्त्या समं ताभ्यां । कुर्वन्नंदः समाह्वयं ॥ अ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यायव्ययकारीव । त्रुटतिस्म दिने दिने ॥ ३७ ॥ अथ नंदः श्लथानंदो । वनीपक इवाशु तं
अनन्यजीवनोपायो । धर्मद्वारमयाचत ॥ ३८ ॥ चाणिक्यस्तद्ददौ तस्य । पुनरर्थी क तादृशः
॥ ऊचे च मागधमुखे—नेति नीतिविशारदः ॥ ३९ ॥ नंद नादास्तदा मह्यं । किंचित्त्वं कां-
चनार्थिने ॥ इदानीं ते ददानोऽस्मि । जीवितं प्रियजीवितं ॥ ४० ॥ यद्रोचते तदादाय । र-
थेनैकेन निःसर ॥ श्रुत्वेति तद्वचो नंदः । स्वं निनिंद विधेर्वशं ॥ ४१ ॥ चापल्यं चिंतयन् ल-
क्ष्म्याः । पुत्रीमेकां प्रिये उभे ॥ सारसारं च रत्नौघ—मेकस्मिन् स रथे न्यधात् ॥ ४२ ॥ म-
दरिः परिणीयेमां । म्रियतामिति दुष्टधीः ॥ एकां विषकन्यां रूप—खनीं गेहे मुमोच सः ॥
॥ ४३ ॥ यामो वास्तु तवास्तु मंगलमहो सिंहासन क्षम्यतां । हे शय्यावसनासनाश्वकरि-
णो ब्रूयः क वः संगमः ॥ कोशाः स्थास्यथ किं व्रजत्यपि मयि प्रीतिं त्यजध्वं प्रजाः । को यु-
ष्मानथ वर्धयिष्यति हहा हे हेमरूप्याचलाः ॥४४॥ एवं प्रलपतस्तस्य । स्वर्णाङ्घ्रिध्यानतो ध्रु-
वं ॥ तद्रूपमेव हृज्जात-मस्फुटिष्यन् किलान्यथा ॥ ४५ ॥ नगरान्निर्यतस्तस्य । क्रूरादेहादि-
वात्मनः ॥ चंद्रपर्वतयोः सेने । अजूतां पार्श्वयोर्द्वयोः ॥ ४६ ॥ स्मरतापातुरापश्य—त्तदा नं-

For Private and Personal Use Only

दस्य नंदिनी ॥ चंद्रगुप्तं चकोरीव । चंद्रमुन्निद्रलोचना ॥ ४७ ॥ स्वप्रत्नाजंजने सूर्य । इव मौर्यं नवोदये ॥ उन्मुखी साजवद् दृष्ट्या । नंदस्येंदोरिवाब्जिनी ॥ ४८ ॥ आः पापे कृतसंतापे । मम रज्यसि वैरिणि ॥ तद्याहि याहि राज्यश्री-रिवानु त्वमपि श्रय ॥ ४९ ॥ एवं सा प्रीणिता रोष—रुद्धयापि पितुर्गिरा ॥ अपास्य स्वं रथं लीला—गतिश्चांद्रं रथं ययौ ॥५०॥ तस्याश्चांद्ररथारोहे । जग्नाश्चकारका नव ॥ यद्वा जूनूद्रजुवो जारो । दारुजैः किमु सह्यते ॥ ॥५१ ॥ विचार्यारिकजंगेना-शकुनं तां निवारयन् ॥ चंद्रो मतिमतां सीमा-जाणि चाणिक्यमंत्रिणा ॥ ५२ ॥ वत्स श्रियमिवायांती-मेतां किमु निषेधसि ॥ वंश्यास्तव जविष्यंति । नूनं जग्नारका नव ॥ ५३ ॥ अथारोप्य रथं मौर्य-स्तां विवेशोदयी पुरे ॥ निःप्रजीकृत्य नंदेंदुं व्योमनीव दिवाकरः ॥ ५४ ॥ नंद पूर्णप्रतिज्ञेन । शिखेयं मुच्यते मया ॥ इति चाणिक्यवाक्तस्य । दुःखावासे ध्वजायत ॥ ५५ ॥ सद्भूजंगं खलैः सद्भि-र्नीचैर्वैकं च वैरिजिः ॥ वीक्षितैः प्राचलन्नंदो । वर्षांत इव वारिदः ॥ ५६ ॥ प्रविष्टावथ तच्चंद्र—पर्वतौ नगरं रयात् ॥ धीरयंतौ प्रजा राज्य—परावर्तेन पिंजलाः ॥ ५७ ॥ रत्नै रत्नाकरप्रायं । स्वर्णैः स्वर्णाचलोपमं

॥ वैपुल्येन नभःकल्पं । प्रापतुर्नंदमंदिरं ॥ ५८ ॥ युग्मं ॥ तत्र नंदस्य राज्याधि—देवतामिव देहिनीं ॥ वित्रस्तहरिणीनेत्रां । कन्यां ददृशतुः पुरः ॥ ५९ ॥ विषकन्येति चाणिक्य–स्तां विनिश्चित्य लक्षणैः ॥ तत्रानुरागिणं चंद्र—गुप्तमेव न्यवारयत् ॥ ६० ॥ वत्सैका तत्र कन्यान्न—मस्मिन्नूर्जोऽनवान् नृशं ॥ इयं च पर्वतस्य स्ता—दर्धराज्यविभागिनः ॥ ६१ ॥ तदैवोद्वाहयामास । चाणिक्यः पर्वतेन तां ॥ ठेकाः कूटप्रयोगे हि । कालक्षेपं न कुर्वते ॥ ६२ ॥ तस्याः पर्वतकः प्राप । संस्पर्शमशनेरिव ॥ यावत्तावत् श्लथीभूत–संधानो व्यलुठद्भुवि ॥ ६३ ॥ तात चाणिक्य हा भ्रात—श्चंद्रगुप्त म्रिये म्रिये ॥ रक्ष रक्षेति दुःखार्ते । बाढं क्रंदति पर्वते ॥ ॥ ६४ ॥ आतितासुः ऋजुश्चंद्र—गुप्तस्तस्य प्रतिक्रियां ॥ चाणिक्येनेति जगदे । रहः पुंरुद्बुद्धिना ॥ ६५ ॥ युग्मं ॥ राजनीतिं न जानासि । वत्स स्वन्नमते शृणु ॥ अर्धराज्यहरं नृत्यं । यो न हन्यात्स हन्यते ॥ ६६ ॥ तायंते हंत यं हंतु—मुपाया भूरिशो नृपैः ॥ सोऽर्धराज्यहरो व्याधिः । स्वयं शाम्यन् मुदेऽस्तु मे ॥ ६७ ॥ विलंबं विदधेऽलीको—पक्रमैः सचिवस्ततः ॥ अचिरान्मुमुचे प्राणै–र्विलपन्नेव पर्वतः ॥ ६८ ॥ राज्ये जज्ञे भुनक्तिस्म। चंद्रगुप्तो म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हीपतिः ॥ चाणिक्यश्चाजवन्मंत्री । धिया धर्षितवाक्पतिः ॥ ६९ ॥ चंद्रे राजनि चाणिक्ये । व्यापारिणि च चक्रिरे ॥ स्वामिवैरात्पुरे चौर्यं । नंदभृत्याः सुदुर्धराः ॥ ७० ॥ कर्तुकामस्त-लारक्षं । चौररक्षाक्षमं नवं ॥ कृतवेषांतरोऽभ्राम्य—च्चाणिक्यः सकलं पुरं ॥ ७१ ॥ जगाम नलदामाख्य—कुविंदस्य स मंदिरं ॥ तदा च दष्टो मत्कोटै—स्तत्सुतः पितुरूचिवान् ॥ ७२ ॥ वानं मुक्त्वा स निस्तृंशो । मत्कोटबिलमातलं ॥ खनित्वा वह्निदानेना—धाक्षीत्तानखिला-नपि ॥ ७३ ॥ तलारक्षत्वयोग्योऽय—मिति निश्चित्य धीनिधिः ॥ चाणिक्यो दत्तसंमानं । तं चक्रे दंडपाशिकं ॥ ७४ ॥ जाते मयि तलारक्षे । कः पराजवितात्र वः ॥ तन्मुष्णीत पुरं स्वैरं । स जगौ तस्करानिति ॥ ७५ ॥ विश्रंजाज्जृंजमाणांस्ता—न्निजधाम्नीव पत्तने ॥ न-लदामोऽखिलान् जोक्तुं । जक्तिमानन्यदाह्वयत् ॥ ७६ ॥ ज्वलनं सर्वतो दत्वा । विधातुं चौ-र्यशांतिकं ॥ अश्वतः सकुटुंबांस्तान् । मंत्रपूर्वं जुहाव सः ॥ ७७ ॥ संजातेऽथ पुरस्वास्थ्ये । चा-णिक्योऽस्मरदन्यदा ॥ यथा ग्रामेऽहमेकत्र । प्राप्निक्षामपि नाप्नुवं ॥७८॥ क्षुद्रलेखं ततस्तत्र । स प्रैषीद्भो जना इह ॥ ये चूताः संति तांश्छित्वा । वंशानां क्रियतां वृतिः ॥ ७९ ॥ ग्राम्यै

रचिंति लेखोऽयं । विस्मृत्यालेखि मंत्रिणा ॥ न ह्याम्रवनमुच्छिद्य । रक्ष्यंते क्वापि वेणवः ॥८०॥
ध्यात्वेति चक्रे चूतानां । वंशानुच्छिद्य तैर्वृतिः ॥ तस्मादाज्ञाविपर्यासा–च्चुकोप चणिनंदनः
॥ ८१ ॥ वंशोच्छेदफलं तेषां । वंशच्छेदं व्यधत्त सः ॥ बद्धद्वारेऽखिलग्रामे । वह्निदानेन निर्दयः
॥ ८२ ॥ सोऽथ मानी समानीय । निजां जायामवोचत ॥ तवैव हेतोरेतावत् । प्रियेऽहमु-
पचक्रमे ॥८३॥ एभिर्धनैर्घनैस्तास्ताः । पराभवदवव्यथाः ॥ क्षपयंती कुरंगाक्षि । वल्ली वफलि-
नी भव ॥ ८४ ॥ मयासौ दुःस्थपत्नीति । पुत्री यत्पर्यभूयत ॥ तदागः क्षम्यतामेवं । श्वशुरोऽ
भ्येत्य तं जगौ ॥८५॥ श्वशुरस्यापरेषां च । बंधूनां स ददौ मुदा ॥ ग्रामदेशादिकं रोष–तो-
षौ ह्यस्य न निष्फलौ ॥ ८६ ॥ कदाचन विहारेण । पुनानाः पृथिवीतलं ॥ तत्रैयुर्यतिव्राता
—न्विता विजयसूरयः ॥ ८७ ॥ जानंतोऽतिशयज्ञानात् । दुर्भिक्षं भावि तत्र ते ॥ स्थापयि-
त्वा नवं सूरिं । गणं तस्मिन्निचिक्षिपुः ॥ ८८ ॥ गुरवस्तस्य निःशेषा । योगसिद्धीर्ददुर्निशि ॥
संघकार्ये महत्येताः । प्रयोज्या इति भाषिणः ॥ ८९ ॥ तदेकमांजनं योगं । क्षुल्लकौ द्वौ र-
हः स्थितौ ॥ आदिषातां घनवृष्टौ । वार्लवं चातकाविव ॥ ९० ॥ घनागमो गुरुः प्रैषीत् । सु-

जिह्वं मंगलंप्रति ॥ साधुपक्षयुजं सूरिं । मानसंप्रति हंसवत् ॥ ९१ ॥ क्षीणजंघाबलत्वेन । तस्थौ तत्रैव स स्वयं ॥ पूरयन् पाटकावृत्त्या । नवकल्पानकैतवः ॥ ९२ ॥ क्षुल्लकौ तौ गुरुस्नेहा—त्पुनर्व्याघुट्य मार्गतः ॥ आगतौ पाटलीपुत्रं । ववंदाते गुरोः क्रमौ ॥ ९३ ॥

गुरुस्तौ बोधयामास । वत्सौ पश्चात्किमागतौ ॥ वीक्षे स्वस्यापि निर्वाह—मत्राहमतिदुष्करं ॥९४॥ दुर्भिक्षेऽत्र युवां बालौ । सोमालौ स्थास्यथः कथं ॥ कियद्भिः पल्वले तुच्छ—जले नंदंति पूतराः ॥ ९५ ॥ तावुचतुर्विना युष्मा—न्न नौ क्वचन निर्वृतिः ॥ यच्छाव्यं तच्छवत्वत्र । पूज्यपादांतिकस्थयोः ॥९६॥ तयोरिति स्नेहकिरा । गिरा छिन्नमना मनाक् ॥ स्वांतिके स्थापयामास । गुरुस्तौ जातगौरवः ॥ ९७ ॥ काले करालरूपेण । दुःकालेन व्यजृंभत ॥ कर्णोर्मणीयितं यत्र । मणिच्छिन्नोपलायितं ॥ ९८ ॥ केचिन्नरान् केऽपि धेनूः । स्वोदरे यत्र चिक्षिपुः ॥ तद्वाष्पपूर्यमाणेऽस्मि—न्नसिधेनूश्च केचन ॥ ९९ ॥ मेघैर्मोघोदयैर्येन । राज्ञां राज्यानि तुत्रुटुः ॥ राज्यं प्रेतपतेरेव । केवलं ववृधे तदा ॥ २०० ॥ न कश्चिदर्थिनां यत्र । दक्षिणाशामपूरयत् ॥ सा प्रत्युत विपेदाने—स्ततस्तैरेव पूरिता ॥ १ ॥ प्रक्षीणं विषयग्रामैः

उप० क्षितितले पंकेन नोन्मीलितं । जातं नित्यघनागमार्थिभिरनारंभैश्चिरं कर्षकैः ॥ व्युत्सृष्टा तन-
यादिकेऽपि ममता लोकैस्तपः सेवितं । दुर्भिक्षस्य गुरोः प्रबोधपटुता सार्वत्रिकी काचन ॥२॥
चिंता० उद्दीप्यतेस्म या पूर्व—मौषधैर्विविधैस्तदा ॥ दीप्तायाः स्वयमेवास्या । नाभूद्भांत्यौषधं क्षुधः ॥
१९४ ॥ ३ ॥ यत्किंचिद्भेजिरे भैक्ष्यं । गौरव्यं गुरवस्तदा ॥ अपत्यप्रणयान्नित्यं । तत्तयोः क्षुल्लयोर्ददुः
॥ ४ ॥ ताभ्यामचिंतयत्पूज्या । वृद्धा देहं हि वार्धकं ॥ अशुश्रुषं पतत्येव । पुराणमिव मं-
दिरं ॥ ५ ॥ सारं ददति नौ भिक्षं । सीदंति गुरव स्वयं ॥ दुर्भिक्षाब्धिरयं तार्य— स्तत्क-
या बुद्धिवेलया ॥ ६ ॥ हुं ज्ञातमांजनो योगः । सम्यक्परिचितोऽस्ति नौ ॥ तेनादृश्यतनू
भूत्वा—न्यतो भोक्ष्यावहे क्वचित् ॥ ७ ॥ तावथांजनमासूत्र्य । तेनादृश्यौ दिने दिने ॥ भुंजा-
नेन समं राज्ञा । भुंजातेस्म सविस्मयं ॥ ८ ॥ एककुक्षिंभरौ भक्ते । जनत्रितयभोजनात् ॥ क्षा-
मीबभूव भूपाल—स्त्रपया न जगौ पुनः ॥ ९ ॥ नृपं कदापि चाणिक्यो—ऽपृच्छद्वत्स
कृशोऽसि किं ॥ किं तवाप्यस्ति दुर्भिक्षं । किं वा चिंता च काचन ॥ १० ॥ भूमानवददद्यश्वो
। भुंजे प्राक्तनमात्रया ॥ परमध्रात एवाहं । तातोत्तिष्ठामि नित्यशः ॥ ११ ॥ मंत्री दध्यौ ध्रुवं

सिद्धः । कोऽप्यदृश्योंजनादिना ॥ दुर्भिक्षेऽत्र हरत्यस्या–हारं हा रंकवत् क्षुधा ॥ १२ ॥ नोज-
नावसरेऽन्येद्यु–र्नृपभुजे नोजनौकसि ॥ श्लक्ष्णीकृतेष्टिकाचूर्णं । क्षेपयामास सोऽजितः ॥१३॥
सरसाहारलोनेन । प्राग्वदायातयोस्तयोः ॥ प्रेक्षांचक्रे पदश्रेणिं । स तत्र प्रतिबिंबितां ॥१४॥
निश्चित्यांजनसिद्धौ तौ । मंत्री धूम्रमकारयत् ॥ बाष्पायेतेस्म तन्नेत्रे । धूमध्यामलिते रयात् ॥
॥ १५ ॥ धौतेंजनेऽश्रुपूरेण । चाणिक्यस्तावलोकत ॥ क्षुल्लावुनयतो नूमी–नुजं सत्वरनोजि-
नौ ॥ १६ ॥ गुरुणा मोदितौ यत्ना–च्चाणिक्येन च रोदितौ ॥ तौ जग्मतुर्गुरूपांतं । लज्जितौ
नृपमंदिरात् ॥ १७ ॥ ही व्रतिन्यां सह न्याद–मिति शूकां दधन्नृपः ॥ मान्नूब्रासनहीले-
ति । चाणिक्येनान्वशिष्यते ॥ १८ ॥ वत्स किं दूयसे नूयान् । नवतो नवितोदयः ॥ एतत्ते
शकुनं साधु । साधुन्यां सह नोजिनः ॥ १९ ॥ एतौ नूपाल बालर्षी । कुमारब्रह्मचारिणौ ॥
॥ आस्थाप्येकत्र दुःप्रापा । द्वान्यां किमुत नोजनं ॥ २० ॥ तत्त्वमेव पवित्रोऽसि । महांश्च म-
हतामपि ॥ एवमालप्य नूपाल–मुपालब्ध गुरून् च सः ॥ २१ ॥ बालो न दीक्षते पूज्या
। दीक्षते वा सुशिक्ष्यते ॥ दुःशिक्षितौ नवच्छिष्या–वपि येनेदृशक्रियौ ॥ २२ ॥ यद्यल्पवय-

सोरेतां । दडुः श्रीगुरवः कलां ॥ तन्मन्ये बालकस्नेहो । गीतार्थैरपि दुस्त्यजः ॥ २३ ॥ गुरु-
र्लब्धावसरोऽवक् । समृद्धे श्रावके त्वयि ॥ यद्यत्कुर्वंति नः शिष्या–श्चाणिक्य स्वल्पमेव तत्
॥ २४ ॥ अल्पाहारौ शिशू एता– वेवं निर्वहतो यदि ॥ न ते किमियता दान–कीर्तिर्निन-
र्तिनूतसे ॥ २५ ॥ इह त्वां श्रावकं वीक्ष्य । दानकल्पद्रुमायितं ॥ प्राहैष्म प्रथमं दूरे । गर्ज-
दुर्भिक्षसंजवे ॥ २६ ॥ दौःस्थ्यं क्षुल्लकयोर्वीक्ष्य । स्वकार्पण्यान्न लज्जसे ॥ कुरुषे प्रत्युताक्षेप–म-
हो तेऽमात्य धृष्टता ॥ २७ ॥ यद्वा श्राद्धचतुर्भंग्या । अंत्यो जंगः फलेत्कथं ॥ कृपणैर्निपुणैः
शिक्षा–क्षणे युष्मादृशैर्विना ॥ २८ ॥ गुरूनर्चंति संपत्तौ । ये ते न प्रचुरा नराः ॥ पश्य पू-
र्णेन शशिना । प्रजाजंगो गुरोः कृतः ॥ २९ ॥ त्वं योग्योऽसीति चाणिक्य । स्वाक्षेपमुपदिश्य-
ते ॥ वर्ण्यं सुवर्णमेव स्यात् । घनाघातैर्न पित्तला ॥ ३० ॥ शिष्यावपि गुरुः प्रोचे । युवाभ्यां
किमिदं कृतं ॥ जवंति साधवः सत्त्वा–जरणा मरणावधिः ॥ ३१ ॥ चूर्णजक्तं राजजक्तं । नि-
षद्या गृहिजाजनं ॥ अंतरायं च पंचामी । दोषाः किं नात्र वां स्मृताः ॥ ३२ ॥ स्वापराधं त-
तः शिष्यौ । नत्वाचिक्षमतां गुरून् ॥ मिथ्यादुष्कृतमाधत्ता–मपुनष्करणेन च ॥ ३३ ॥ चा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णिक्योऽपि गुरून्नत्वा । प्रोचे पूज्यैः समुध्धृतः ॥ पतन्नहं प्रमादांधौ । साधुशिक्षावरत्रया ॥
॥ ३४ ॥ स्फुटमुक्ता गुणाधाराः । सारश्रीनायकाश्च वः ॥ न व्याहारा अमी किंतु । नव्या
हाराः सतां हृदि ॥ ३५ ॥ तत्क्रमध्वं न यच्चक्रे । साधुचिंता मया पुरा ॥ अथ प्रासुकभक्ता-
द्यै—रनुग्राह्यो जनो ह्ययं ॥ ३६ ॥ पीतामृत इव प्रीतो । धाम स्वमगमत्ततः ॥ भक्तपानादि-
कं भक्तः । साधुभ्यः स सदाप्यदात् ॥ ३७ ॥ नृपः कदापि मिथ्यात्वं । ययौ पाखंडिनां गिरा
॥ स हि स्वभावो जीवानां । नीचैर्गतिरिवांभसां ॥ ३८ ॥ ततोऽस्य तातदेशीयो । जिनधर्मै-
कलालसः ॥ चाणिक्यः स्माह वत्सैषु । किं पाखंडिषु रज्यसि ॥ ३९ ॥ अमी भ्रांतवदुन्मार्गा
। हिमवज्जडिमालयाः ॥ कुशीला हलवत्कूट—बहुलाः शैलवत्पुनः ॥ ४० ॥ मेयैषां ज्ञायते
वृत्तं । त्वमपि ज्ञापयिष्यसे ॥ इत्युक्त्वा भूपतेर्धर्मं । वक्तुं तानाजुहाव सः ॥ ४१ ॥ समुदा-
येन तानेतान् । प्राक्षिप्तोज्ज्वलवालुके ॥ उपांतःपुरमेकांत—स्थाने स्थापयतिस्म सः ॥४२॥
अभ्यर्णवर्तिभूपाल—भामिनीभूषणक्वणैः ॥ तच्चित्तकोणे चेतोभू—श्चिरसुप्तोऽप्यजागरीत् ॥
॥ ४३ ॥ संभूय विवशात्मानः । सर्वे ते जालकाध्वना ॥ आभूपागममैक्षंतां—तःपुरीः पामरा

For Private and Personal Use Only

उप० इव ॥ ४४ ॥ उपस्थिते नृपे बद्ध—बकध्याना दृढासनाः ॥ स्वं स्वं धर्मं निवेद्योच्चै—रगमं-
स्ते यथागतं ॥ ४५ ॥ उवाच सचिवो वत्स । पश्यैताः पदपंक्तयः ॥ त्वदंतःपुरिकालोका—
चिंता० ल्लुंजंत्येषां सरागतां ॥ ४६ ॥ वालुकां तां समीकृत्य । तेन जैनमुनीश्वराः ॥ आकारिता द्वि-
१७८ तीयेऽह्नि । तत्रैव विनिवेशिताः ॥ ४७ ॥ सिद्धांते तेऽनिशं लीनाः । शुद्धांते न मनो दधुः ॥
आयातस्तस्य च नूजर्तु—रार्हतं धर्ममूचिरे ॥ ४८ ॥ गतेषु तेषु चाणिक्य—श्चंद्रगुप्तमजापत
पश्यैतां वत्स साधूनां । पदपंक्तिर्न वीक्ष्यते ॥ ४९ ॥ अमीनिरैक्षत क्षोणं । न तव स्ववशेंद्रियैः
आत्मारामा ह्यमी रामा । गणयंति तृणोपमाः ॥ ५० ॥ कः काचं सति सद्रत्ने । कश्छागं स-
ति सिंधुरे ॥ कः शमीं सति कल्पद्रौ । कः पल्लीं सति पत्तने ॥ ५१ ॥ को दास्यं सति सा-
म्राज्ये । कः पंकं सति चंदने ॥ को मिथ्याशासनं जैने । शासने सति सेवते ॥ ५२ ॥ युग्मं ॥
ततो नूमान् सनिर्वेदः । स व्यलीकेषु लिंगिषु ॥ लाक्षाराग इवोर्णायौ । स्थिरोऽनुजिनशास-
ने ॥ ५३ ॥ निशीव पद्मकोशोऽनू—त्कोशो नूमिभुजोऽन्यदा ॥ निःश्रीकः श्रीकरीबुद्धिं । चा-
णिक्योऽथ व्यचिंतयत् ॥ ५४ ॥ इभ्यानाहूय वास्तव्यान् । नक्त्या नोजयतिस्म सः ॥ आ-

मिषं धीवराणां ही। मुखमन्यवशीकृतेः ॥ ५५ ॥ आविःकुर्वंत्यमी मत्ताः। स्वसत्तामिति चिं-
तयन् ॥ मैरेयं पाययित्वा तां—श्चाणिक्यः प्रोचिवानिति ॥ ५६ ॥ त्रिदंडं द्वे च काषाये।
वस्त्रे कांचनकुंडिका ॥ नित्यं नृपोऽस्ति मे वश्यो। जंजां वादयतात्र जोः ॥ ५७ ॥ तत् श्रुत्वा
गर्वमूर्छालाः। सर्वे हालाबलाज्जगुः ॥ किं रे दृप्यसि जिह्वाक। शृण्वस्माकमहो धनं ॥ ५८ ॥
सहस्रं योजनानीत्र—पतेर्यातः पदे पदे ॥ दीनारलक्षं मुंचामि। जंजां वादयतात्र जोः ॥५ए॥
तिलाढकस्य सद्वृष्ट्या। निष्पन्नस्य तिले तिले ॥ दीनारलक्षं मुंचामि। जंजां वादयतात्र
जोः ॥ ६० ॥ एकाहश्रद्धर्णैर्बध्वा। सेतुः प्रावृड्गरोद्भवं ॥ वालयामि सरित्पूरं। जंजां वाद-
यतात्र जोः ॥ ६१ ॥ एकाहजातजात्याश्व—किशोरस्कंधकुंतलैः ॥ करोमि मंरूपं व्योम्नि।
जंजां वादयतात्र जोः ॥ ६२ ॥ शालिप्रसूतिगर्दभ्यौ। सदा क्षेत्रे उभे मम ॥ बिन्नबिन्नप्ररू-
ढे स्तो। जंजां वादयतात्र जोः ॥ ६३ ॥ शुक्लवासाः ससौरभ्यो। नक्तनार्यं रुणोक्षितः ॥ सा-
हस्रिकोऽप्रवास्यस्मि। जंजां वादयतात्रजोः ॥ ६४ ॥ इति तेषां क्रमेणोक्तं। चाणिक्यश्चीर-
केऽलिखत् ॥ दृषल्लेखेव लिखितं। न विपर्येति जातुचित् ॥ ६५ ॥ व्यावृत्तचेतनांस्तान् स।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथोचितमयाचत ॥ परं पुष्पमिवादुन्वन् । स्वार्थकृद्भृंगवद्बुधः ॥ ६६ ॥ एकयोजनगामी-
न—पदमित्यादिमो धनं ॥ द्वैतीयिकः पुनश्चैक—तिलोद्भवतिलैर्मितं ॥ ६७ ॥ एकाह्नप्रसूणं
चान्य—स्तुर्यश्चैकाह्निकान् हयान् ॥ पंचमो मासिकं धान्यं । ददे चैतेषु मंत्रिणः ॥ ६८ ॥
अरुणो वारुणीयोगा—त्सर्वथा विवसुर्भवेत् ॥ त्रुटिताःस्मो वयं स्तोका—दिति ते दध्युरुन्मदाः
॥ ६९ ॥ एवं कोशं कुशूलं च । धनैर्धान्यैश्चमूं हयैः ॥ नृपस्यापूर्य चाणिक्यः । स्वं कृतार्थम-
मन्यत ॥ ७० ॥ काले कृशेषु कोशेषु । पुनर्जातेषु नृभुजः ॥ उपायांतरमासूत्र्य । मंत्रीभ्या-
नाह्वयत्तदा ॥ ७१ ॥ बभूवुर्दैवता दौःस्थ्य—नाशकास्तस्य पाशकाः ॥ तानुपादाय दायज्ञः । स म-
हेभ्यानरीरमत् ॥ ७२ ॥ पुरतः प्रस्फुरद्रत्न—जालं स्थालं विमुच्य सः ॥ उवाचेदं स गृह्णातु
। यो जयत्येकदापि मां ॥ ७३ ॥ जयामि यमहं तेन । देयो दीनार एव मे ॥ ततो लोभा-
ददीव्यंस्ते । न पुनस्तं विजिग्यिरे ॥ ७४ ॥ प्रतिदायमुपादाय । तेभ्यो दीनारमेव सः ॥ ब-
भार श्रीगृहं किं न । बिंदुभिर्भ्रियते सरः ॥ ७५ ॥ आस्तेषु दिव्येष्वपि पाशकेषु । जीयेत मं-
त्री धनिभिः कदापि ॥ विरुद्धधर्मा न पुनर्मनुष्यो । भवाच्च्युतो मानुषतां लभेत ॥ ७६ ॥ इ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति द्वितीयपाशकदृष्टांतः ॥

॥ अथ अन्नराशिदृष्टांतः प्रारभ्यते ॥

सर्वत्र भारते वर्षे । वर्षेनादस्य भूयसि ॥ जायंते यानि धान्यानि । संमान्यानिखयोगतः ॥ १ ॥ तान्येकत्र सुरो राशी—कृत्य कुर्यात्तथा शिखां ॥ यथोपरि चरन्बिंदुः । क्षणं रजतकुंभति ॥ २ ॥ तत्रैकः सर्षपप्रस्थः । क्षिप्त्वा मिश्रीकृतस्तथा ॥ यथाभूद् दुर्लभः सर्व—पूर्वगुणैकमंत्रवत् ॥ ३ ॥ वयसः परिपाकेन । धनुर्यष्टिरिवानता ॥ वाताधिक्येन वल्लीव । प्रचलत्पाणिपल्लवा ॥ ४ ॥ रोमभिः पलितैः शुष्क—तृणभूमिविडंबिनी ॥ निर्दंतास्यतुलारूढ—निष्कुलीकृतदाडिमा ॥ ५ ॥ अमावासी कृताशेष—तिथिर्नेत्रबलं विना ॥ आसन्नमृत्युरायासी—जरती तत्र काचन ॥ ६ ॥ त्रिभिर्विशेषकं ॥ अनात्मज्ञा दुढौके सा । सूर्पमादाय कौतुकात् ॥ विभज्य सर्षपान् सर्वान् । प्रस्थं पूरयितुं पुनः ॥ ७ ॥ कदापि सूर्पेण विविच्य धान्य—राशेर्जरत्याशु कदंबकैस्तैः ॥ प्रस्थं तथा सा जरती न भूयः । प्राप्नोत्यपुण्यो मनुजो नृजन्म ॥ ८ ॥ इति तृतीयदृष्टांतः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ चतुर्थद्यूतदृष्टांतः—अस्ति रत्नपुरं नाम । पुरं रत्नाकरश्रियं ॥ यदद्भुतैर्नरै रत्नै—रिव शृंगायते जगत् ॥ १ ॥ राजा शतायुधस्तत्र । नलीनः कुलिशायुधः ॥ यस्य कस्य न चित्राय। महिमा दानवर्धितः ॥ २ ॥ सुधर्मागर्वसर्वस्व-मुछेत्तुमिव निर्मितं ॥ अनन्यसममास्थान—मासीत्तस्य नरेशितुः ॥ ३ ॥ यत्रोल्लोचस्थमुक्तास्रक्-प्रतिबिंबितभूतले ॥ किमधोऽप्यस्त्युडूचक्र-मिति संदिदिहे जनैः ॥ ४ ॥ यत्र स्फुरन्मणिघृणि-स्तोमापास्ततमस्ततौ ॥ क्रियते मंगलायैव । प्रदीपा रजनीमुखे ॥ ५ ॥ यौवराज्यं ददौ यूने । सूनवे नयविन्नृपः ॥ न चैष तावतातृप्य—ल्लोभो लाभे हि वर्धते ॥ ६ ॥ हत्वापि पितरं स्वस्य । राज्यश्रियमियेष सः ॥ धिग्राज्यं येन दुर्मित्रे—णेव दुर्बुद्धिरेधते ॥ ७ ॥ एतद्विवेद सर्वत्र । संचरच्चरलोचनः ॥ मंत्री कुमारदुर्वृत्तं । रहो राज्ञो जगाद च ॥ ८ ॥ अजानन्निव भूजानि—रन्यदा तनयं जगौ ॥ परिश्रांता वयं वत्स । धृत्वा राज्यधुरां चिरं ॥ ९ ॥ निधित्सामस्त्वयि ज्येष्टे। नंदने राज्यमेकतः ॥ अन्यतः कुलमर्यादां । परित्यक्तुं न शक्नुमः ॥ १० ॥ का तात कुलमर्यादा । पृष्टे तेनेति साग्रहं ॥ भूपोऽव्यधात्कुलेऽस्माकं । राज्यं द्यूतेन लभ्यते ॥ ११ ॥ अष्टोत्तरशतं स्तंभा

For Private and Personal Use Only

। जूंभमाणमणित्विषः ॥ आस्थानेऽत्र प्रतिस्तंभं । संत्यष्टशतमश्रयः ॥ १२ ॥ अदैर्दीव्यन् मया साकं । त्वमाकंपविमुक्तधीः ॥ जयमासादयन्नश्रि– मेकां स्तंभस्य जेष्यसि ॥ १३ ॥ पुनर्द्यूते जयन्नश्रिं । द्वितीयां च विजेष्यसे ॥ स्तंभस्यैकस्य निःशेषा । जेतव्या एवमश्रयः ॥१४॥ एवमेव क्रमाज्ज्ञेयाः । शेषस्तंभाखिलाश्रयः ॥ यद्येकदापि स्खलति । तद् द्यूतं याति मूलतः ॥ १५ ॥ ततः स द्यूतनिष्णात–स्तातघातनिवृत्तधीः ॥ प्रयासाज्जीरुरारेभे । रंतुं राज्याय भूभुजा ॥ १६ ॥ कदाप्यसावस्खलितं विजित्य । स्तंभानशेषानपि लाति राज्यं । अपुण्यनैपुण्यमना न भूयः । प्राप्नोति मानुष्यमहो मनुष्यः ॥ १७ ॥ इति चतुर्थद्यूतदृष्टांतः. ॥

अथ पंचमरत्नदृष्टांतः प्रारभ्यते— रुद्धं धनसमृद्धाख्य–मस्ति ख्यातं क्षितौ पुरं ॥ यस्य स्थिरस्य संसर्गा–दिव श्रीश्चापलं जहौ ॥ १ ॥ तत्राभूद्धनदः श्रेष्टी। यो नानारत्नसंग्रहात् ॥ रत्नाकर इति ख्याति—मुदधेर्विदधे वृथा ॥ २ ॥ यद्यद्ददर्श शुश्राव । रत्नं क्वापि स कौतुकी ॥ तत्तत्संजगृहे दीप्ति—पात्रं शास्त्रं सुधीरिव ॥ ३ ॥ ग्राहं ग्राहं स रत्नानि । स्वमंदिरमपूरयत् ॥ इच्छुर्मनीषितं मूल्यं । व्यक्रीणीत न किंचन ॥ ४ ॥ कोटिध्वजौकःकोटीषु । प-

ताकाः कोटिसंख्यया ॥ वेल्लंतीव्योम्नि वल्लीव । तत्पुत्रा आलुलोकिरे ॥ ५ ॥ दध्यिवांसश्च
चेत्तात—स्तनुते रत्नविक्रयं ॥ तदस्माकमपि द्रव्य—कोटयः स्युः सुदुर्घटाः ॥ ६ ॥ चलाचलां-
चलान् पश्चा—दुत्तन्नीमो ध्वजान्वयं ॥ नीरसैर्जरवस्पर्शै । रत्नैर्बंदीकृतैर्हि किं ॥ ७ ॥ यया छि-
षो न ढूयंते । प्रीयंते न च बांधवाः ॥ घटदीपिकयेवालं । बुध्ध्या ऋध्ध्या च नस्तया ॥ ८ ॥
यदि क्वचित्पिता याति । नुन्नोऽस्माकं मनोरथैः ॥ तद्रत्नविक्रयात्कोटि—ध्वजनाम लनामहे ॥
॥ ९ ॥ एवं विमृशतां तेषां । धनदो धनदोहदी ॥ ययौ देशांतरं न श्री—रस्ति दुस्त्यजस-
द्मनां ॥ १० ॥ विना सवित्रा पुत्रास्ते । तारावछिजजृंजिरे ॥ आविश्चकुश्चिरत्नानि । रत्ना-
न्यापणवीथिषु ॥ ११ ॥ ययाचे यो यथा रत्नं । मूल्येनाल्पेन जूयसा ॥ विक्रीय तत्तथा द्र-
व्य—मेव संजगृहुश्च ते ॥ १२ ॥ विदेश्या रत्नलाजात्ते । हृष्टा देशांतराण्यगुः ॥ व्यधुश्च श्रे-
ष्ठिनः पुत्रा । ध्वजारोपं स्ववेश्मनि ॥ १३ ॥ रत्नव्ययादवासेषु । तेषु कोटिध्वजाभिधां ॥ ध-
नार्जनोर्जितः श्रेष्ठी । निन्ये स्लोकः सनाथतां ॥ १४ ॥ वीचीयितं मरुध्धूतै—र्यैः पुत्रानंदवा-
रिधेः ॥ श्रेष्ठिनः शीर्षशूलाय । तैश्चपेटायितं ध्वजैः ॥ १५ ॥ रत्नविक्रयवर्धिष्णु—क्रोधलोहि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तल्लोचनः ॥ श्रेष्ठी यष्टिनिराहत्या—दिदेश तनयानिति ॥ १६ ॥ रे लक्ष्मीकंदकुद्दाला। बाला व्याला इवोन्मदाः ॥ गुरुगौरवगौरांशु—राहवः कामबाहवः ॥ १७ ॥ रत्नानि तान्यशेषाणि। दिशः सर्वा भ्रमन् भ्रमन् ॥ आहृत्य वेश्म विशत। सुचिरेणापि नान्यथा ॥ १८ ॥ एवं निर्वासिताः पित्रा। पुत्रास्ते रत्नलिप्सवः ॥ भ्रेमुर्भृशं भुवं रंका। इव भोगोचिता अपि ॥ १९ ॥ भ्रांत्वा चतस्रोऽपि दिशो लभेरन्। तान्येव रत्नान्यखिलानि तेऽपि ॥ अकृतधर्मा न पुनर्मनुष्य—भवाच्च्युतो मानुषतां कदापि ॥ २० ॥ इति पंचमदृष्टांतः. ॥

अथ स्वप्ने चंद्रपानदृष्टांतः—नगरं पाटलीपुत्र—मस्ति गौरुविभूषणं ॥ यत्र मांगल्यदीपंति। सौधोर्ध्वे निशि तारकाः ॥ १ ॥ तत्र भूपोऽजवत्कंखो। दक्षिणावर्तशंखवत् ॥ समुज्ज्वलगुणः श्रीणां। कारणं वारिताशिवः ॥ २ ॥ तस्य प्रशस्यसौभाग्य—जयश्रीकुक्षिभूरभूत् ॥ ॥ पुत्रश्चित्रकलामूलं। मूलदेव इति श्रुतः ॥ ३ ॥ ह्रींकार इव निःशेष—मायाबीजं महामतिः ॥ आद्यो रूपवतां लीला—वतां योऽजनि यौवने ॥ ४ ॥ सरलक्रूरसच्चौर—पौरपामरपर्षदि ॥ सोऽमिलत्तादृशीभूय। वस्तुस्तोमे यथा जलं ॥ ५ ॥ स द्यूतव्यसनी स्तैन्यं। पुरस्यांतरकारयत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिव वर्धकिः ॥ १७ ॥ दास्या प्रोक्तेऽथ तद्वृत्ते । देवदत्तानुरागिणी ॥ स्वयं गत्वा चटुवृत्त्या त-
मानिन्ये निजमंदिरं ॥ १८ ॥ तयोरन्योन्यमालापे । जाते पीयूषपारणे ॥ वीणाकारशिरोरत्नं
। तत्रागात्कोऽपि गायकः ॥ १९ ॥ तद्वीणाक्वणितं श्रुत्वा । साधु साध्विति भाषिणी ॥ देव-
दत्ताधुनान्मौलिं । धूर्तः सोऽपि तथाकरोत् ॥२०॥ पृष्टस्तत्तया शिरःकंप-हेतुं धूर्ताधिपो जगौ ॥
अद्भुतं वीक्षमाणस्य । शिरः कस्य न कंपते ॥ २१ ॥ स्त्रियः सर्वत्र वीक्ष्यंते । सगर्भा न पु-
नः पुमान् ॥ अद्य त्वद्धाम्नि वीक्ष्येते । स्त्रीपुंसावपि गर्भितौ ॥ २२ ॥ स्त्रीवीणेयं सगर्भास्ति ।
पुमान् दंडोऽपि तादृशः ॥ इत्युक्त्वादर्शयत्तंत्र्यां । केशं दंडे च कर्करं ॥ २३ ॥ अथ तस्मै नि-
जां वीणां । प्रवीणार्पयतिस्म सा ॥ तयात्तया विरेजेऽसौ । पुंरूपेव सरस्वती ॥ २४ ॥ मूलदे-
वे स्वयं वीणा-वादके देवदत्तया ॥ ऐंद्रसदस्तदा मेने । निर्विश्वावसुतुंबरुः ॥ २५ ॥ तं वी-
णावादनाम्नायं । वीणाकारेऽथ याचति ॥ धूर्तराजोऽभ्यधाद्भद्र । नाहं जानामि किंचन ॥२६॥
आयुक्तः सर्वविद्यानां । वीणायाश्च विशेषतः ॥ विद्वान् विक्रमसेनोऽस्ति । पाटलीपुत्रपत्तने ॥
॥ २७ ॥ तच्छिष्यो मूलदेवोऽस्ति । सोऽहं तत्पारिपार्श्वकः ॥ तत्वं कलाया नो वेद्मि । कुरुचि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्व इवोदधेः ॥ २७ ॥ अत्रांतरे विश्वजूतौ ॥ रंगाचार्ये समागते ॥ सा प्रोचे नामुना तुल्यः ।
कोप्यन्यो जारते श्रुतः ॥ २९ ॥ मूलदेवोऽन्यधाब्बद्रे । येन त्वमपि शिक्षिता ॥ किं ब्रूमस्त-
स्य वैदुष्यं । तदपि ज्ञास्यतेऽथवा ॥ ३० ॥ कुब्जोऽयमित्यवज्ञाय । प्रारब्धे विश्वजूतिना ॥ वि-
चारे जारते सोवक् । पूर्वापरविरोधतां ॥ ३१ ॥ कस्त्वं कुब्ज विचारेऽस्मिन् । धनुर्वेद इवार्भकः
॥ विश्वजूतिर्वदन्नेवं । मूलदेवेन हक्कितः ॥ ३२ ॥ किं मंक्षयसि पांक्तित्यं । रंक्तापंक्तित रे म-
यि ॥ विजिमः किमु तालाजि-मेठपारापता वयं ॥ ३३ ॥ कथं कुर्मस्त्वया वादं । वयं सांप्रत-
मुत्सुकाः ॥ स्वं जाड्यमित्यपह्नुवन् । विश्वजूतिर्विनिर्ययौ ॥ ३४ ॥ दृष्ट्वा तत्पाटवं देव-दत्ता
चित्तानुरागिणी ॥ निपत्य पादयोर्मूल—देवमेवं व्यजिज्ञपत् ॥ ३५ ॥ जारती जरतो विश्वा-
वसुतुंबरुनारदाः ॥ प्रत्यक्षा अद्य सर्वेऽपि । त्वयि दृक्ष निरीक्षिते ॥ ३६ ॥ कुलरूपाकृतीर्वक्ति
। कलाकौशलमेव ते ॥ कुरुते कषरेखैव । विशेषं स्वर्णलोहयोः ॥ ३७ ॥ तथाप्याहृत्य रूपं स्वं
। मेघमुक्त इवोडुपः ॥ प्रिय पूरय मद्दृष्टि—चकोरीपारणस्पृहां ॥ ३८ ॥ तयेत्यभ्यर्थितो रू-
पं । स्वाजाविकमियाय सः ॥ अधिकादरदं तस्या—श्चत्प्रदीयेत चाटुभिः ॥ ३९ ॥ तं मूर्त-

मिव कंदर्पं । चक्षुष्पमिव जास्करं ॥ सचेतनमिव स्वर्णं । वीक्ष्य सापि विसिष्मिये ॥ ४० ॥
प्रीणयित्वाथ तं स्नान—जोजनाछादनादिना ॥ देवदत्तावदत्तोष—निचिता रचितांजलिः ॥
॥ ४१ ॥ न याचे जवतो जूषां । न च स्वर्णधनान्यपि ॥ एतत्तु याचे धामेदं । मां च मास्म
मुचः सदा ॥ ४२ ॥ सोऽप्यूचे मयि निर्द्रव्ये । वैदेश्ये चानुरागिणी ॥ गुणज्ञे गणिकाधर्म—
मर्म कस्मान्निकृंतसि ॥ ४३ ॥ सावदद्वाह्यवृत्त्यैव । राज्ये धनिषु धीधन ॥ मनः पुनः ममाज-
स्रं । विश्राम्यति कलावति ॥ ४४ ॥ कुमुदिन्या बहिःस्पर्शं । कुर्युर्वसुमतः कराः ॥ हृदयोद्घा-
टनस्तस्याः । पुनरिंदुः कलामयः ॥४५॥ विदेशो वा स्वदेशो वा । गुणिनां गणनेति का ॥ वि-
देशेष्वेव लब्धार्घा । हेममौक्तिकविद्रुमाः ॥ ४६ ॥ उमिति प्रतिपेदाने । मूलदेवेऽथ तद्वचः
॥ हेमदंमकरस्तत्र । राज्ञो द्वास्थः समाययौ ॥ ४७ ॥ आहूता नर्तितुं तेन । नृपधाम जगाम
सा ॥ ह्यथेवालक्ष्यरूपेण । मूलदेवेन संयुता ॥ ४८ ॥ कुशले वाद्यविद्यायां । तस्मिन् पटहवा-
दिनि ॥ सांद्रं गर्जति पर्जन्ये । मयूरीव ननर्त सा ॥ ४९ ॥ तुष्टस्तस्यै ददौ जूपः । प्रसादं
सापि वाणिनी ॥ समये प्रार्थयिष्येऽह—मिति न्यासीचकार तं ॥ ५० ॥ सा जगौ राजगौ-

रव्या । ततो गीतं श्रुतिप्रियं ॥ ददौ प्रमुदितस्तस्यै । स्वांगजूषां नरेश्वरः ॥ ५१ ॥ मधुमत्त-
पिकीकंठ—कुंठीकरणकारणं ॥ अगायन्मूलदेवोऽपि । वीणाक्वणितमिश्रितं ॥ ५२ ॥ सखंमा-
श्ररसास्वाद—मिवादाने महीपतौ ॥ सन्ना बन्नार तज्ज्ञान—विरामाशंकिनी शुचं ॥ ५३ ॥ प्रातः
कार्यवशात्तत्र । पाटलीपुत्रनूजुजः ॥ जुजमुत्तन्य विमल—सिंहो मंत्रीत्यवोचत ॥ ५४ ॥ इयं
गीतकला मूल—देव एवापरत्र न ॥ तन्नवेष स एवैष । विज्ञेयो नात्र संशयः ॥ ५५ ॥ अ-
न्यर्थितस्ततो राज्ञा । मुख्यं रूपमुपागतः ॥ नत्वा विमलसिंहेन । स्वामिसूनुः स सस्वजे ॥
॥ ५६ ॥ कोमीकृत्य नरेशेन । गाढं गौरवितोऽपि सः ॥ वाक्पाशपतितो नेजे । नवनं पणयो-
षितः ॥ ५७ ॥ जुंजानः स तया साकं । जोगानक्षौर्निरंतरं ॥ दिदेव देवदत्तापि । तापितेव ज-
गाद तं ॥ ५७ ॥ प्रतिकूलं महत्त्वस्या—नुकूलं सकलापदां ॥ द्यूतं दोषैरनुस्यूतं । दयितेदं
विमुच्यतां ॥ ५ए ॥ जिते लोन्नोदधि क्षोन्नो । हारिते तु जयस्पृहा ॥ जिते वा हारिते वा-
पि । द्यूतेनोन्नयथा सुखं ॥ ६० ॥ नरः कृशोऽस्तु न खीडे । शोफात्तं मेडुरोदरं ॥ सादारिद्र्यं
श्रियेऽप्येत—न्नान्निष्टं मे दुरोदरं ॥ ६१ ॥ नाजन्मशिक्षितं द्यूतं । प्रियोक्त्यापि मुमोच सः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्वा सितानुविद्धापि । किं शुंठी तैक्ष्णमुज्झति ॥ ६२ ॥ नाह्नापि निशां च वेत्ति विकलो जानाति न क्षुत्तृषौ । वश्यत्यश्लीलगिरो धनं निधनयत्याशु प्रयासार्जितं ॥ हास्यः स्पष्टधियां भवत्यवसनो हे द्यूतभूत त्वदा—घातस्तत्पुनरत्र चित्रमफलो यन्मंत्रतंत्रक्रमः ॥ ६३ ॥ इत-श्चास्त्यचलस्तत्र । धनीसार्थपतिर्युवा ॥ स्वीकृत्य वित्तदानेन । देवदत्तामभुंक्त सः ॥ ६४ ॥ त-स्मिन् दुःकर्मवन्नित्यां—तरायेऽप्यंतरांतरा ॥ तां भेजे मूलदेवोऽपि । श्रद्धालुः समतामिव ॥ ॥ ६५ ॥ अक्कावग्देवदत्तां तां । मूलदेवं त्यजाधनं ॥ अचलं निश्चलीभूय । भज वत्से श्रियां पदं ॥ ६६ ॥ स्त्रीणां भवति मान्यत्वं । समृद्धे सति भर्तरि ॥ उत्तरा दिक्कृता पूज्या । धने-शोऽस्या यतः पतिः ॥ ६७ ॥ उभे शास्त्रे उभे विद्ये । उभौ मार्गावुभौ विभू ॥ समं सिसेविषोः पुंसो । नैकोऽपि फलदो भवेत् ॥ ६८ ॥ साप्यूचे मातरेषास्मि । नैकांतेन धनार्थिनी ॥ किं तु मेऽस्त्यादरश्चाप—यष्टेरीव गुणेष्वपि ॥ ६९ ॥ अयं गुणी गुणज्ञश्च । सुरूपः सुभगः शुचिः ॥ उचितज्ञः प्रियः पुण्यैः । प्राप्तः किं त्याज्यते त्वया ॥ ७० ॥ न हि स्वीकारमर्हंति । धनवंतो-ऽपि निर्गुणाः ॥ मुक्ताभारोऽपि नारोपि । वक्षो दक्षैर्गुणं विना ॥ ७१ ॥ तत् श्रुत्वा कुट्टिनी

तस्यां । व्यवाहार्षीद्दिनात्ततः ॥ शाकिनीव सपत्नीव । वैरिणीवोरगीव वा ॥ ७२ ॥ सा कदा-
चिद्ययाचेवं । तैलेक्षू अथ यावकं ॥ खलकूर्चकनिर्णिक्त-पङ्ककाणि तु सा ददे ॥७३॥ मातः
किमेतदिति सा । तया पृष्टा रुषा जगौ ॥ प्रियस्तवास्ति निःसारो । याहक् ताहश्यमून्यपि ॥७४॥
सपङ्कं याति भृंगीजं । सपङ्कं वारि हंस्यपि ॥ निष्पङ्कं च रता ताभ्यां । पशुभ्यामपि हीयसे
॥ ७५ ॥ ज्ञात्वा तदाशयं सापि । प्रोचे मातरिमान्यपि ॥ गोकुले व्राजने व्रजे । प्रदीपे ह्यु-
पकुर्वते ॥ ७६ ॥ मूलदेवो न निःसारो । यः प्रवीणो विवेकिषु ॥ निःसारोऽचल एवासौ । यो
विवेकेन वर्जितः ॥ ७७ ॥ दर्शयिष्ये तवाप्येत-दित्युक्त्वा प्रेष्य माधवीं ॥ अचलं ज्ञापयामा-
स । सा श्रद्धामिक्षुभक्षणे ॥७८॥ सोऽपि प्राप्य तदादेश-मनेक इव किंकरः ॥ प्राहिणोदिक्षु-
संपूर्ण-मनः स्वमनसा सह ॥ ७९ ॥ तदौदार्यं प्रशंसन्त्या--मक्कायामभ्यधत्त सा ॥ किं महि-
ष्यस्मि येनेक्षू-नद्मि मूलदलैः सह ॥ ८० ॥ तमेव दोहदं मूल-देवोऽपि ज्ञापितस्तया ॥ स्व-
वचांसीव सरसा-निक्षूनादत्त पंचषान् ॥ ८१ ॥ मूलाग्राणि दृढा सर्व--ग्रंथीरपि परित्यजन्
॥ इक्षूनिस्तद्य चक्रे स । खंडान् छित्रांगुलायता ॥ ८२ ॥ चित्तैर्नृत्वा शरावांस्तै-श्चतुर्जात-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कवासितैः ॥ प्रोतैर्बब्बूलशूलाग्रिः । स प्रैषीदुपवल्लभं ॥ ७३ ॥ हृष्टाथ देवदत्ता तां । बभाषे
मातरं तरं ॥ विवेको मूलदेवस्या—चलस्यापि निजालय ॥ ७४ ॥ इयं मुग्धा विप्रलब्धा ।
धूर्तेनानेन धिक्कथं ॥ कार्पण्यं दोषमप्यस्य । यत्पश्यति गुणाशया ॥ ७५ ॥ नृशल्यमिव निर्वा-
स्य । एवायं सदनादिति ॥ कल्पांतवार्धिवीचीवा—चलं चानयतिस्म सा ॥ ७६ ॥ दिनाधीशो-
दयेऽवोच—द्देवदत्तामथाचलः ॥ एष ग्रामांतरं यामि । कामिन्यस्तु शिवं तव ॥ ७७ ॥ गुणा-
ग्रहे गृहाणेदं । नित्यव्ययकृते धनं ॥ मृद्वि मद्विरहान्माजै—स्त्वं मे वससि चेतसि ॥ ७८ ॥
अचले चलिते सद्म । सानिनाय स्वनायकं ॥ गते म्लेछबले बिंब—मिव चैत्यमशंकिता ॥
॥ ७९ ॥ स्निग्धताजितगोस्तन्या । गोस्तन्या अपि पेशलाः ॥ प्रावर्तंत मिथो वार्ता । एक-
तल्पस्थयोस्तयोः ॥ ८० ॥ अक्कसंकेतितस्ताव—दचलः सुभटान्वितः ॥ विद्युल्लोल इवापत्य ।
सहसा प्राविशद् गृहे ॥ ८१ ॥ मूलदेवं न्यधाद्देव—दत्ता तल्पतले तदा ॥ मुक्त्वा तस्यांति-
के स्वांतं । सा तन्वाचलमभ्यगात् ॥ ८२ ॥ विषसादाचलस्तल्पे । विकल्पे दुर्मना इव ॥ अ-
क्का चूसंज्ञयावादी—दधस्थं तस्य वैरीणं ॥ ८३ ॥ अचलेनाचलेनेवो—पर्याक्रांतो विमूढधीः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ न निर्गंतुं न च स्थातुं । शशाक नृपनंदनः ॥ ९४ ॥ इत्योऽवदत्प्रिये नासं—श्चलतः श-
कुनानि मे ॥ ज्ञाने जानंति मच्चित्तं । तानि त्वद्विरहास्पदं ॥ ९५ ॥ सस्नौ तल्पे सचेलोऽहं ।
निशीति स्वप्नमीक्षितं ॥ सत्यीकर्तुमिह स्नास्या—म्यद्य तत्प्रगुणीनव ॥ ९६ ॥ सा बजाषे प्र-
नो स्नातुं । स्नानपीठमलंकुरु ॥ मा विनश्येदियं तूली । नोगार्हा स्नानवारिणा ॥९७॥ शठो
जातहठोऽवादी—दचलस्तां मनस्विनि ॥ अद्य स्नातव्यमत्रैव । मया स्वप्नानुरोधतः ॥९८॥
सार्थेशगोत्रदेवीव । पुत्रीं शास्तिस्म कुट्टिनी ॥ वत्से कोऽयं स्वनावस्ते । पत्युः प्रत्युत्तरार्पणं
॥ ९९ ॥ अवशा सा तमन्यज्य । स्नपयामास पाथसा ॥ तेनाधः पतता क्षत्रः । सस्नावस्ना-
पितोऽपि सः ॥ १०० ॥ जुगुप्समानः स्वं कर्म । वणिग्मलजलाविलः ॥ तत्र सोऽस्थात्क्षणं ग्रा-
म—स्रोतसीव सितच्छदः ॥ १ ॥ यन्नाव्यं तन्नवत्वाशु । न तु स्थातुमिहौचिती ॥ ध्यात्वेति नू-
पन्नूर्निर्य—न्नेवारुध्यत तद्भटैः ॥२॥ चौरवद् दृढबद्धं तं । कृतांत इव दारुणः ॥ ऊचिवानचलः
कुर्वे । किमन्यायकृतस्तव ॥ ३ ॥ समयेऽपचिकीर्षुस्तं । मूलदेवोऽब्रवीदिति ॥ यत्क्रियेतान्नि-
पन्नस्य । कुरु घातं च तन्मम ॥ ४ ॥ व्यमृशद्देवदत्तांतः । साधूक्तं दयितेन मे ॥ नीचैर्नमन्नयं

For Private and Personal Use Only

चाप। श्वारार्तिं हनिष्यति ॥ ५ ॥ स प्रोचे याहि युक्तोऽसि । मुंचेस्त्वमपि जातु मां ॥ पुष्ठ-
कं लगणस्यैव । धिग् निःसत्वं वणिग्जनं ॥ ६ ॥ आबद्धशकुनग्रंथि-र्निर्गत्य नगराद्बहिः ॥
स्नातः सरसि सोऽचाली-त्पुरं बेन्नातटंप्रति ॥ ७ ॥ एकस्मादचलात् त्रस्तः। पुरोऽचलचयाकु-
लां ॥ वीक्ष्याटवीं सशंकासौ । सहायं क्वचिदैहत ॥ ८ ॥ तावत्तत्रागतः कोऽपि । सबलः स-
क्थुशंबलात् ॥ विप्रस्तेन क्व यासीति । बन्नाषे मुदितात्मना ॥ ९ ॥ यामि वीरप्रधानाख्यं ।
ग्रामं बेन्नातटांतिके ॥ इत्युक्तिशालिना तेन । मूलदेवः सहाचलत् ॥ १० ॥ वार्ताविनोदतोऽ-
न्योन्यं । जातसौहृदयोस्तयोः ॥ क्षीरोदस्पर्द्धि मध्याह्ने । ययौ दृग्गोचरं सरः ॥ ११ ॥ मरा-
ललीलया तत्र । कृतकेलिर्न्यलीयत ॥ अपाथेयः पथश्रांतो । मूलदेवस्तरोस्तले ॥ १२ ॥ स्वो-
दरप्रमितान् सक्थू-नशक्तो दानकर्मणि ॥ क्षणादालोकयामास । जोक्तुकामोंजसा द्विजः
॥ १३ ॥ रीतिज्ञोऽप्ययमद्यापि । किं नाह्वयति मामिति ॥ कुमारे विमृशत्येवं । सक्थूनेकोऽप्य-
भुंक्त सः ॥१४॥ भुक्त्वा प्रचलीते विप्रे । राजपुत्रे व्यन्नावयत् ॥ नाद्याल्पसक्थुरेषोऽदा-द्भोजनं
श्वस्तु दास्यति।१५।न द्वितीये तृतीयेऽपि । दिवसे तमबूभुजत् ॥ निक्षाककुलजातेषु। प्रायो

दानकथा वृथा ॥ १६ ॥ अयणेतीतकांतारं । कुमारं न्यगदद् द्विजः ॥ स्वस्त्यस्तु सौम्य ते या-
स्या-म्यहं तु वर्त्मनामुना ॥ १७ ॥ अवदन्मूलदेवस्त-मियं द्वादशयोजना ॥ गृहांगणमिवा-
लंघि । त्वत्सहाय्यान्मयाटवी ॥ १८ ॥ ध्रुवं त्वमुपकारार्हः । किं कुर्वे निर्धनोऽधुना ॥ मूल-
देवं नृपं श्रुत्वा । विप्र क्षिप्रं समापतेः ॥ १९ ॥ अथासौ मूलदेवेन । नामपृष्टोऽब्रवीदिति ॥
लोकैर्निर्घृणशर्माख्यां । लंभितः सिद्धोऽस्म्यहं ॥ २० ॥ द्विजः काको जनैर्युक्तं । स्मर्यते भो-
जनक्षणे ॥ बंधून् लब्ध्वाल्पमप्यद्योऽपि । नोक्तुमाह्वयतीह यः ॥२१॥ द्विजा दंता वसंत्यास्ये
। युक्तं यद्द्वन्द्वमाप्यते ॥ स्वेन मृध्नंति यद्वंति । जिह्वायास्त्वौरसं रसं ॥ २२॥ विधुर्धत्ते द्वि-
जे शाख्यां । युक्तं यातोदयो ह्यसौ ॥ सौहित्यं जीवलोकस्य । करोति स्वकरामृतैः ॥ २३ ॥
आत्मंभरिरपूर्वोऽयं । मम मार्गसुहृद् द्विजः ॥ अस्य नामांतरं तन्व-न्न मृषावाग्महाजनः ॥
॥ २४ ॥ औदार्यभूरिति ध्यायन् । बेन्नातटपुरंप्रति ॥ प्रस्थितो भूपभूरेकं । विवेश ग्राममध्व-
नि ॥ २५ ॥ पंचभिः कुलकं ॥ भ्रांतभूरिगृहः प्राप । कुल्माषांस्तत्र भिक्षुवत् ॥ कुल्माषास्तेऽभ-
वंस्तस्य । मोदकेभ्यः प्रमोदकाः ॥ २६ ॥ अनाकुलमनास्तेषां । भक्षणे क्षुधितोऽपि सः ॥ व्य-

उप० चिंता० २१७

न्नावयदुपग्राम—सरस्तीरं गतः कृती ॥ २७ ॥ क तन्मे पैतृकं राज्यं । क सावंतीविलासिता ॥ क च कुग्रामभिक्षेयं । सर्वमीपत्करं विधेः ॥ २८ ॥ एकः स दिवसो यस्मि—न्नार्थिव्रातमजीवयं ॥ एकोऽयं दिवसो यत्र । नोदरंजरिरप्यहं ॥ २९ ॥ उपवासत्रयांतेऽमी । कुल्माषा लेभिरे मया ॥ तत्कस्मैचिददत्वैतान् । किं रंक इव यद्मि ॥ ३० ॥ योऽपि सोऽपि समायातो । भिक्षुस्तोषाय संप्रति ॥ सत्पात्रं प्राप्यते येन । क तादृग्भाग्यमस्ति मे ॥ ३१ ॥ एवं भावयतस्तस्या—कृष्टः पुण्यैरिवाययौ ॥ तपोराशिरिवांगस्थः । साधुर्मासमुपोषितः ॥ ३२ ॥ राज्यं रोरः सुतं वंध्य—श्चक्षुरंधः श्रुतं जडः ॥ वाचं मूको निधिं दुःस्थ । इव तं प्राप्य सोऽहृषत् ॥ ३३ ॥ अजस्थाने गजप्रासे—र्मणिलाभाद् दृषत्पदे ॥ स्वं धन्यं मन्यमानोऽसौ । मुनिं नत्वा व्यजिज्ञपत् ॥ ३४ ॥ त्वादृक्षा नास्त्यसौ भिक्षा । पुनर्भावं प्रमाणयन् ॥ गतकल्मषकुल्माषान् । गृहाणानुगृहाण मां ॥ ३५ ॥ विवर्धयिषुरानंदं । दातुर्दांतमना मुनिः ॥ दौःस्थ्याब्धिं तरितुं पोत—मिव पात्रं पुरो दधे ॥ ३६ ॥ मुनये मूलदेवेऽथ । ददाने दानमंजसा ॥ अवदद्देवता व्योम्नि । तत्पुण्यस्यैव साक्षिणी ॥ ३७ ॥ धन्यानां हि नराणां स्युः । कुल्माषाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधुपारणे ॥ यद्याचसे परार्धेन । मूलदेव ददामि तत् ॥ ३८ ॥ गणिका देवदत्तेभ—सहस्रं
राज्यमस्तु मे ॥ इति तस्मिन्नभिधाने । पुनः प्रोवाच देवता ॥ ३९ ॥ सप्तमेऽहनि राज्यं ते ।
देवदत्ता तु सा क्रमात् ॥ भविष्यत्येव पुण्यं हि । क्रमेणैव विपच्यते ॥ ४० ॥ सोऽथ कृत्वा
पुनर्भिक्षा—प्राप्तकुल्माषभोजनं ॥ सायाह्नि शनैर्गच्छ—न्नाप बेन्नातटं पुरं ॥ ४१ ॥ प्रसुप्तः
पांथशालायां । परिपूर्णं ददर्श सः ॥ निशावसाने शशिनं । विशंतं वदनोदरे ॥ ४२ ॥ कश्चि-
त्कार्पटिकोऽप्येवं । तदा स्वप्नं व्यलोकत ॥ अवोचच्च सतीर्थ्यानां । निद्रामुकुलिताक्षरं ॥४३॥
तेऽप्यूचुः स्वप्नदृष्टस्या—नुभावान्मृगलक्षणः ॥ त्वं लप्स्यसेऽद्य भिक्षायां । मंडकं गुडमंडितं ॥
॥ ४४ ॥ स्वप्नचिंतामणौ काची—यतस्तान्मंदमेधसः ॥ निंदन्नुदारमारामं । मूलदेवो ययौ प्र-
गे ॥ ४५ ॥ मालिकं सर्वकर्मज्ञो—ऽप्रीणात्पुष्पप्रचायतः ॥ तस्मात्पुष्पफलान्याप्य । ययौ स्वप्न-
ज्ञधाम सः ॥ ४६ ॥ दत्वा पुष्पफले पृष्टः । स्वप्नार्थं स विचक्षणः ॥ आचख्यौ तदहं वच्मि ।
जायसे चेन्ममातिथिः ॥ ४७ ॥ तथेति प्रतिपेदानं । विहितस्नानभोजनं ॥ रूपस्याधिभुवा स
स्व—पुत्र्या तमुदवाहयत् ॥ ४८ ॥ ततोऽवदच्च शीतांशु—पानस्वप्नानुभावतः ॥ सप्तमेऽहनि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यासे । वत्स राज्यमिह स्थितः ॥ ४९ ॥ स्वप्नस्य देवतावाचि । साचिव्यं चिंतयन्नसौ ॥
निष्कंपश्चंपकस्याधः । प्रसुप्तः सप्तमेऽहनि ॥ ५० ॥ निधान इव निष्पत्रे । निष्पुत्रे नृपतौ मृ-
ते ॥ तदा तत्र पुरि प्राज्या । राज्यार्यंतिस्म गोत्रिणः ॥ ५१ ॥ यस्मै राज्यं दास्यतीदं । स
राजास्त्विति वादिभिः ॥ प्रधानैरधिवास्याथ । मुमुचे दिव्यपंचकं ॥ ५२ ॥ कुमाराः कृतशृंगा-
राः । कृत्रमंत्रिद्विजन्मनां ॥ पुरस्तस्य चरंतिस्म । स्वैरं विचरतः पुरे ॥ ५३ ॥ राज्यार्हं कंचि-
दप्राप्य । पुरस्यांतः पुराद्बहिः ॥ पंच दिव्यान्ययुस्तत्र । यत्र सुप्तोऽस्ति नृपभूः ॥ ५४ ॥ तं
वीक्ष्याहेषि तार्क्ष्येण । करेण च करेणुना ॥ स स्वस्कंधे समारोपि । पर्जन्येनेव गर्जता ॥५५॥
दुधुवे चामराभ्यां च । छत्रेणोपरि पप्रथे ॥ अर्घस्तस्य वितेने च । भृंगारेण नवातिथेः ॥५६॥
मौलिस्पृष्टमहीपीठ—लुठिताशेषशेखरैः ॥ सामंतैः स नमश्चक्रे । चिरं नंदेति वादिभिः ॥
॥ ५७ ॥ श्रेणिस्थजनतानेत्र—निर्मितांभोजतोरणे ॥ प्राविशन्नगरे मूल—देवो देवेंद्रलीलया ॥
॥ ५८ ॥ सन्नासीनः स सामंतैः । साम्राज्यायाभ्यषिच्यत ॥ अंतर्हिता तदा सैव । बभाषे
व्योम्नि देवता ॥ ५९ ॥ रेमे यः किल राजकुंजरकुले गौडेषु गर्जंस्ततः । सत्कीराभिरवंति-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूपतिसजां संशोजयामास यः ॥ दानोदारमतिर्यतिद्विपकरे योऽयोजयत्स्वं करं । सत्यं सोऽयमनेकपो विजयते श्रीमूलदेवो नृपः ॥ ६० ॥ ततः स भूपतिस्ताय–मानो जनकवत्प्रजाः ॥ अवंतीशेन सौहार्दं । चक्रे चक्रेश्वरः श्रिया ॥ ६१ ॥ सोऽथ निर्घृणशर्माख्यो । विप्रस्तत्र समाययौ ॥ दविष्ठस्यैव तद्वास–ग्रामं तस्मै ददौ नृपः ॥ ६२ ॥ तदानीं देवदत्तापि । मूलदेवविडंबनां ॥ साक्षान्निरीक्ष्य चुक्रोशा–चलं क्रोशायतस्वरा ॥ ६३ ॥ रे त्वया किमुदूढास्मि । यन्नान्यमिह मृष्यसि ॥ धनांध मद्गृहं मुंच । नो चेत्त्यक्ष्यसि जीवितं ॥ ६४ ॥ तन्निर्वास्य गृहाद्देव–दत्ता गत्वोपभूपतिं ॥ अयाचत प्रसादं तं । न्यासीकृतवरं तदा ॥ ६५ ॥ ददामि ते किमित्युक्त–वति भूभृति सा जगौ ॥ मूलदेवं विनास्वामि—न्न प्रसाद्यः पुमान् मम ॥ ६६ ॥ कुपितेव ब्रुवाणासि । किमित्युक्ता नृपेण सा ॥ जगादाचलदुर्वृत्तं । ज्वलत्यशनिवत्क्रुधा ॥६७॥ अथाहूयाचलं भूपो–ऽभ्यधात् किं रे पुरे मम ॥ नेतासि कुरुषे येन । निग्रहानुग्रहौ स्वयं ॥ ॥६८॥ असूयन्मूलदेवाय । त्वं वध्योऽसीति भाषिणः ॥ भूपालव्यालतः सैव । कथंचन ररक्ष तं ॥ ६९ ॥ मदृष्टौ तमनानीय । मायासीरिति भूभुजः ॥ आज्ञौषधं पुराध्याधि–मिव तं नि-

For Private and Personal Use Only

रवासयत् ॥ ७० ॥ मूलदेवं ततोऽन्वेष्टु—मचलः प्रचचाल सः ॥ न तु क्वचन तं प्राप । निः-
पुण्य इव शेवधिं ॥ ७१ ॥ दध्यौ च मूलदेवोऽपि । रहितं देवदत्तया ॥ श्यामया तारयां चक्षु
—रिव राज्यं वृथा मम ॥ ७२ ॥ कलाः पंचदश यांति । यांति वा चंद्रमंकलं ॥ एका पुन-
र्ध्रुवा तिष्टे—न्न चंद्रस्तां विना यतः ॥ ७३ ॥ एवं मम मनः का का । कामिनी नागतागता
॥ तस्थौ सा तु स्थिरीभूय । न मनस्तां विना यतः ॥ ७४ ॥ सोऽथ दूतमुखेनैव—मवंतीश्व-
रमालपत् ॥ चौरी मच्चेतसो देव—दत्ता वसति ते पुरे ॥ ७५ ॥ तामल प्रेषयेर्येन । निबि-
डस्नेहबंधनां ॥ रुणद्धि स्वमनोगुप्तौ । नान्यस्तस्या हि निग्रहः ॥ ७६ ॥ ज्ञात्वा तदाशयं प्रैषी
—त्तां ततोऽवंतीनायकः ॥ देवतादत्तसाम्राज्यः । स ह्यनुलंघ्यशासनः ॥ ७७ ॥ देवदत्ता रथा-
रूढा । ययौ वेन्नातटं पुरं ॥ प्रावेश्यत च भूपेनां—तःपुरं परमोत्सवैः ॥ ७८ ॥ वियोगचित्रा-
तापार्ता । चिरात्प्राप्य हृदीश्वरं ॥ स्वात्यंभ इव शस्यश्रीः । सापि प्रोल्लासमासदत् ॥ ७९ ॥
इतश्च भृतभांडोऽगा—दचलः पारसं तटं ॥ आत्तत्क्रांडसंभारः । प्राप वेन्नातटं पुरं ॥ ८० ॥
उपादायामुपादाय । स्थालं रत्नौघपूरितं ॥ उपतस्थे महीनाथं । सोऽथ द्वाःस्थनिवेदितः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ८१ ॥ दूरादवनतं भीति-प्रांजलं पटुचेतनः ॥ अचलोऽयमिति क्षिप्रं । क्षितीशस्तमलक्षयत् ॥ ८२ ॥ मूलदेवं तु भूपालं । नोपलक्षयतिस्म सः ॥ को लक्षयति वैशाखे । शाखिनं फाल्गुनेक्षितं ॥ ८३ ॥ अजानतेव भूपेन । पृष्टे तस्याभिधादिके ॥ उल्लसन्निव हर्षेण । सवृत्तमचलो जगौ ॥ ८४ ॥ वदनस्थितहर्षेण । हृदि न्यासीकृतक्रुधा ॥ शुल्कार्धीकरणाच्चक्रे । प्रसादस्तस्य भूभुजा ॥ ८५ ॥ अस्माकं दानचौर्येण । स्यात्प्राणांतोऽपि निग्रहः ॥ शेषार्धेन ततश्छन्न । विधेयमिति चोच्यते ॥ ८६ ॥ दानमंडपिकां गत्वा । वस्तु भांडान्यदर्शयत् ॥ यावत्पंचकुलायासौ । तावत्तत्राययौ नृपः ॥ ८७ ॥ तत्र किं शुल्क निर्वाहो—ऽभवन्नो चेत्करोम्यहं ॥ इत्युक्ते भूभुजा हर्षा—दचलो द्विगुणोऽभवत् ॥ ८८ ॥ स्वामिंस्तत्र प्रसादेन । मंक्षु पंचकुलं मम ॥ सर्वं निर्वाहयामास । शुल्कमेवमुवाच सः ॥ ८९ ॥ अथ भ्रूसंज्ञया राज्ञा । शौल्किकाः प्रगुणीकृताः ॥ मर्माणीव पुनस्तस्य । वस्तुभांडान्यशोधयत् ॥ ९० ॥ राज्ञोचे भोः किमिक्षध्वे । मृषाभाषी हि नाचलः ॥ तथापि यदि संदेहो । दार्यतां भांडवस्तु तत् ॥ ९१ ॥ तैस्तथा विहिते वस्तु—भांडाद्बहिरसारतः ॥ गुप्तं तस्यांतरात्मेव । सारं वस्तु विनिर्ययौ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ९२ ॥ अथ रोषेण संहार—रुद्ररौद्रवपुर्नृपः ॥ सर्वं वस्तु स्वमुद्रांकं । कृत्वाचलमबंधयत् ॥ ९३ ॥ वस्तुव्ययेन चेन्मुच्ये । जीवंस्तद्भाग्यवानहं ॥ चिंतयेति चकंपेऽसौ । कंकयेव जरद्भवः ॥ ९४ ॥ क्ष्मापः स्वभवनं प्राप । नीतो बद्धः स चाग्रतः ॥ किमेवं कुरुषे कूट—मित्युक्तो मूलुजान्यधात् ॥ ९५ ॥ विश्वस्तवंचनं माया—रचनं वचनं मृषा ॥ गुरून् विनापि विधेयं । वणिजां स्यादयत्नजाः ॥ ९६ ॥ अधीते यत्किंचित्तदपि मुषितुं ग्राहकजनं । मृदु ब्रूते यद्वा तदपि विवशीकर्तुमपरं ॥ प्रदत्ते यत्किंचित्तदपि समुपादातुमधिकं । प्रपंचोऽयं वृत्तेरहह गहनः कोऽपि वणिजां ॥ ९७ ॥ इत्युक्तवंतमंतस्थ—नयं तमनुयुक्तवान् ॥ किं रेः प्रत्यभिजानासि । मां न वेत्ति नरेश्वरः ॥ ९८ ॥ को वेत्ति भानुवन्न त्वां । नत्वा तेनेति भाषिते ॥ भूपोऽभ्यधत्त चाटूनि । मुंच जल्प यथातथं ॥ ९९ ॥ तर्हि सम्यग्न जानामी—त्युक्तवत्यचले भिया ॥ साक्षादिव श्रियं देव—दत्तामानाययन्नृपः ॥ २०० ॥ ह्रीणस्तां वीक्ष्य तं जानन् । मूलदेवमिलापतिं ॥ संजातद्विगुणातंको । बभाषे मूलुजाचलः ॥ १ ॥ मुंचेः कदापि मामेवं । त्वया प्रोक्तं तदा ततः ॥ प्राप्तोऽपि निग्रहस्थानं । मया संप्रति मुच्यसे ॥ २ ॥ अथ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रथितग्रंथस्य । तस्य प्रत्यार्पयन्नृपः ॥ समस्तमपि तद्वस्तु । न संतश्छलघातिनः ॥ ३ ॥ व्य-
जिज्ञपन्नृपं सार्थ—नाथो नाथ तथा कुरु ॥ यथावंतीश्वरोऽवंत्यां । प्रवेशं मेऽनुमन्यते ॥ ४ ॥
पृथिवीपुरुहूतोऽथ । दूतं तस्मै ददौ निजं ॥ दूतोक्त्यावंतीनाथोऽपि । तमवंत्यामवीविशत्
॥ ५ ॥ अथान्यदा मूलदेवं । महीनाथं सदःस्थितं ॥ एत्य व्यजिज्ञपन् पौरा—श्चौराकुलि-
तचेतसः ॥ ६ ॥ यच्छास्त्रेषु श्रुतं पूर्वं । न तु प्रत्यक्षमीक्षितं ॥ तदेव चौर्यमद्य श्वः । पुरे तव
भवत्यहो ॥ ७ ॥ समं समस्तशृंगारै—श्चौरैरात्ते धनेऽधुना ॥ निर्ग्रंथेभ्यः परं वेणि—श्मश्रु-
णास्माकमस्ति भित् ॥ ८ ॥ तद्देवो यततामस्मा—नस्मात्तस्कर संकटात् ॥ त्रातुं ददातु वा
स्थानं । सुखवासाय किंचन ॥ ९ ॥ अथ भूपः स्फुरत्कोपः । प्रोवाचारक्षकानिति ॥ रे पुरे
चौरिका केयं भवत्सु प्रभवत्स्वपि ॥ १० ॥ ते प्रोचुरेक एवासौ । चौरोऽस्ति न तु भूरयः ॥
परं स दुर्ग्रहोऽस्माकं । मनः क्लीबात्मनामिव ॥ ११ ॥ स चौरो दैत्यवत्क्रूरो । न क्षेत्रे न च
लप्स्यते ॥ अस्ति नः केवलं रात्रि—जागरो रोगवृद्धये ॥ १२ ॥ नृपो दध्यावभीभिः किं । व-
राकैर्हत सिद्ध्यति ॥ मयैव जेष्यते चौरः । श्रीरामेणेव रावणः ॥ १३ ॥ मा धत्त तस्करभयं ।

जवताञ्जवतां धृतिः ॥ इत्युक्त्वा बहुमानेन । व्यसृजन्नागरान्नृपः ॥ १४ ॥ स्वयं च सायमा-
धाय । सहायमिव साहसं ॥ नीलांबरधरो ध्वांता—धिदैवतमिवाचलत् ॥ १५ ॥ भ्रमन् पुरे-
ऽभितो वीक्षां—चक्रे वक्रेण चक्षुषा ॥ चौरं कापि न तु प्राप । क्ष्मापः पापमिवोत्तमे ॥ १६ ॥
भ्रमंभ्रमं श्रमात्खिन्न—मना देवकुले कचित् ॥ अनाथ इव नृनाथः । शिश्ये कपटनिद्रया
॥ १७ ॥ पापप्रचंडदोर्दंडो । मंडिकस्तस्कराग्रणीः ॥ तावत्तत्रायायौ रक्षः । इव भ्राम्यंस्तमोव-
लात् ॥ १८ ॥ प्रभुः प्रेष्यमिव क्ष्मापं । घृष्ट्वा सावज्ञमंह्रिणा ॥ सोऽजागरयदूचे च । कोऽसि
त्वमिति दुर्मतिः ॥ १९ ॥ अकालचर्यया चौरं । ज्ञात्वा तं नृपतिः कृती ॥ शाठ्यादूचे जन्म-
दुःस्थो । मठेऽस्मिन् शयितोऽस्म्यहं ॥ २० ॥ स्नानं कूपेऽशनं सत्रा—गारे स्वापः पुनर्मठे ॥
दिग् दैवं दरिद्राणा—मपि लोके जिजीविषा ॥ २१ ॥ चौरः प्रोचे मयि प्रासे—ऽप्येवं भोः
किमु खिद्यसे ॥ हस्तस्थिते सुरमणौ । का दारिद्र्यविहस्तता ॥ २२ ॥ वत्सागच्छ मया साकं ।
यदि संपदमिच्छसि ॥ इत्युक्त्वा तं सहादाय । सोऽचलच्चललोचनः ॥ २३ ॥ लक्ष्मीलीलारविं-
देऽसौ । कस्यापीभ्यस्य मंदिरे ॥ दत्तखात्रो मणिस्वर्ण—पेटाः प्राचीकटद्बहिः ॥ २४ ॥ दृष्ट्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्चेष्टितं दृष्टा—धरोऽपि क्ष्मापतिः क्रुधा ॥ तन्मूलस्थानजिज्ञासुः । प्रतिचक्रे न किंचन ॥ २५ ॥ पेटा उवाह वाहीक । इव तास्तश्चिरा नृपः ॥ कार्यसिध्यै शठा दस्यो—रपि दास्यं प्रकुर्वते ॥ २६ ॥ नृपेनानुगतश्चौरो । निर्गत्य नगराद्वहिः ॥ क्रीडास्थानं यमस्येव । जीर्णोद्या- नं रयादयात् ॥ २७ ॥ तत्र नानानिकुंजांतः । शिलाछन्नमुखं सुखं ॥ स नृमिगृहमुद्घाट्य । विवेश सह भूभुजा ॥ २८ ॥ तत्रापश्यत्कनीमेकां । नृपो रूपवतीं पुरः ॥ सर्वा अपि तिथी राकाः । कुर्वतीं स्वमुखेंदुना ॥ २९ ॥ तद्दर्शनसुधाकुंड—क्रीडया प्राप भूपतिः ॥ विहारजारजं खेदं । वमन् समधिकं सुखं ॥ ३० ॥ न वयं तस्करा एत–त्तव दौःस्थ्यच्छिदो कृतं ॥ तन्मुंच जारमित्युक्त-स्तेन पेटां नृपोऽमुचत् ॥ ३१ ॥ स्वसारं तत्समादाय । स्वसारं तां मलिम्लुचः ॥ क्षालयास्यातिथेः पादा—वित्यादिक्षदच्छकधीः ॥ ३२ ॥ कौर्यनिर्जितकृत्याशा । दुःकृत्याच- रणे रता ॥ उपकूपतटं भूप—स्यासनं समतिष्टिपत् ॥ ३३ ॥ तत्रासीनस्य सा राज्ञः । क्षाल- यंती मृदू पदौ ॥ विचक्षणा लक्षयंती । लक्षणानि व्यजावयत् ॥ ३४ ॥ निपात्यंतेस्म कूपेऽ- स्मिन् । ये पुरा तेऽपरे जनाः ॥ अयं लोकोत्तरः कोऽपि । पुनर्नरशिरोमणिः ॥ ३५ ॥ देया

For Private and Personal Use Only

कामं निहत्यामुं । लक्ष्मणामुदरंजरिं ॥ पतःका पातकावासे । हा मया विश्ववामया ॥ ३६ ॥
जीवन्नसौ कदापि स्या—न्मम जर्तापि जाग्यतः ॥ यद्वा केयं दुराशा मे । क घुकी क च जा-
स्करः ॥ ३७ ॥ तथापि रक्षणीयोऽयं । माभूज्जगदनायकं ॥ ततस्तं सा जगौ याहि । याहि
जो मा मृथा वृथा ॥ ३८ ॥ जिघांसुः समये भूप—श्चौरं शूराग्रणीरपि ॥ अपासरत्ततः स्था-
ना—त्वरितत्वरितैः पदैः ॥ ३९ ॥ रक्षितोऽयं मया मृत्यो । रक्ष्यं स्वस्याथ दूषणं ॥ ध्यात्वेति
पूच्चक्रे सापि । गतः सैष ममाग्रतः ॥ ४० ॥ प्राप्तोऽहं रे क यासीति । प्रजल्पंस्तस्कराधमः ॥
कंकखड्ग करे कृत्वा । दधावे तस्य पृष्ठतः ॥ ४१ ॥ वीक्ष्यायातमुदस्त्रं त—मतुच्छमिव वृश्चिकं
॥ चत्वरस्थं शिलास्तंभ—मवष्टंज्य नृपः स्थितः ॥ ४२ ॥ कोपांधिताक्षश्चौरोऽपि । समुपेत्य पु-
मानिति ॥ भ्रांत्या खड्गेन कदली—कांडवत्स्तंभमछिनत् ॥ ४३ ॥ तस्मिन्निवृत्ते चौराप्ति—निवृ-
त्तात्मा नरेश्वरः ॥ निजं निवासमासाद्य । निशाशेषमतीयिवान् ॥ ४४ ॥ क द्रक्ष्यामि पुन-
श्चौर—मिति जातकुतूहलः ॥ राजा विनिर्ययौ राज—पाटिकाव्याजतः प्रगे ॥ ४५ ॥ नृपो
दिक्षु क्षिपंश्चक्षु—रपश्यत्पश्यतोहरं ॥ तमेव नूनकृत्कर्म । कुर्वाणं दौष्यिकापणे ॥ ४६ ॥ राजा

रजनिदृष्टत्वा—ह्वदयामास तं क्षणात् ॥ आह्वयामास च निजैः । पुरुषैः सदनं गतः ॥ ४७ ॥
सशल्य इव साशंकः । सोऽपि नृपांतिकं ययौ ॥ व्रणीव निबिडं बद्ध—पट्टकः स्वांगसंधिषु
॥ ४८ ॥ अंतःसंयमितक्रोध—स्तं नमंतं निजांतिके ॥ निवेश्य नृपतिः प्रोचे । मृदुवाचा व-
यस्यवत् ॥ ४९ ॥ स्वां जामिं देहि नो मह्यं । सा हि देयैव कस्यचित् ॥ तत् श्रुत्वा वज्रघा-
तेने—वाकुलोऽसौ व्यचिंतयत् ॥ ५० ॥ रंकवन्मिलितो यो मे । निशि सोऽयं महीपतिः ॥
जीवन् यदि तदा मुक्त—स्तद्यथेष्टं विचेष्टतां ॥ ५१ ॥ प्रस्ताववेद्यथो चौरो—ऽवदत्किमि-
दमुच्यते ॥ आस्तां कन्या त्वमेवासि । सर्वस्वस्यापि नः प्रभुः ॥ ५२ ॥ तेन दत्तां ततो भू-
मान् । कन्यकां परिणीय तां ॥ प्रसादपात्रमकरोत् । कृतज्ञाः किल तादृशाः ॥ ५३ ॥ मंत्रि-
कस्य महामात्य—पदवीं प्रददौ नृपः ॥ पोषयंति द्विषं छाग—मिव छेका जिघांसवः ॥ ५४ ॥
प्रणाल्येव द्रुमः कूप—स्यांभस्तस्याखिलं धनं ॥ अग्राहयत्तया पत्न्या । तत्तत्कार्यमिषान्नृपः
॥ ५५ ॥ अन्यदा कियद्यापि । बंधोस्ते विद्यते धनं ॥ इत्युक्ता भूभुजा साव—भिःस्वोऽधा-
यमभूदिति ॥ ५६ ॥ ततो विडंब्य निबिडं । भूजानिर्निजघान तं ॥ अचिरेण विपच्येत । चौ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यपापतरोः फलं ॥ ५७ ॥ सर्वं समर्प्य लोकानां । स्वस्वनामांकितं धनं ॥ नृधनः पालयामास
। भुवं वासवलीलया ॥ ५८ ॥ साम्राज्यं मूलदेवस्य । श्रुत्वा स्वप्नानुन्नावजं ॥ स्वं स कार्पटिको-
ऽनिंद—त्सुस्वप्ने दुर्विचारणं ॥ ५९ ॥ तस्मै स्वप्नाय शिष्येऽसौ । निशि व्यात्ताननो बहिः ॥
तन्मुखे वह्गुलीविष्ट । पपात न पुनः शशी ॥ ६० ॥ पुनः पुनः कार्पटिकः शयानः । कदा-
पि कुर्वीत शशांकपानं ॥ विराद्धधर्मा न पुनर्मनुष्य—नवाच्युतो मानुषतां लनेत ॥ ६१ ॥ इति
मूलदेवदृष्टांतः ॥

अथ चक्रदृष्टांतः—पुरमिंद्रपुरं नाम । श्लाघ्यमिंद्रपुरादपि ॥ तस्मिन् पवित्र एवैकः । प-
वित्रोऽत्राखिलो जनः ॥ १ ॥ इंद्रदत्तमहीपालः । पालयामास तत्पुरं ॥ श्यामाप्यसिलता यस्य
। सुषुवे विशदं यशः ॥ २ ॥ भिन्नभिन्नजननीजाताः । तस्य द्वाविंशतिः सुताः ॥ उपोपाध्याय-
मध्येतुं । प्रावर्ततांखिलाः कलाः ॥ ३ ॥ सुबुद्धिसचिवस्योप—मंदिरं संचरन्नृपः ॥ अधित्यका-
यां खेलंतीं । तस्य कन्यामवैक्षत ॥ ४ ॥ तद्रूपमोहितो नूमा—नन्यर्थ्य सचिवं शुचिः ॥ अ-
चिरात्परिणिन्ये तां । सर्वकार्येषु स प्रभुः ॥ ५ ॥ मंत्री तामिति शास्तिस्म । स्वयभूः पुत्रि

उप० मास्म भूः ॥ संध्याभ्रवद्भवदोषाः । क्षणरागा हि भूभुजः ॥ ६ ॥ श्रेयःप्रयोजनां प्राची–मिव
प्राक् पद्मिनीपतिः ॥ सरागां त्वामसौ राग—सागरः संगमिष्यति ॥ ७ ॥ यदादिशति य-
चिंता० द्वत्ते । यद् ब्रूते यच्च चेष्टते ॥ त्वय्यसौ प्रथमस्नेहा—त्तत्सर्वं मे निवेदयेः ॥ ८ ॥ सापि
२३० सर्वं तथा चक्रे । तदुक्तं मंत्रिपुंगवः ॥ लिलेख पत्रके शेषं । दीर्घदर्शी न सीदति ॥ ९ ॥
गौरवं जनमाना सा । पत्युः सर्वोत्तरं चिरं ॥ मुक्ताफलं शुक्तिरिव । क्रमाद्गर्भमधारयत् ॥
॥ १० ॥ कालेन तां विसस्मार । भूपो विद्यामित्रालसः ॥ अवश्या यस्य राज्ञश्च । स्नेहस्तिष्ठति
किं चिरं ॥ ११ ॥ मंत्री निन्ये निजं गेहं । गुर्विणीं गौरवेण तां ॥ गतिः पितृगृहं स्त्रीणां ।
। द्विधापि पतिधिक्कृतौ ॥ १२ ॥ अशेषदोषनिर्मुक्ते । दिवसे शिवसेवधौ ॥ सुरेंद्रदत्तनामानं
। सा सुखं सषुवे सुतं ॥ १३ ॥ अग्निकः पर्वतश्चैव । बहुली सागरस्तथा ॥ दासेया इति च-
त्वार—स्तेनैधांचक्रिरे सह ॥ १४ ॥ अन्योऽन्यं तस्य तेषां च । तुल्याहजन्मनामपि ॥ स-
हकारकरीराणा—मिव भेदो महानभूत् ॥ १५ ॥ कलाविलासभवना—द्गुरोरध्याप्यतेस्म
सः ॥ मातामहेन संजाता—वसरः सकलाः कलाः ॥ १६ ॥ श्रृंगारमिव श्रृंगारं । महिला

ग्रहिला इव ॥ विषदिग्धमिव स्निग्धं । क्रीडाः पीडा इवाखिलाः ॥ १७ ॥ अग्नितापमिवा-
लापं । जोगान् रोगानिव स्मरन् ॥ अधीयन्नेकतानोऽभूत् । श्रुत एव स लालसः ॥ १० ॥
विश्वाधिक्येन विश्वासु । कलासु विललास सः ॥ जातकातरनिर्वेदे । धनुर्वेदे विशेषतः ॥
॥ १ए ॥ तत्रापि स तथा धीरो । राधावेधे व्यजृंजत ॥ यथा ययौ धनुष्मत्सु । पार्थस्याश्ला-
घितां यशः ॥ २० ॥ तस्य साधयतो राधा—वेधं विद्यागुरोः पुनः ॥ दासेयाः स्खलनं चक्रु—र्न
तु चुक्षोज सोऽन्वयः ॥ २१ ॥ द्वाविंशतिः कुमारास्ते—ऽधीयानाः शिथिलादरं ॥ धर्षिता गु-
रुणा रुक्ष—वाचस्तं प्रतिचुक्रुशुः ॥ २२ ॥ आचार्यः शिक्षयामास यदि कंबादिना मनाक्
॥ तदा जीवन्मृतं चक्रु—स्तं ते संभूय वैरिवत् ॥ २३ ॥ प्राप्ताः क्रमेण क्रमेण । वर्धिता मृ-
दवो ह्यमी ॥ नार्हति ताडनामेव—मूचुस्तन्मातरोऽपि तं ॥ २४ ॥ अक्षरप्रक्षरानर्हा—स्तां-
स्ततः स्वैरचारिणः ॥ न शिक्षा गोचरीचक्रे । स सादी शूकलानिव ॥ २५ ॥ इतश्चास्ति ध-
निवाता–विधुरा मथुरापुरी ॥ अन्वर्थनामा तत्राभू–ज्जितशत्रुर्नरेश्वरः ॥ २६ ॥ कन्यारत्नं निः-
सपत्नं । तस्याजायत निर्वृतिः ॥ निर्वृतिं नार्थयामासुः । पश्यंतो योगिनोऽपि यां ॥ २७ ॥ ज-

ज्ञिन्नयौवनाधीत–श्रुता पादौ प्रणम्य सा ॥ पद्मगर्भे मरालीव । क्रोडे निविविशे पितुः ॥
॥ २८ ॥ रूपशिल्पैकसीमां तां । धातुर्निध्याय नंदिनीं ॥ प्रियः कस्ते वरो वत्से । पप्रछेति न-
रेश्वरः ॥ २९ ॥ धीरो धियां निधी राधा—वेधं साधयतीह यः ॥ स एव मे वरोऽस्त्वेवं ।
प्रत्युत्तरयतिस्म सा ॥ ३० ॥ अथ प्रस्थापयामास । चतुरंगचमूवृतां ॥ समं वृद्धैः कुलामात्यै
–र्नृवरस्तां स्वयंवरां ॥ ३१ ॥ स्पृशती शतशो देशा–न्न च क्वचन नृपतौ ॥ पुष्पंधयीव धत्तूर
—पुष्पे प्रीतिं बबंध सा ॥ ३२ ॥ इंद्रदत्तस्य पुत्रौघं । शृण्वती श्रुतपारगं ॥ आगत्येंद्रपुरं
बाला । चिराद्विश्राममाप सा ॥ ३३ ॥ इंद्रदत्तो नदत्तूर्य—स्तोमस्तामुत्सवैर्नवैः ॥ पुरं प्रवेश्य
विपुले । स्थापयामास मंदिरे ॥ ३४ ॥ निर्वृतिं नृपतिर्वीक्ष्य । तां मूर्तामिव निर्वृतिं ॥ मत्सू-
नोः कतमस्येयं । भवितेति व्यचिंतयत् ॥ ३५ ॥ चंचदुल्लोचरोचिष्णु—जिष्णुजिष्णुसदस्त-
दा ॥ ब्रह्मांडमिव संक्लिष्टं । शिल्पिनो मंडपं व्यधुः ॥ ३६ ॥ तस्यांतः कांचनं रत्न–प्रत्नासं-
भारभासुरं ॥ तनुतामागतं मेरु—मिव स्तंभं निचिक्षिपुः ॥ ३७ ॥ चतुष्टयतया भ्राम्यं–त्यनु-
लोमविलोमतः ॥ महावेगानि ते चक्रा—ण्यष्टौ तदुपरि न्यधुः ॥ ३८ ॥ तेषामुपरि राधेति।

उप० प्रसिद्धां शालभंजिकां ॥ अधोमुखीं सलज्जां दृष्टु—मिव ते समतिष्टिपन् ॥ ३९ ॥ रचितोदा-
रशृंगाराः । कुमारास्तत्र तेऽखिलाः ॥ लीलालसपदा भूपे-नाहूताः समगंसत ॥ ४० ॥ श्रीमा-
चिंता० ली प्रथमस्तेषु । पुत्रः पित्राभ्यधीयत ॥ युष्मान् विचक्षणान् श्रुत्वा । राजकन्येयमाग-
२३३ ता ॥ ४१ ॥ अधोदृगास्यराधाया । विध्यन् वामकनीनिकां ॥ त्वमिमां निर्वृतिं भूस्था—
मिव रंजामुरीकुरु ॥ ४२ ॥ ॐमित्युक्त्वा ययौ स्तंभा—भिमुखं सोऽपि वर्ष्मणा ॥ परं प-
लायितुं पश्चा—न्मनसा व्यमृशद्दिशं ॥ ४३ ॥ अधोदृग् धनुषा बाणं । मुंचन्निति जजल्प सः
॥ यत्र वा तत्र वा यातु । मुक्तः श्रीमालिना शरः ॥ ४४ ॥ अंतरा स्खलितश्चक्रै । राधामप्रा-
प्नुवन् शरः ॥ स्वनायकाय पूत्कर्तु—मिव पश्चाद्व्यवर्तत ॥ ४५ ॥ उत्तालतालिकादाना—
ज्जने कोलाहलाकुले ॥ कथंचिन्मंडपात्पाशा-दिव रंकुः स निर्ययौ ॥ ४६ ॥ द्वितीयोऽथ सु-
तो राजा । राधावेधाय ढौकितः ॥ न हस्तलाघवाद्भक्त । इवाग्रजमतीयिवान् ॥ ४७ ॥ एव-
मेव कुमारेषु । च्युतेषु ह्यपरेष्वपि ॥ शुचा मुदा च मूर्धान-मधुन्वत सुहृद्खलाः ॥ ४८ ॥
सिंहाकृतीनपि क्रोष्टा—यितांस्तान् वीक्ष्य दक्षिणा ॥ स्वपाणिपीडनस्याशा—मपि तत्याज

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्वृतिः ॥ ४ए ॥ राजा तु हृतसर्वस्व । इव दूनमना जुवं ॥ रसातले प्रवेशार्थ—मिवाधो दृष्टिरैक्षत ॥ ५० ॥ रंजास्तंजैरिवासारै—रंतश्चेतोहरैर्बहिः ॥ पुत्रैः स्वकुलसौधस्या-वष्टंजं कः समीहते ॥ ५१ ॥ मन्ये द्वाविंशतिः पुत्रा । रुद्राद् द्विगुणिता अमी ॥ मम स्फूर्तियशःसृ-ष्टि-संहारायैव जज्ञिरे ॥ ५२ ॥ अनंदनं कुलं श्रेयो । न पुनर्निंद्यनंदनं ॥ अविहंगो वरं वृ-क्षो । न तु गृध्रविहंगमः ॥ ५३ ॥ बालस्वभावलोलानां । यद्वामीषां न दूषणं ॥ स हि वृ-त्तिं मुधा गृह्ण—न्नुपाध्यायोऽपराध्यति ॥ ५४ ॥ एवं विषादविद्धाय-वदनं मेदिनीपतिं ॥ उ-वाच सचिवो देव । किमेवमनुशय्यते ॥ ५५ ॥ पंचभिः कुलकं ॥ अद्यापि मम दौहित्रः । पुत्रोऽस्ति विजयी तव ॥ यः स्वबंधुकृतं वत्स—मालिन्यं तेऽपनेष्यति ॥ ५६ ॥ नाथ पुत्रकु-पुत्राणां । संप्रत्यंतरमीक्ष्यसे ॥ जेदः सिंहशुनां हि स्यात् कुंभिकुंजभिदि स्फुटः ॥ ५७ ॥ स्मरामि न च तस्याह—मिति जल्पति भूभुजि ॥ पत्रकं दर्शयामास । स निधेरिव शासनं ॥ ५८ ॥ सोऽस्मरत्पत्रके दृष्टे । सर्वानुजवसाक्षिणि ॥ चिरदृष्टं स्वप्नमिव । मंत्रिपुत्र्याः करग्र-हं ॥ ५ए ॥ अथ तस्याज्ञया मंत्री । सारशृंगारसुंदरं ॥ सुरेंद्रदत्तमानैषी—न्मनीषी भूभुजों-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिकं ॥ ६० ॥ दृष्ट्वाश्रुदंजतो नृपः । पूर्वदुःखं वमन्निव ॥ हृदा सुहृढमालिंग्य । क्षणमंकं निनाय नं ॥ ६१ ॥ राधावेधेन वत्स त्वं । कुमारीं वृणु निर्वृतिं ॥ अनिर्वृतानामेवं स्ता—दस्माकमपि निर्वृतिः ॥ ६२ ॥ इति तातगिरा जाता—वष्टंजः स्तंजः सन्निधौ ॥ द्रोणीं निवेशयामास । स तैलपरिपूरितां ॥ ६३ ॥ स वंदित्वा कलाचार्यं । तद्दृशि द्विगुणोद्यमः ॥ पूजयामास बाणेन । समं चापमचापलः ॥ ६४ ॥ संधाय त्रिशिखं तीक्ष्ण—मुखं धनुषि स क्षणं ॥ अतिष्टत्तैलसंक्रांत—चक्रविश्रांतलोचनः ॥ ६५ ॥ ऊर्ध्वमुष्टिमधोदृष्टि—मेनमेकांतनिश्चलं ॥ परीषहा इव मुनिं । कुमारास्ते हसंस्तरां ॥ ६६ ॥ स्फुरद्भिः परितः कायं । स्पृशद्भिः क्षोभितोऽपि सः ॥ तैर्दासैर्नैं चुक्षोज । कषायैरिव साधकः ॥ ६७ ॥ स्खलितश्चेत्तदा मूर्ध्ना । विमुक्तोऽसीति वादिनौ ॥ उत्रौ तमजितोऽस्थातां । खङ्गव्यग्रकरौ नरौ ॥ ६८ ॥ लघुहस्ततया तेन । प्रेषितोऽवसरे शरः ॥ अतिचक्राम चक्राणि । कर्माणीवाष्ट संयमी ॥ ६९ ॥ राधां सर्वोपरि स्थित्वा । सापराधामिवाशुगः ॥ स वामदृष्टिं विव्याध । साधुरस्य हि नायकः ॥ ॥ ७० ॥ मिलिताः कुतुकं दृष्टुं । व्योमन्यमरखेचराः ॥ पुष्पवृष्टिं व्यधुस्तस्य । मौलौ स्तुति-

For Private and Personal Use Only

परायणाः ॥ ७१ ॥ नदत्षट्पददंभेन । तत्कीर्तेरिव गायिनीं ॥ राजकन्या निचिक्षेप । तत्कंठे वरणस्रजं ॥ ७२ ॥ परस्परगुणक्रीतौ । तुल्यौ रूपवयोगुणैः ॥ भूमानुद्वाहयामास । तावथ प्रथितोत्सवं ॥ ७३ ॥ अभ्यासहीनस्य नरस्य राधा—वेधो दुराराधतया प्रसिद्धः ॥ यथा तथा पुण्यविना कृतस्य । नृजन्म दुःप्रापतयांगभाजः ॥ ७४ ॥ इति सप्तमदृष्टांतः. ॥

अथाष्टमकूर्मदृष्टांतः—अनेकयोजनायाम-विस्तारोऽस्ति महाह्रदः ॥ यस्य न क्षीयते जातु । नीरं क्षीरोदधेरिव ॥१॥ क्वचिन्नक्राः क्वचिद् ग्राहाः । क्वचिद्भेकाः क्वचिज्झषाः ॥ वसंति यत्र न-गरे । नानावर्णा इवाजयाः ॥२॥ दुर्भेदैराशुगौघस्य । प्रभूतपुटशालिभिः ॥ यस्योपरिष्टाच्छैवालैः । प्रवरप्रच्छदायितं ॥ ३ ॥ तत्राभूत्कच्छपः कोऽपि । यश्चिरायुरवेदत ॥ पुत्रपौत्रप्रपौत्रादि— संतानं सकलं स्वकं ॥४॥ अन्यदा वायुवशतो । विशीर्णे क्वापि शैवले ॥ उदग्रीवं शारदं वि-श्वा—प्यायनैकविशारदं ॥ ५ ॥ इंदुमंडलमद्राक्षी—दुडुमंडलमंडितं ॥ मिथ्यादृष्टिर्जिनमि-व । मोहे क्षीणे कथंचन ॥ ६ ॥ युग्मं ॥ स स्वेषामीदृशं तत्वं । दर्शयामीति चिंतयन् ॥ ॥ जवाद्ययौ ह्रदस्यास्य । तलं स्वजनवत्सलः ॥७॥ यावत्कुटुंबमादाय । कूर्मः सत्वरमाययौ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तावन्निमेष शेवाल—पटलं पवनेरितं ॥ ७ ॥ भ्रमं भ्रमं ह्रदं सर्वं । स निर्वेदमुपागतः ॥
नालुलोके पुनश्चंद्रं । चिंतारत्नमिव च्युतं ॥ ८ ॥ स नदेऽत्र कदाप्यशारदः । कमठः शारदमिं
दुमीक्षते ॥ न पुनर्मनुजो रजोधिको । मनुजत्वं पुनरेति संस्तृतौ ॥ १० ॥ इत्यष्टमदृष्टांतः. ॥
अथ नवमयुगदृष्टांतः—यो वयस्यमिवालिंग्य । जंबूद्वीपं स्थितः सदा ॥ द्विलक्षयोज-
नायामो । जात्यसौ लवणोदधिः ॥ १ ॥ परिधौ योजनानां यो । लक्षाः पंचदशाधिकाः ॥ अ-
वगाहे पुनस्तेषां । सहस्रं कथितं जिनैः ॥ २ ॥ पातालकलशा यत्र । चत्वारो लक्षयोजनाः
कमलौघं वर्धयितुं । वार्धेर्वार्धुषिका इव ॥ ३ ॥ कर्कोटाद्याद्रयः स्थैर्यं । यत्र वीच्यस्तु चापलं
॥ मिथः संगेऽपि नोज्झंति । स्वभावः खलु दुस्त्यजः ॥ ४ ॥ तिमिंगिलादयो मत्स्याः । प्र-
सारितमुखाः सुखं ॥ क्रोडे क्रीडंति निर्भीकं । यस्य वप्तुरिवांगजाः ॥ ५ ॥ क्वचिदापीड्य वै-
लोम्या—ल्लोकं जाततृपा इव ॥ सूर्याद्या यस्य लीयंते—ऽत्युच्चतोयशिखांतरे ॥ ६ ॥ भ्रांति
द्वीपाः परे लक्षा । अधृष्या यत्र वारिणा ॥ कल्लोलाहतसत्वौघ—मुपकर्तुमिवोत्थिताः ॥ ७ ॥
अमरः कौतुकी कोऽपि । तत्पूर्वापरकूलयोः ॥ तत्संगमविनोदेच्छु–र्युगं शम्यां च मुंचति ॥

For Private and Personal Use Only

उप० चिंता० १३८

॥ ८ ॥ पृष्टानुपाति पवना—ऊावत्यपरतो युगं ॥ शम्या च पूर्वतो देशां—तरे जिन्ना हि वायवः ॥ ए ॥ न रुऊा शैलाद्यैर्न परिशटिता नीरनिवहै—र्युगच्छिडं शम्या कथमपि कदाचिद्विश- ति सा ॥ प्रमादप्राबल्यादकृतसुकृतो मानवजवा—परिज्रष्टो जूयो न जवति मनुष्योऽत्र तनुमान् ॥ १० ॥ इति नवमदृष्टांतः.

अथ दशमपरमाणुदृष्टांतः—दृष्टुकामः स्वसामर्थ्य—ममरः कोऽपि कौतुकी ॥ श्व- दणचूर्णीकृतं स्तंजं । निनाय परमाणुतां ॥ १ ॥ तैः पुजलैः स नलिकां । चर्मचक्षुरगोचरैः ॥ आपूर्यागमछुत्तुंगं । शृंगं मेरुमहीजृतः ॥ २ ॥ नलिकायंत्रयोगेन । रंहस्वति नजस्वति ॥ पुजलांस्तान्निचिक्षेप । काष्टास्वष्टासु निर्जरः ॥ ३ ॥ यंत्रनिर्युक्तमात्रास्ते । दूरं बिजेदिरेऽण- वः ॥ चिरसंघट्टजां बाधां । जिहासव इव क्षणात् ॥ ४ ॥ स्वशक्तितो विधातेव । देवस्तैरेव पुजलैः ॥ कर्तुं तथाविधं स्तंज—मदंजः प्राजुतत्पुनः ॥ ५ ॥ करोत्यनूनाधिकमेव देवः । क- दापि तं स्तंजमिहाणुजिस्तैः ॥ प्राप्नोति मानुष्यजवाच्च्युतोंगी । पुनर्न मानुष्यमकृतपुण्य ॥ ६ ॥ इति दशमदृष्टांतः. ॥ इत्युक्ता दशापि दृष्टांताः. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह यथा मानुष्यस्य दशभिर्दृष्टांतैर्दुर्लभत्वमुक्तं, तथाग्रतः क्षेत्रकुलादीनामपि प्रत्येकं वाच्यं. यथाह भाष्यकारः—दसहिं उदाहरणेहिं । दुलहं मणुयत्तणं जहा भणियं ॥ तह जाइकुलाईणिवि । दसदिहंतेहिं दुल्लहाई ॥ १ ॥ अथ निगोदवासादारभ्य यथा जीवः क्र-मेण मानुष्यं लभते तथाह—

॥ मूलम् ॥—इह सव्वेसिं जियाणं । तिरियगई होइ आइमं ठाणं ॥ तिव्थंकराविजम्हा । वासिंसु पुव्वं निगोएसु ॥ २ ॥ व्याख्या—इह तावत्तिर्यग्गतिः सर्वेषां जीवानामादिमं प्रथमं स्थानं वासभूमिर्वर्तते, यस्मात्कारणादास्तां देवनारकादयस्तीर्थंकरा अपि भगवंतस्त्रसत्वलब्धेः पूर्वं निगोदेषु सूक्ष्मसाधारणशरीरेष्ववात्सुः. निगोदाश्च तिर्यग्योनिका एवेति प्रतीतं प्रवचन-ज्ञानात्. अयमर्थः—यदि नाम त्रिभुवनप्रभवस्तीर्थंकरा अपि प्रथमं निगोदवासमासंसारम-नुभूय ततस्त्रसत्वं प्राप्य सिध्यंति, ततः किमुच्यते शेषजीवानां? उक्तं च—अव्ववहारनि-गोएसु । ताव चिहंति जंतुणो सव्वे ॥ पढमं अणंतपुग्गल—परियट्टे थावरत्तेण ॥ १ ॥ अथैषु निगोदेषु जीवो यथा वसति तथाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—तेसु अणंतजीएहिं । समजम्माहारदेहऊसासो ॥ कम्मवसो वसइ जिउ । अणंतपुग्गलपरिअट्टे ॥ ४ ॥ व्याख्या—जीवः प्राणी तेषु निगोदेष्वव्यावहारिकेष्वनंतानपरिमितान् पुद्गलपरावर्तान् वसति तिष्ठति. कालस्यानादित्वादाकालं च निगोदेषु वासात्तद्वासकालस्यानंतानंतैरपि पुद्गलपरावर्तैः संख्यां कर्तुं न पार्यत इत्यर्थः. कथंभूतो जीवः? अनंतैरनंतलोकाकाशप्रदेशप्रमाणैर्जीवैः सह समाः समकालभाविनो जन्माहारदेहोच्छ्वासा यस्य स तथा. उक्तं च प्रज्ञापनायां—समगं वक्कत्ताणं । समगं तेसिं सरीरनिव्वत्ती ॥ समगं आणुग्गहणं । समगं ऊसासनिसासो ॥ १ ॥ साहारणमाहारो । साहारणमाणपाणगहणं च ॥ साहारणजीवाणं । साहारणलक्खणं एअं ॥ २ ॥ ननु किमसावत्यंतविषमेषु तेष्वियंतं कालं तिष्ठतीत्याह—'कम्मवस्सेत्ति' हेतुद्वारेण विशेषणमिदं, ततः कर्म ज्ञानावरणादिकं साधारणकर्म वा तद्वशः, यथा ह्यनिच्छन्नपि सापराधः कोऽपि कुपितभूपतिनिर्दिष्टदुष्टारक्षकवेष्टिते श्लथसंधिबंधपतयालुभित्यंतरालकृतालयफणिस्फाफूत्कारभीषणे तीक्ष्णतरतुंडामजाग्रयूकामत्कूणमशकप्रायक्षुद्रजंतुसंततिसारितनरककुहरे कुहुरजनीजित्वरप्रसृत्वर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषमतमतमःपूरितेऽपि चारकगृहे राजानुरोधात्सुचिरमत्र तिष्ठते, तथा कर्मपरवशः प्राण्यनंतानंतजंतुसंघट्टकष्टेष्वपि निगोदेष्वनंतान् पुद्गलपरावर्तानिति भावः. अथ कोऽयं पुद्गलपरावर्त इत्युच्यते—इह यदा सर्वलोकवर्तिनः सर्वानपि पुद्गलान् संसारे संसरन्नेको जीवोऽनंतानंतैर्भवैरौदारिकवैक्रियतैजसकार्मणभाषानपानमनोरूपतया परिणमय्य मुंचति तदासौ पुद्गलपरावर्त इत्युच्यते. अन्ये त्वाचार्या द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा पुद्गलपरावर्तमाहुः. अयं चैकैकोऽपि द्विधा, बादरः सूक्ष्मश्चेति, तत्र यदा संसारे भ्राम्यतैकेन जीवेन सर्वेऽपि पुद्गलाः सामान्येनौदारिकवैक्रियतैजसकार्मणशरीररूपतया परिणमय्य मुच्यंते तदा द्रव्यतो बादरः पुद्गलपरावर्तः. यदा तूक्तशरीरचतुष्टयमध्ये प्रत्येकमेकैकशरीररूपतया सर्वेऽपि पुद्गलाः परिणमय्य विसृज्यंते, विवक्षितशरीराच्छेषशरीररूपतया परिणमिता न गण्यंते तदा द्रव्यतः सूक्ष्मोऽसौ भवति. क्षेत्रतस्त्वनंतानंतैर्भवैर्निरंतरेषु व्यवहितेषु वान्यान्याकाशप्रदेशेषु म्रियमाणो यदा सर्वानपि लोकाकाशप्रदेशान् स्पृशति तदा बादरपुद्गलपरावर्तः. यदा पुनर्येष्वाकाशप्रदेशेष्वेकदा मृतस्तेषामेवानंतरेष्वन्यान्येष्वाकाशप्रदेशेषु म्रियमाणो नानाभवैः सर्वान-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पि लोकाकाशप्रदेशान् स्पृशति पूर्वमरणावगाढनभःप्रदेशेभ्य एकेनापि प्रदेशेन व्यवहितेषु तेष्वेव वा प्रदेशेषु म्रियमाणो न गण्यते तदा सूक्ष्मः पुद्गलपरावर्तः. कालतस्तु यदोत्सर्पिण्यवसर्पिणीरूपकालचक्रसमयेषु सर्वेष्वपि क्रमेणोत्क्रमेण वानंतानंतैर्भवैरेको जंतुर्मृतो भवति तदा बादरः पुद्गलपरावर्तः. यदा पुनरादितोंतं यावत्सकलानपि कालचक्रसमयान् प्रथमद्वितीयतृतीयादिसमयक्रमेणाव्यवहितानेव नानामरणैर्जीवः स्पृशति तदा सूक्ष्मपुद्गलपरावर्तः. इह विवक्षितमरणसमयादेकेनापि समयेन व्यवहितेषु तेष्वेव वा समयेषु म्रियमाणो न गण्यते. अथ भावतः पुद्गलपरावर्त उच्यते—

इह ये एकस्मिन् समये सूक्ष्माग्निकायिका जीवा उत्पद्यंते तेऽसंख्यलोकाकाशप्रदेशराशिप्रमाणास्तेभ्यस्तु सूक्ष्माग्निकायिकाः सर्वेऽप्यसंख्यगुणाः, यत एकः सूक्ष्माग्निकायिकोंतर्मुहूर्तं जीवति, सर्वसूक्ष्मजीवानामेतावन्मात्रायुष्कत्वात्. तस्मिंश्चांतर्मुहूर्ते ये समयास्तेषु प्रत्येकमसंख्यलोकाकाशप्रदेशप्रमाणाः सूक्ष्माग्निकायिका उत्पद्यंते, अतः सिद्धं. एकसमयजेभ्यः सूक्ष्माग्निकायिकेभ्यः सर्वेषां तेषामसंख्येयगुणत्वं, तेभ्योऽपि तेषां कायस्थितिरसंख्येयगुणा, ए-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कैकस्यापि सूक्ष्माग्निकायिकस्यासंख्योत्सर्पिण्यवसर्पिणीरूपायाः कायस्थितेरुक्तत्वात्. ततोऽप्यनुभागबंधाध्यवसायस्थानान्यसंख्येयगुणानि, कायस्थित्यामसंख्येयानां स्थितिबंधानां भावात्. एकैकस्मिंश्च स्थितिबंधेऽसंख्येयानामनुभागबंधाध्यवसायस्थानानां सद्भावात्, संयमस्थानान्यप्यनुभागबंधाध्यवसायस्थानैस्तुल्यान्येव, तत्र यदैकैकस्मिन्ननुभागबंधाध्यवसायस्थाने क्रमेणोत्क्रमेण वा म्रियमाणो जंतुः सर्वाण्यप्येतानि स्पृशति तदा बादरपुद्गलपरावर्तः. यदा तु येनैव विशुद्धविशुद्धतमादिक्रमेण व्यवस्थितान्येतान्यनुभागबंधाध्यवसायस्थानानि तेनैव क्रमेण नानाभवैर्म्रियमाणः सर्वाण्यपि स्पृशति, व्यवहितानि तु स्पृष्टान्यपि न गण्यंते तदा सूक्ष्मो भावपुद्गलपरावर्तः. ॥ ४ ॥ तदेवमनादिनिगोदवासमुपदर्श्याथ ततो निर्गतस्य जंतोः स्वरूपमाह—

॥ मूलम् ॥—कह कहवि तउ मुक्को । निगोयअयसंकलाइगहिलोव्व ॥ अइगहणे भवगहणे । भमइ जिउ विविहवेसेहिं ॥ ५ ॥ व्याख्या—ततो निगोदवासानंतरं, निगोदा एव सुचिररोधकत्वादयःश्रृंखला लोहदाम, तस्याः कथमपि छद्मस्थालक्ष्येण प्रकारेण मुक्तो

निर्गतो जीवो विविधैः पृथ्व्यप्तेजोवायुवनस्पत्यादिभिरतिगहनेऽत्यंतगुपिले नवगहने संसारकांतारे ग्रथिल इव भ्रमति. यथा ग्रथिलो लोहशृंखलाबद्धः सुचिरमपि तिष्ठति, ततश्च कथमपि मुक्तो विविधैर्विकलोचितैर्वेषैर्भ्रमतीत्यर्थः. ॥ ५ ॥ अथ यत्र नवे यावंतकालं भ्राम्यति तावंतमाह—

॥ मूलम् ॥—साहारणेसुणंतं । संखाइअं परित्तजोणीसु ॥ तसकाए संखिज्जं । कालं परियट्टए जीवो ॥ ६ ॥ व्याख्या—इह ये एकस्मिन् देहे समयभाषया निगोद इति प्रसिद्धेऽनंता जीवाः पूर्वोक्तयुक्त्या संभूय तिष्ठंति, ते खलु वनस्पतिकायिकाः साधारणदेहवासित्वात्साधारणा इत्युच्यंते, एते च सूक्ष्मबादरभेदाद् द्विधा. ये च एकैकस्मिन् देहे एकैकतया वसंति ते जीवाः परित्तयोनयः प्रत्येकयोनयो वाभिधीयंते, ते च पृथ्व्यप्तेजोवायुवनस्पतिभेदात्पंचधा. तत्र पृथ्व्यप्तेजोवायवः सूक्ष्मा बादराश्च नवंति, प्रत्येकवनस्पतयस्तु बादरा एव, तथा त्रस्यंति बुद्धिपूर्वमितश्चलंतीति त्रसा द्वित्रिचतुःपंचेंद्रियभेदाच्चतुर्धा. एवं जीवस्वरूपमुपदर्श्याथ गाथार्थ उच्यते—स विवक्षितो जीवः साधारणेष्वेव भ्राम्यन् भूयःस्वपि नवेषु नै-

रंतर्येण साधारणत्वममुंचन् जघन्यतोंतर्मुहूर्तमुत्कृष्टतोऽनंतं कालमनंतोत्सर्पिण्यवसर्पिणील-क्षणं परिवर्तते. ततः परमवश्यं प्रत्येकत्वं त्रसत्वं वा प्रतिपद्यते, एतद्व्यावहारिकनिगोदा-पेक्षं. यदाह—तह कम्मठिई काला—दउ विसेसे पडुच्च किर जीवे ॥ नाणाऽवणस्सइणो । जे संववहारबाहिरिया ॥ १ ॥ इह व्यवहाराव्यवहारराशिभेदाज्जीवानां द्वैविध्यं सूत्रे सा-क्षादनुक्तमपि प्रतिपत्तव्यं. यदाह प्रज्ञापनावृत्तिकारः—

इह द्विविधा जीवाः सांव्यवहारिका असांव्यवहारिकाश्च, तत्र ये निगोदावस्थात उ-द्धृत्य पृथिवीकायादिके भावे वर्तंते ते संव्यवहारमनुपतंतीति सांव्यावहारिका उच्यंते, ते च यद्यपि भूयोऽपि निगोदावस्थामुपयांति तथापि ते सांव्यावहारिका एव, व्यवहारपतितत्वात्. ये त्वनादिकालादारभ्य निगोदावस्थामुपगता एव ते व्यवहारपथातीतत्वादसांव्यवहारिका इति. एषानंतोत्सर्पिण्यवसर्पिणीलक्षणा साधारणेषु कायस्थितिः सूक्ष्मबादरविशेषं विना सामान्य-तः प्रतिपत्तव्या. यत्प्रज्ञापनासूत्रं—निगोएणं भंते निगोएत्ति कालउ केवचिरं होइ? गोय-मा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं अणंताउ उसप्पिणीउसप्पिणीउ कालाउ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खित्तसो अट्ठाइज्जा पुग्गलपरियट्टा. यदि पुनः सूक्ष्मेषु बादरेषु वा साधारणेषु पृथक्पृथक्का-
यस्थितिश्चिंत्यते तदाद्येष्वसंख्येयोत्सर्पिण्यवसर्पिण्य इतरेषु तु सप्ततिः सागरकोटाकोट्यः. उक्तं
च–सुहुमनिगोएणं नंते पुच्छा, गोयमा! जहन्नेणमंतोमुहुत्तमुक्कोसेणमसंखिज्जं कालमसंखिज्जाउ
उसप्पिणीउसप्पिणीउ कालउ, खित्तउ असंखिज्जा लोगा. बायरनिगोएणं पुच्छा, गोयमा! ज-
हन्नमंतोमुहुत्तमुक्कोसेणं सत्तरिसागरोवमकोमाकोमीउ. तथा स एव जीवो निगोदेन्य उध्धृ-
त्य यदि परित्तयोनिषु भ्राम्यति तदा सामान्यतः परित्तत्वममुंचयन् जघन्यतोंतर्मुहूर्तं, उत्कृ-
ष्टतः संख्यातीतं कालमसंख्येयोत्सर्पिण्यवसर्पिणीरूपं परिवर्तते. उक्तं च–कायपरित्तेणं पुच्छा,
गोयमा! जहन्नमंतोमुहुत्तं, उक्कोसमसंखिज्जं कालमसंखिज्जाउ उसप्पिणीउसप्पिणीउ कालउ,
खित्तउ असंखिज्जा लोगा. यदा पुनः सामान्यतः प्रत्येकानामेव पृथ्व्यादिन्नेदेन प्रत्येकं काय-
स्थितिश्चिंत्यते तदैवं–पुढवीकाइएणं पुच्छा, गोयमा! जहन्नमंतोमुहुत्तमुक्कोसेणमसंखिज्जं कालं
असंखिज्जाउ उसप्पिणीउसप्पिणीउ कालउ, खित्तउ असंखिज्जा लोगा. एवमाउतेउवाउका-
इयावि. वनस्पतयस्तु सामान्यतः साधारणमिश्रिता एव नवंतीति न तेषां चिंता कृता, य-

For Private and Personal Use Only

दा तु सूक्ष्मबादरभेदेन प्रत्येकमेषां कायस्थितिर्भिरूयते, तदैवं—सुहुमपुढविकाइएणं भंते पुछा, गोयमा! जहन्नमंतोमुहुत्तं, उक्कोसेणमसंखिज्जं कालं असंखिज्जाउ उसप्पिणीउसप्पिणीउ कालउ, खित्तउ असंखिज्जा लोगा. एवं सुहुमआउकाइए तेउकाइए वाउकाइएवि. सूक्ष्मवनस्पतयस्तु प्रत्येका न भवंतीति नोदाहृताः, प्रत्येककायस्थितेः प्रयुक्तत्वात्. बायरपुढविकाइएणं भंते पुछा, गोयमा! जहन्नमंतोमुहुत्तं, उक्कोसं सत्तरिसागरकोडाकोडीउ, एवं बायरआउबायरवाउबायरतेउकाइए पत्तेयसरीरबायरवणस्सइकाइएवि. तथा स एव जंतुरनादिनिगोदवासमुत्सृज्य पृथिवीकायिकादिभवक्रमेण मूलत एव त्रसकायं प्राप्य तद्भावममुंचन् जघन्यतोंतमुहूर्तमुत्कृष्टतः संख्येयं कालं संख्येयानि सागरोपमाणि परिवर्तते. उक्तं च—तस्सकाएणं भंते पुछा, गोयमा! जहन्नेणमंतोमुहुत्तं, उक्कोसंदोसागरोवमसहस्साइं, संखिज्जवासमब्भहियाइंति. यद्यप्ययमालापकः सामान्यत्रसविषयः प्रवर्तते, इह च मनुष्यभवदुर्लभतायां मनुष्यवर्जा एव त्रसा विवक्षितास्तथापि संख्येयकालतोच्यमाना न विरुध्यते, केवलविकलेंद्रियाणामपि कायस्थितेः संख्येयकालत्वेन भणनात्. तथा च जीवसमाससूत्रं—

विगलेसु संखिज्जो कालोत्ति यदा तु त्रसानामेव द्वींद्रियादिभेदेन कायस्थितिश्चिंत्यते तदेवं-बेंदिएणं भंते पुछा, गोयमा! जहन्नेणमंतोमुहुत्तं, उक्कोसेणं संखिज्जं कालं, एवं तेइंदियचउरिंदियाणवि. पंचेंद्रियतिरश्चां तु कायस्थितिः काप्युक्ता न दृष्टेति न लिखितेति गाथार्थः. नन्वेवं परिवर्तमानाः सर्वेऽपि जीवा मानुष्यमासादयेयुराहोश्चित्केचिदेवेत्याशंक्याह—

॥ मूलम् ॥—एवं परिभ्रमंतो । भवकंतारे दुहेहिं परितत्तो ॥ कप्पतरुंव दरिद्दो । कहवि लहइ कोइ मणुअत्तं ॥ ७ ॥ व्याख्या—स्पष्टा, ननु कोऽयं विशेषो येनेतरभवेभ्यो मानुष्यमेव सर्वसारमुच्यते? इत्याह—

॥ मूलम् ॥—नाणेण केवलेणं । पुरिसे जिणगणहराइजम्मेण ॥ चरणंमि सव्वविरई । को भव तुलइ माणुस्सं ॥ ८ ॥ व्याख्या-ज्ञानेन ज्ञानमाश्रित्य 'केवलेणेति' केवलज्ञानेन, कोऽन्यो भवः? सुरनारकादिर्मानुष्यं मनुष्यभवं तुलयति? अपि तु न कोऽपीत्यर्थः. अयं भावः—यद्यन्येष्वपि भवेषु सर्वभावस्वभावावभासकं केवलज्ञानं स्यात्तदा तेऽपि मनुष्यभवस्य तुल्यां लभेरन्न चास्ति तेष्वाद्यज्ञानत्रयस्यैव संभवात्, ततः कथममी तेन तुल्या भवेयुः?

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा 'पुरिसेत्ति' महर्द्धिकं पुरुषं प्रतीत्य जिनगणधरादीनां जन्मनावतारेण, तत्र जिना अर्हंतः, गणधरा द्वादशांगीकर्तारः, आदिशब्दाच्चतुर्दशपूर्वविदादयः, इह नारकतिरश्चां चैव का? सर्वाधमत्वात्. देवत्वे तु यद्यपि दिव्यश्रीसंभारभासुराः शक्रादयः पुरुषाः संति, तथापि गुणाधिकतया तेषामपि गौरव्या जिनादयो मनुष्यभव एवावतरंतीति भावः. तथा चरणेन चारित्रमाश्रित्य सर्वविरत्या, यतः सकलकर्मव्याधिविध्वंसमहौषधीसर्वविरतिर्मनुष्याणामेव संभवति, देवनारकाणामविरतत्वात्. तिरश्चां तूत्कृष्टतोऽपि देशविरतत्वात्. यत एवं मनुष्याः सर्वोत्तमाः. अत एव शेषजीवेभ्योऽमी स्वल्पा इत्याह—

॥ मूलम् ॥—चंदनतरुव्व मुत्ता—गरव्व मरगयमणिव्व कणयंव ॥ सव्वुत्तमत्तिणो वा । मणुआ सेसेसु जीवेसु ॥ ए ॥ व्याख्या—यथा धवखदिरपलाशादिवृक्षेषु भूयस्स्वपि सर्वोत्तमत्वाच्चंदनतरवः स्तोकाः, यथा वाऽयःशीशकाद्यकरेषु मुक्ताकराः, काचस्फटिकादिमणिषु च मरकतमणयः, लोहत्रपुताम्रादिषु च कनकं सुवर्णधातुः, तथा शेषेषु नाकिनारकादिजीवेषु प्रागुक्तयुक्त्या सर्वोत्तमा इति मनुजाः स्तोका एव विवक्षितक्षणे प्राप्यंते. तथाहि—आगमे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिर्यंचोऽनंता उक्ताः, वनस्पतिजीवानामनंतलोकाकाशप्रदेशप्रमाणत्वात्. देवा नैरयिकाश्चा-
संख्येयाः यतः प्रतरासंख्येयतमभागवर्तिश्रेण्याकाशप्रदेशराशिप्रमाणा देवाः, तथांगुलमात्रक्षे-
त्रप्रदेशराशेः प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्र-
माणासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणाश्च नैरयिका मनुष्याः पुनस्तत्र संख्येया
एव पठिताः, अत एव ज्ञायतेऽमी सर्वोत्तमा इति. सर्वसारस्य वस्तुनः शेषजातीयवस्त्वपे-
क्षया स्तोकस्यैव प्राप्यमाणत्वादिति गाथार्थः. ॥ ए ॥ स्तोकत्वमेव व्यनक्ति—

॥ मूलम् ॥—बट्ठो वग्गो पंचम—वग्गगुणोतित्तिया जहन्नेणं ॥ उक्कोसपए मणुआ ।
संखिज्जा कोमाकोमीउ ॥ १० ॥ व्याख्या—इह मनुष्याणां प्रमाणं द्विधा, जघन्यत उत्कृष्टत-
श्च. तत्र यदा सर्वत्रापि मनुष्यक्षेत्रे मनुष्याः कालानुभावेन स्तोकाः स्युस्तदा कियंत उच्यते
—षष्ठो वर्गः पंचमवर्गगुणः सन् यावान् जायते तावंतो जघन्येन मनुष्याः—इह राशेस्तेनै-
व राशिना गुणनं वर्ग उच्यते, एकस्य च वर्गो न भवति, एकेन गुणितं तदेव भवतीति व-
चनात्. ततो द्विकस्य वर्गश्चत्वारः, ४. चत्वार चतुर्भिर्गुणिताः षोमश, १६, एष द्वितीयो व-

For Private and Personal Use Only

र्गः. षोडश षोडशभिर्गुणिताः षट्पंचाशदधिके द्वे शते २५६, एष तृतीयो वर्गः. अस्यापि राशेरनेनैव राशिना गुणने जातं पंचषष्टिसहस्राणि पंचशतानि षट्त्रिंशदधिकानि ६५५३६, एषश्चतुर्थो वर्गः. अयमपि राशिरनेनैव राशिना गुण्यते. जातमेकोनत्रिंशदधिकानि चत्वारि कोटिशतानि, एकोनपंचाशल्लक्षाः. सप्तषष्टिसहस्रा द्वे शते षण्णवत्यधिके ४२९४९६७२९६, एष पंचमो वर्गः. अयं च पृथग् ध्रियते, अस्मिन् राशावनेनैव राशिना गुणिते जातमेकं लक्षं चतुरशीतिसहस्राश्चत्वारि शतानि सप्तषष्ट्यधिकानि कोटाकोटिनां चतुश्चत्वारिंशल्लक्षाः सप्तसहस्रास्त्रीणि शतानि सप्तत्यधिकानि कोटीनां पंचनवतिर्लक्षा एकपंचाशत्सहस्राः षट्शतानि षोडशोत्तराणि १८४४६७४४०७३७०९५५१६१६. एष षष्ठो वर्गः. अयं च पृथग् धृतेन पंचमवर्गेण गुण्यते, जातं ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६. अयं च कोटाकोट्यादिप्रकारेण वक्तुं न शक्यत इत्यंकत एव लिखितः. अथांकगाथा—सत्तेव य कोडीउ । लक्खा बाणवई सहस्स अडवीसा ॥ एगं सयं च जाणह । नरं कोडाकोडीकोडीणं ॥ १ ॥ बावट्ठिं कोडीउ । इक्कावन्नं हवंति लक्खाइं ॥ बायालीससहस्सा । छच्चसया कोडिकोडीणं ॥ २ ॥ ते-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आलीसं कोमी । सत्तत्तीसं तहेव लरकाइं ॥ एगुणसठ्ठिसहस्सा । तिन्निसया मणुअकोमीणां ॥ ३ ॥ चउपन्नं कोमीउं । लरका गुणयाल सहस्स पन्नासा ॥ तिसि सया बत्तीसा । सन्ना गप्नयमणुस्साणं ॥ ४ ॥ एतावंतो जघन्यतोऽपि मनुष्याः, तथा चानुयोगद्वारसूत्रं—जहन्नपए मणुस्सा संखिज्जा कोमाकोमीउ हुंति, जमलपयस्स उवरिं, चउजमलपयस्स हिठ्ठा, अहवणं बठ्ठो वग्गो, पंचमवग्गपडुप्पन्नो, अहवा बन्नउइ छेयणादाइरासित्ति. ननूत्कृष्टतस्तेऽसंख्येया अपि जविष्यंतीत्याह—उत्कृष्टपदे यदाजितनाथवारक इव सर्वत्रापि मनुष्यक्षेत्रे सामस्त्येन चिंतमाना मनुष्याः सर्वोत्कृष्टा जवंति तदानीमपि मनुजाः संख्येयाः कोटिकोटयो जवंति. संख्येयकोटिकोटित्वं च जघन्यपदेऽप्यस्ति, परं तस्मादिदं बृहत्तरमवसेयं, संख्येयकस्य संख्येयजेदजिन्नत्वात्. ततः स्थितमेतत्, मनुष्या जघन्यत उत्कृष्टतश्च संख्येयत्वात्स्तोका एव. ॥ १० ॥ ननु संमूर्छिममीलनेन मनुष्या अप्यसंख्येयाः स्युस्तेषां श्रेण्यसंख्येयजागवर्तिनभःप्रदेशराशिप्रमाणत्वादत आह—

॥ मूलम् ॥—जीवियमईहिं तणुआ—मुछिममणुआ निगोयजीवव्व ॥ तम्हा इह अ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्गिारो । न हु तेहिं असंखएहिंपि ॥ ११ ॥ व्याख्या—मूर्छनं मूर्छा, गर्जोत्पातव्यतिरेकेणोत्पादः, तेन निर्वृत्ता मूर्छिमा, जावादिम इतीमप्रत्ययः, मूर्छिमाश्च ते मनुजाश्च मूर्छिममनुजा गर्जजानामेव वांतपित्तादिसमुद्भवाः. यदागमः—कहिणं जंते समुछिममणुस्सा संमुछंति? गोयमा! अंतो मणुस्सखित्ते, अढाइज्जेसु दीवसमुद्देसु, पनरससु कम्मभूमीसु, तीसाए अकम्मभूमीसु, छपन्नाए अंतरदीवेसु, गप्नवक्कंतियमणुस्साणंव उच्चारेसु वा, पासवणेसु वा, खेलेसु वा, सिंघाणेसु वा, वंतेसु वा, पित्तेसु वा, पूएसु वा, सोणिएसु वा, सुक्केसु वा, सुक्कपुग्गलपरिसाडेसु वा, विगयकलेवरेसु वा, थीपुरिससंयोगेसु वा नगरनीद्धमणेसु वा, सव्वेसु चेव असुइगणेसु वा इब णं समुछिममणुस्सा समुछंति, अंगुलस्स असंखज्जइजागमित्तीए उगाहणाए असणीमिछादिट्ठी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहुत्ताउआ चेव कालं करंति. एते च निगोद जीवा इव जीवितमतिल्पामायुश्चैतन्याल्पां तनवो हीना जवंति, यथा निगादजीवा उत्कृष्टतोऽप्यंतर्मुहूर्तायुषस्तथैतेऽपि, यथा च निगोदजीवानां महामोहत्वादल्पीयसी चेतना तथैषामपि, मनसाऽपर्याप्तानामेव मरणात्. छद्मस्थचैतन्ये च म-

For Private and Personal Use Only

नःपर्याप्तिनिबंधनत्वात्, यत एवं. तस्मादिह धर्मसामग्र्या विचारे तैः संमूर्छिममनुष्यैरसंख्यैरपि नाधिकारः, आयुष्मत्त्वेन सचेतनत्वेन च गर्भजानामेव तदधिकृतत्वात्. ते च संख्येया एवेति गाथार्थः. ॥ ११ ॥ एवं मानुष्यं दुर्लभमुक्त्वाऽथार्यक्षेत्रस्य दुर्लभतामाह—

॥ मूलम् ॥—पत्तेवि माणुसत्ते । आरियखित्तेसु दुल्लहो जम्मो ॥ सढ्ढपणवीस आरिय—देसा भरहंमि मगधाइ ॥ १२ ॥ व्याख्या—उत्तानार्था. नवरमाराद् दूरेण हेयधर्मेभ्यो याता आर्यास्ते च द्विधा ऋद्धिप्राप्ता अऋद्धिप्राप्ताश्च, तत्र ऋद्धिप्राप्ताः षोढा तद्यथा–तीर्थंकर १ चक्रवर्ति २ वासुदेव ३ बलदेव ४ चारणमुनि ५ विद्याधराः ६. अऋद्धिप्राप्ताश्चार्या नवधा–क्षेत्र १ जाति २ कुल ३ कर्म ४ शिल्प ५ भाषा ६ ज्ञान ७ दर्शन ८ चारित्रार्यभेदात् ९. एषां तत्वार्थः श्रीप्रज्ञापनातोऽनुसर्तव्यः. इह तु क्षेत्रार्यैरेवाधिकारः. ॥ १२ ॥ अथार्यदेशान्नामग्राहमाह—

॥ मूलम् ॥—मगहंगवंगकासी । कलिंगकुरुकोसला कुसट्टा य ॥ जंगलवच्छविदेहा । पंचालसुरहसंदिब्भा ॥१३॥ मलयद्धासिंधुवेई । वइराभदसन्निभंगिवेट्टा य ॥ लाटा य सुरसेणा

। कुणाल तह केयई अद्धं ॥ २४ ॥ व्याख्या—द्वे अपि सुबोधे, नवरं केतकीदेशस्यार्धमेवार्यं, अर्धं त्वनार्यमतएव सार्धपंचविंशतिसंख्यार्यदेशानामुपपद्यते, यदार्षं—खित्तारिया अद्धछ्वीसविहा पण्णत्ता, एते च सम्यगुपलक्षणाय प्रज्ञापनायां प्रथमपदे राजधानीसहिताः पठ्यन्ते, तद्यथा—रायगिह मगह चंपा—अंगा तह तामलित्ति वंगा य ॥ कंचणपुरं कलिंगा । वाणारसीमेव कासी य ॥ १ ॥ साएए कोसला गय—उरं च कुरु सोरियं कुसट्टा य ॥ कंपिल्लं पंचाला । अहिछत्ता जंगला चेव ॥ २ ॥ बारवई य सुरट्ठा । मिहिलविदेहा य वच्छकोसंबी ॥ नंदिपुरं संदब्भा । भद्दिलपुरमेव मलया य ॥ ३ ॥ वइराड वच्छ वरणा । अच्छ तह सुत्तियावई दसणा ॥ सुत्तियमई य वेई । वीतभयं सिंधुसोवीरा ॥ ४ ॥ महुरा य सूरसेणा । पावा भंगी य मासपुरि वट्टा ॥ सावत्थी य कुणाला । कोडीवरिसं च लाटा य ॥ ५ ॥ सेयवियावि य नयरी । केयइ अद्धं च आरियं भणिअं ॥ इत्थुपत्ति जिणाणं । चक्कीणं रामकण्हाणं ॥ ६ ॥ एते च प्रत्यासत्त्या भरतक्षेत्रवर्तिन एव प्रोक्ताः, उपलक्षणत्वादन्येऽप्यैरावतमहाविदेहांतर्वर्तिविजयमध्यखंडादिषु यथासंभवं वाच्याः. अमी च कालविशेषेण सी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

म्ना नाम्ना च परिवर्ततेऽपि ततः श्रोतॄणामव्यामोहाय तल्लक्षणमाह—

॥ मूलम् ॥–जत्थ न जिणकल्लाणा । न चक्किबलकेसवाण अवयारा ॥ न य जिणधम्मपवित्ती । सगजवणाई अणज्जा ते ॥ व्याख्या—यत्र जिनानामर्हतां संबंधीनि कल्याणानि जन्मदीक्षादीनि न जायंते, तथा यत्र चक्रिबलकेशवानां चक्रवर्तिबलदेववासुदेवानामवतारा न भवंति, तथा यत्र साधूनामुपगमान्न च जिनधर्मस्य प्रवृत्तिर्व्यापारः कोऽप्यस्ति, ते देशाः शकयवनादयोऽनार्या इत्युच्यंते. यदागमः—सगजवणसबरबब्बर—कायमुरंडोडुगोडुपक्कणया ॥ अरवागकणरोमस–पारसखसखासिया चेव ॥ १ ॥ दुबिलयलउसबोक्कस—भिल्लंबपुलिंदकुंचभमररया ॥ कुंचायचीणचंचुअ—मालवदमिला कुलग्घा य ॥ २ ॥ केकयकिराय हयमुह—खरमुह तह तुरगमिंढगमुहा य ॥ हयकन्ना गयकन्ना । अन्नेय अणारिया बहवे ॥ ३ ॥ पावा पचंडदंडा । अणारिया निग्घिणा निरणुकंपा ॥ धम्मोत्ति अक्खराइं । जेसु न नज्जंति सुविणेवि ॥ ४ ॥ एवं चानार्यलक्षणे प्ररूपिते आर्यलक्षणमपि प्ररूपितमेव तद्विपरीतत्वात्. ॥ १५ ॥ अथ तत्तथा दुर्लभमपि लब्धं मानुष्यमार्याणामेव सफलं ना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नार्याणामित्याह—

॥ मूलम् ॥—जह जह तेसिमिंदिय—मणोबलं तह तहायरो पावे ॥ ता तेहिंतो मन्ने । पवरं एगिंदियत्तंपि ॥ १६ ॥ व्याख्या—यथा यथा तेषामनार्याणामिंद्रियमनोबलं पटुपटुतरं स्यादिति गम्यते, तथा तथा पापे जीवसंहारमांसाहारपरदाररमणाद्यकृत्ये आदरस्तीव्रतरो जायते, ततो मन्ये इति वितर्कार्थो निपातः, तेभ्योऽनार्यमनुष्येभ्य एकेंद्रियत्वमपि प्रवरं श्रेयः. अयमर्थः—वयमपि जानीमो न हि पापप्रकृतय एकेंद्रियाः कदापि पंचेंद्रियेभ्यः प्रशस्या भवंति, परं तेषामिंद्रियपटुतया मनोबलेन च दुस्तरतरनरकनिबंधने पापकर्मणि सविशेषां प्रवृत्तिमालोक्य स्यादयमपि वितर्को यदेभ्य एकेंद्रिया अपि भरियांसः, स्वल्पप्रयत्नतया स्वल्पचेतनतया च तेषां नरकार्हकर्मबंधाभावात्. न च वाच्यमनार्यदेशयोऽपि संयमश्रियं बभार श्रीआर्द्रकुमार इति परमसुहृत् श्रीअभयकुमारबुद्धिसाध्यत्वात्तत्प्रतिबोधस्येत्याह—

॥ मूलम् ॥—उप्पन्नोवि अणारिअ—देसे जं अद्दओ वयं पत्तो ॥ सो बुद्धिमहानिहि-

For Private and Personal Use Only

उप० णो । महिमा खलु अन्नयमित्तस्स ॥ १७ ॥ व्याख्या—स्पष्टा, नावार्थस्तु कथानकगम्यः.
अथार्द्रकुमारकथा—आसीन्मगधदेशस्थे । ग्रामे नाम्ना वसंतके ॥ सामायिक इति क्षेत्री ।
चिंता० तस्य बंधुमती प्रिया ॥ १ ॥ अन्यदा सुस्थिताचार्य—व्याख्यायां तावुनावपि ॥ संसारजार-
२५८ निर्विणौ । नेजाते युगपद् व्रतं ॥ २ ॥ सूत्रार्थलालसः साधु—र्व्यहरद्गुरुनिः सह ॥ साध्वी
पुनः प्रवर्तिन्या । साकं देशे पृथक्पृथक् ॥ ३ ॥ अन्यदा विहरंतौ तौ । कंचन ग्राममीयतुः
॥ सस्मार प्राग्विलासानां । साधुः साध्वीं निरीक्ष्य तां ॥ ४ ॥ चित्तमुशृंखलीभूतं । यदा तेन
निरुध्यते ॥ तन्मत्तशंकवत्क्षेत्रं । प्रत्यधावत्तदाधिकं ॥ ५ ॥ तच्चेतश्चापलं तेन । द्वितीयो
ज्ञापितो मुनिः ॥ जगाद ह्री प्रमादस्ते । कोऽयं साधो श्रुतोदधेः ॥ ६ ॥ शल्यं कामा वि-
षं कामा । कामा विषधरोपमाः ॥ कामान् प्रार्थयमाना । अकामा यांति दुर्गतिं ॥ ७ ॥ सो-
ऽप्यूचे किं करोम्येष । एषा दृग्गोचरं गता ॥ फलं मर्कटिकेवोच्च—माकृष्यत्येव मे मनः ॥
॥ ८ ॥ सोऽप्यथाख्यत्प्रवर्तिन्या । बंधुमत्याश्च साप्यहो ॥ वातोध्धूतं रज इव । साधोर्गोप्यं
वितस्तिरे ॥ ए ॥ दध्यौ बंधुमती धिग्मां । सर्वथानर्थहेतुकाम् ॥ यथा धूमलहर्येव । मुनेर्मे

क्लिनितं मनः ॥ १० ॥ शीलात्मा मयि जीवंत्यां । साधोरस्य न जीवति ॥ तन्मे मृत्युरपि श्रे-
या—नित्यूचे सा प्रवर्त्तिनीम् ॥ ११ ॥ सा सुबुद्धिः स्वमुद्दध्वा—नशनेन दिवं ययौ ॥ त-
न्निशम्य यतिर्जात—वैलक्ष्यो दध्यिवानिति ॥ १२ ॥ अबलाया अहो सत्त्वं । यदेवं सा वि-
पेदुषी ॥ पुरुषस्यापि धिक् क्लैव्यं । ममाद्यापि जिजीविषोः ॥ १३ ॥ अथात्तानशनः सूरे—
स्तदनालोच्य दुष्कृतम् ॥ स प्रियोत्कंठित इव । तदैव त्रिदिवं ययौ ॥ १४ ॥ द्वीपोऽस्त्यंतर-
कूपारं । कूपाराममनोहरः ॥ श्रीमानमुद्रसामुद्र—सारकोश इवार्द्रकः ॥ १५ ॥ राजाभूदार्द्र-
कस्तत्र । शत्रुजिन्मित्रवर्धकः ॥ आर्द्रिकेति प्रिया तस्य । प्राप्ता श्रीरिव वारिदेः ॥ १६ ॥
साधुजीवो दिवश्च्युत्वा । तस्याः कुक्षाववातरत् ॥ जातः सोऽप्यार्द्रकाभिख्यां । लेभे तेषां ह्य-
सौ स्थितिः ॥ १७ ॥ पितृभ्यामार्द्रको भूमि—जलाभ्यामार्द्रकंदवत् ॥ अवर्ध्यंत गुणैर्जीवै—
रिवानंतैः श्रितः सदा ॥ १८ ॥ मंत्री श्रेणिकराजस्य । सदःस्थं नृपमन्यदा ॥ निर्दिष्टो वेत्रि-
णानंसी—द्विमुच्योपायनं पुरः ॥ १९ ॥ प्रफुल्लवदनः प्रीत्या । तं बभाषे नरेश्वरः ॥ अस्ति
नः कुशली बंधुः । श्रीमान् श्रेणिकभूपतिः ॥ २० ॥ सोऽप्यूचे नोत्पलस्येव । तस्याकुशलसंज्ञ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वः ॥ बालमित्रं जवान् यस्य । दिवाकर इवोदितः ॥ २१ ॥ अत्रांतरे कुमारेणा— र्डकिणा-
लपितं पितुः ॥ यद्वार्ताश्रवणे यूयं । सतृष्णाः श्रेणिकः स कः ॥ २२ ॥ बन्नाषे भूपतिर्वत्स ।
देशोऽस्ति मगधानिधः ॥ केदाराश्च विहाराश्च । यत्रोरुकलशालयः ॥ २३ ॥ पुरं राजगृहं
पाति । तत्र श्रीश्रेणिको नृपः ॥ न द्विषामायुधैर्लोहै-र्जियते पार्थिवोऽपि यः ॥ २४ ॥ प्रीतिः
कुलक्रमायाता । वर्तते सह तेन नः ॥ मिथो मंत्रिगतायातैः । प्राजृतप्रेषणैरपि ॥ २५ ॥ अ-
यं च सचिवस्तेन । प्रजिघ्ये सौहृदान्मयि ॥ मयापि समये तस्मै । निजमंत्री प्रहेष्यते ॥
॥ २६ ॥ अथो आर्द्रकुमारेण । सचिवोऽवादि सादरं ॥ त्वत्प्रजोः कोऽपि पुत्रोऽस्ति । येन
मैत्री विधीयते ॥ २७ ॥ सानंदं सचिवोऽवोचत् । कुमारेंद्र किमुच्यते ॥ रत्नानीवोदधेस्तस्य ।
संति पुत्रा अनेकशः ॥ २८ ॥ पुनस्तेषु समस्तेषु । श्रीमान् कौस्तुजरत्नवत् ॥ तेजसा व-
यसा ज्येष्ठो । जयत्यजयनंदनः ॥ २९ ॥ मूर्तिस्थ इव जीवो यः । प्रजायाः परिवर्धनः ॥ द्वि-
षद्विखंरूनः षष्ट–गृहस्थ इव सद्ग्रहः ॥ ३० ॥ नवमस्थ इव क्रोफो । जिनधर्मस्य पोषकः ॥
अभूत्प्रजुत्वहेतुश्च । दशमस्थ इवार्यमा ॥ ३१ ॥ स एव तव मैत्र्यार्हः । इति जल्पति मंत्रि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृप०
चिंता०
२६१

णि ॥ कुमारः स्माह संगच्छे—स्त्वं गच्छन् मगधेषु मां ॥ ३२ ॥ वत्स स्वच्छकुलीनोऽसि ।
यन्नः पूर्वक्रमागतां ॥ प्रीतिं दृढयसीत्येन-मन्वमोदत भूपतिः ॥ ३३ ॥ तं मंत्रिणमवस्थाप्य
। दिनानि कतिचिन्मुदा ॥ समं स्वमंत्रिणा दत्त—प्राभृतं व्यसृजन्नृपः ॥ ३४ ॥ सोऽथामि-
लत्कुमारस्य । सोऽपि तस्मै ददौ मुदा ॥ चिरसंचितरत्नाढ्य—मभयाय स्वढौकनं ॥ ३५ ॥
ऊचे च सचिवेंद्र त्व—मभयाय वदेरिति ॥ चकोर इव शीतांशु—मार्द्रकिस्त्वां सखीयति
॥३६॥ सोऽथ राजगृहं प्राप्तो । ददौ श्रेणिकभूभुजे ॥ आर्द्रकस्वामिनः सर्वं । प्राभृतं वाचिकैः
समं ॥ ३७ ॥ सचिवः स वयस्यस्य । वयस्य इव भूभुजा ॥ कुशलः कुशलप्रश्न—पूर्वं गौरवि-
तो भृशं ॥ ३८ ॥ अथार्द्रककुमारस्य । स वाचिकमुपायनं ॥ प्राप्य स्वपुरुषादध्या—विति
श्रेणिकनंदनः ॥ ३९ ॥ अहो चित्रमहो चित्रं । यदेषोऽनार्यदेशजः ॥ वयस्यीयति मामार्यं ।
का मैत्री वन्यपौरयोः ॥ ४० ॥ यद्वा ज्ञातमनार्योऽयं । जातः कोऽपि च्युतव्रतः ॥ आसन्न-
सिद्धिकत्वेन । मया मैत्रीं विधित्सति ॥ ४१ ॥ अभव्या दूरभव्याश्च । नेच्छंति मनसोऽपि मां
॥ पुरीषशूकरा दिव्य—चंदनैः किमु कुर्वते ॥ ४२ ॥ मम मैत्र्याः फलं किं चे—न्नासौ धर्मं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विबुध्यते ॥ कर्पूरं तत एवेष्टं । यद्दत्ते स्वीयसौरजं ॥ ४३ ॥ स राजा न्यायदेष्टा यः । स दी-
पो यस्तमोपहृः ॥ तद्धनं यत् त्रिवर्गार्थं । तन्मित्रं यत्प्रबोधकं ॥ ४४ ॥ दूरस्थोऽसौ कथं बो-
ध्यो । यद्वार्हद्बिंबदर्शनात् ॥ जातिं स्मरेत्कदाप्येष । बुध्येत च ततः सुखं ॥ ४५ ॥ ध्यात्वे-
त्यादीशितुर्बिंबं । हैमं हैमविभूषणं ॥ बीजं बोधिद्रुमस्येव । स न्यधत्त स मुक्तके ॥४६॥ समु-
क्तकं च तं दिव्ये । वाससी भूषणानि च ॥ मंजूषायां निचिक्षेप । पूजोपकरणानि च ॥ ४७ ॥
पुनर्यदार्द्रकेशाय । प्राहिणोन्मंत्रिणं नृपः ॥ तदा प्रदाय तस्मै तां । मंजूषामभयोऽभ्यधात् ॥
॥ ४८ ॥ सौम्येयमार्द्रकेरर्प्या । वाच्यमंतश्च वाचिकं ॥ स्नात्वा मित्र रहः सेयं । पेटोद्घा-
ट्या त्वया स्वयं ॥ ४९ ॥ ॐमित्युक्त्वार्द्रकद्वीपं । गत्वा श्रेणिकढौकनं ॥ दत्वा नृपाय सोऽग-
मत् । कुमारस्य गृहं रहः ॥ ५० ॥ तस्मै पेटां प्रदायाख्य— दभयस्य स वाचिकं ॥ तन्निश-
म्य सुधासिक्त । इवार्द्रकिरमोदत ॥ ५१ ॥ स्नातश्च विजनं गत्वा । स्वयं पेटां व्यमुद्रयत् ॥
न्यधात्किमत्र मे मित्र—मित्युत्कलिकयाकुलः ॥५२॥ चंद्रांशुभिरिव स्यूते । वीक्ष्यांतर्वाससी
रसी ॥ पर्यधत्त ततो दिव्य—भूषणैः स्वं व्यभूषयत् ॥ ५३ ॥ उन्मुद्रिते समुद्गेऽथ । सोऽद्रा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्वीदृग्बिंबमार्हतं ॥ तस्यांतरं तमो भेत्तुं। भानुबिंबमिवोदितं ॥ ५४ ॥ तदाभरणबुद्ध्यासौ। सर्वांगेषु नियोजयन् ॥ घटनां कापि न प्राप। त्रिलोकाभरणं हि तत् ॥ ५५ ॥ व्रीडापन्नो वीक्षमाणो। बिंबं दृष्ट्वाऽनिमेषया ॥ कापीदृग्दृष्टमित्यूहा—दस्मरत्पूर्वजन्म सः ॥ ५६ ॥ दध्यौ च प्रागहं भूत्वा। नाम सामायिको मुनिः ॥ भावसामायिकाद्भ्रष्टः। प्राप्तोऽस्म्यत्रमनार्यतां ॥ ५७ ॥ मन्ये ममैव बोधार्थ—मनार्यस्य दवीयसः ॥ अभयः प्रेषयामास। मतिमान् प्रतिमामिमां ॥ ५८ ॥ अभयस्याद्भुतं बुद्धि—वैभवं न स्तवीति कः ॥ योऽधायेव दृशं बोधं। दूरस्थायापि मे ददौ ॥ ५९ ॥ दृष्टं जानाति रत्नं सुवर्णमपि नटो दृष्टमाहंति लक्ष्यं। ग्लानं वैद्योऽपि दृष्टं पटयति सुगुरुर्बोधयत्येव दृष्टं ॥ दृष्टं पांथं पथिज्ञः पथि लगयति योऽबोधयन्मामदृष्टं। दिष्ट्या धीमत्सु सीमा स जयति मगधाधीशजन्मा सखा मे ॥ ६० ॥ तद्बंधोर्दर्शनात्तस्य। कृतार्थीकृत्य लोचने ॥ अनुनेष्ये पुनर्दीक्षां। रोषितामिव वल्लभां ॥ ६१ ॥ अथासौ पूजयामास। सोल्लासः परमेश्वरं ॥ मा पुनर्दुर्लभोऽभूस्त्वं। देव देवेत्युदीरयन् ॥ ॥ ६२ ॥ सोऽथ व्यजिज्ञपद्भूप—मनुमन्यस्व तात मां ॥ मिलित्वाभयमित्रस्य। येन रयां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृढसौहृदः ॥ ६३ ॥ त्वत्सास्माकं च तेषां च । प्रीतिः प्राजृतवान्निकैः ॥ नान्योन्यम्मिलनेने-
ति।निषिध्यत नृपेण सः ॥ ६४ ॥ गुर्वादिशवशस्त्यक्त्वा । शेषकृत्योऽथ दध्यिवान् ॥ योगीव
परमात्मान—मजयस्यैव नाम सः ॥ ६५ ॥ अपृष्ट्वाप्येष गंतेति । चकितस्तस्य चेष्टया ॥
तद्रक्षार्थं नृपोऽमुंच—त्पंचयोधशतानि च ॥ ६६ ॥ कुमारस्तैर्निरुद्धोऽपि । अरूक्षुरिव कर्म-
भिः ॥ न मित्रमिलनोत्कंठां । जहौ मोक्षस्पृहामिव ॥ ६७ ॥ स विश्वासयितुं विश्वान् । यो-
धान् व्याह्यालिकं व्यधात् ॥ तुरगेणाग्रतो गत्वा—ऽमिलत्तेषां क्षणात्पुनः ॥ ६८ ॥ घस्त्रर्धंया-
मयामाद्यैः । क्रमाद्वेलां विवर्धयन् ॥ नित्यं व्यायामकारीव । दूरादप्यवलिष्ट सः ॥ ६९ ॥
एहिरे याहिरे शश्वत् । कुर्वंतस्ते पदातयः ॥ योधाः सर्वेऽपि निर्वेदं । ययुः सूर्यातपाकुलाः
॥ ७० ॥ ततस्ते जातविश्रंभा—स्तस्थुश्छायासु शाखिनां ॥ प्रहरार्धंतरं कृत्वा । सोऽपि ते-
भ्योऽमिलत्पुनः ॥ ७१ ॥ विश्वान् विश्वास्य तानेवं । कालेन कियतापि सः ॥ सज्जीचकार
प्रछन्नं । पोतं प्रत्ययितैर्नरैः ॥ ७२ ॥ तरुछायानिविष्टेषु । योधेष्वेव कदाचन ॥ आरूढः पोत-
मादाय । प्रतिमां सह कांचनैः ॥ ७३ ॥ तीर्णोऽब्धिं हनुमान् यस्य । वायोः पोतः स्वयं सु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खं ॥ तत्सहायेन पोतोऽयं । तत्पारं प्राप नाद्भुतं ॥ ७४ ॥ मन्यमानस्ततस्तीर्ण—मपि संसार-
सागरं ॥ दीक्षायामुत्सुको नैच्छ—न्मित्रस्यापि स संगमं ॥ ७५ ॥ बिंबमाशातनाद्भीरु—रत्न-
याय स्वकैर्नरैः ॥ स प्रैषीन्न हि रत्नस्य । स्थानं रत्नाकरं विना ॥ ७६ ॥ स तत्रैव नवकोट्या—

मुप्त्वा किंचन कांचनं ॥ शेषं समर्प्य भृत्यानां । यावद्गृह्णाति संयमं ॥ ७७ ॥ तावद्देवं दिवो
देवी । वागभूदार्द्रकांगज ॥ भोगकर्म न तेऽद्यापि । क्षीणं तन्माग्रहीर्व्रतं ॥ ७८ ॥ तपसा
छेत्तुकामस्त—त्कर्म रज्जुमिवासिना ॥ अनाकर्ण्यैव तां वाचं । व्रतं भेजे स साहसी ॥ ७९ ॥
निधिकृतं धनमिव । प्राप्य प्राग्भविकं श्रुतं ॥ तेनात्तदीपवन्मार्गं । मौनीन्द्रं पश्यतिस्म सः ॥
॥ ८० ॥ तपसा कृशयन् देहं । भूषयन् शुभभावनां ॥ पक्षीव पाशनिर्मुक्तो । विजहे स म-
हीतले ॥ ८१ ॥ इतश्च—

स्वरामणीयकग्रामी—कृतत्रिदशपत्तनं ॥ वसंतपुरमित्यस्ति । नगरं गरिमास्पदं ॥ ८२ ॥
तत्रेभ्यो देवदत्तोऽभू—न्मान्यो राज्ञोऽपि यो गुणैः ॥ तस्य संचितसौशील्य—धना धनवती
प्रिया ॥ ८३ ॥ स च बंधुमतीजीवः । समतीत्यामरं भवं ॥ उदपादि तयोः पुत्री । पुत्रेभ्यो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽप्यतिवल्लभा ॥ ७४ ॥ विश्रुता श्रीमती नाम्ना । धाम्ना कनकजित्वरी ॥ त्रियाभिर्भारती-
साक्षा-दिव सा ववृधे क्रमात् ॥ ७५ ॥ नियत्या प्रेरितः प्राप्य । वसंतपुरमार्डकिः ॥ बहि-
र्देवकुले क्वापि । तस्थौ प्रतिमयाथ सः ॥ ७६ ॥ इतश्च श्रीमती सापि। सखीभिः सह खेलि-
तुं ॥ संकेतितेव प्राग्जन्म—भर्त्रा तत्रागमत्तदा ॥ ७७ ॥ कुर्वंत्यो वरवरण—क्रीडां व्रीडां
विनाखिलाः ॥ सख्यो देवकुलस्तंभान् । वव्रुर्डिंभालचापलं ॥ ७८ ॥ मृगीव मुग्धा भ्राम्यंती। ।
। सर्वतोऽपीभ्यनंदिनी ॥ स्तंभं कमपि नापश्यत् । सा स्वस्य वरणोचितं ॥ ७९ ॥ स्वं स्वं
स्तंभममुं चंत्यः । सत्यं पतिमिवाथ सः ॥ ऊचुः किं दुर्भगासि त्वं । सखि नाप्नोसि यद्वरं ॥
॥ ८० ॥ तदरुंतुदमाकर्ण्य । वचनं सा क्षणं स्थिता ॥ भिन्नेव शक्त्या दृष्टेवा—हीना लि-
खेव वह्निना ॥ ८१ ॥ त्रस्तैणलोचना सापि । भ्रमंतीतस्ततस्ततः ॥ तमेव मुनिमैक्षिष्ट ।
। प्राक्पुण्यैर्दर्शितं रहः ॥ ८२ ॥ अयं मया वृतः सख्यो । नाहं मोदये कदाप्यमुं ॥ स्वं स्वं
वरं भवंत्योऽपि । मात्याक्षुश्चेत्पतिव्रताः ॥ ८३ ॥ इति तस्यां प्रजल्पंत्यां । वृतं सुष्ठ्विति भा-
षिणी ॥ रत्नौघं देवतावर्ष—द्गर्जिजर्जरितांबरा ॥ ८४ ॥ सखीषु गर्जित्रस्तासु । साधुपादरूयां-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तरा ॥ शारदीव नदी कूल—द्वयांतः श्रीमती स्थिता ॥ ९५ ॥ अवधूयाथ तां बालां । तू-
लालानमिव द्विपः ॥ ततः प्रतस्थे वेगेन । दिव्यवाक्चकितो मुनिः ॥ ९६ ॥ तत्रैत्य नृपतिः
पौरैः । सहादित्सत तद्धनं ॥ अनाथस्य धनस्य स्या—द्राजा स्वामीति नीतिवित् ॥ ९७ ॥
साक्षेपमाचचक्षेऽथ । देवी किं भूप गृह्णसि ॥ धनमेतन्मयादायि । श्रीमतीवरणोत्सवे ॥
॥ ९८ ॥ तद्देवदत्त एवैत्त—दादत्तां कोऽपि नापरः ॥ देव्येत्युक्ते तदादत्त । श्रेष्ठ्येव सकलं
धनं ॥ ९९ ॥ देवदत्तो धनैः पूर्णः । कौतुकैश्च महाजनः ॥ स्वं स्वं धामेयतुः कापि । कन्यापि
फलदायिनी ॥ १०० ॥ काले जामातृचिंतार्तं । श्रीमती जनकं जगौ ॥ तात यः प्राग्मया
वव्रे । भीता यं शरणं व्यधात् ॥ १ ॥ गृह्णता वरणं द्रव्यं । यस्मै दत्ता त्वयाप्यहं ॥ मुनी-
श्वरः स एवास्तु । वरो मे किमु ताम्यसि ॥ २ ॥ साक्षिणोऽत्र पुरीलोकाः । साक्षिणी सा
च देवता ॥ वदामि नीतिबाह्यं चे—त्तदा मां वारयंत्वमी ॥ ३ ॥ एवं तन्निश्चयं ज्ञात्वा । ब-
भाषे श्रेष्ठिपुंगवः ॥ वद विद्मः स विज्ञेयः । कथं वायुरिव भ्रमन् ॥ ४ ॥ सा प्रत्यवोचतामंद—
मंदाक्षमृदिताक्षरं ॥ सम्यग्जानाम्यहं तात । तमवामांह्रिलक्षणा ॥ ५ ॥ ददाना दानशा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लायां । तव दानमनारतं ॥ काले तमपि लप्स्येऽहं । दानं भोगफलं यतः ॥ ६ ॥ भ्रमंति
भिक्षवो दानि-गेहेष्विति विचारयन् ॥ श्रेष्ठ्यथातिथिवर्गाय । पुत्र्या दानमदापयत् ॥ ७ ॥
सापि तत्रेयुषां दत्वा । शुद्धान्नमनगारिणां ॥ नत्वा पदिकवत्पादा—वेव लक्ष्मार्थमैहत ॥
॥ ८ ॥ साभूत्कल्पलता साधु-ष्विष्टभक्तादिदानतः ॥ ईप्सितापूरणात्ते तु । तत्रासन्नवकेशिनः
॥ ९ ॥ एवं निष्फलतारुण्या-रण्यानी मालतीव सा ॥ आशयैवातिचक्राम । क्रमाद् द्वादशव-
त्सरीं ॥ १० ॥ विहरन् वसुधापीठे । विस्मृत्या विधुरीकृतः ॥ तदेव दैवयोगेना-जगाम पुर-
मार्द्धकिः ॥ ११ ॥ स भोगकर्मविभ्रांत—मानसो दानसद्म तत् ॥ अनाहूतोऽप्यगाद् भृंग ।
इव सत्कुसुमं द्रुमं ॥ १२ ॥ मुदा प्रदाय शुद्धान्न-पानमानम्य सा मुनिं ॥ लक्षणं दक्षिणां-
ह्रिस्थं । वीक्ष्य सम्यगलक्षयत् ॥ १३ ॥ तत्कालोद्भूतरोमांच-त्रुटत्कंचुकबंधना ॥ शमयंतीव
हर्षाश्रु—सलिलैर्विरहानलं ॥ १४ ॥ मेघागमे मयूरीव । नृत्यंती निजगाद सा ॥ जाने दा-
नेन नश्यंति । दुरितानीति सुव्रतं ॥ १५ ॥ स्वागतं स्वागतं स्वामिन् । क्व स्थितस्त्वमियच्चिरं
॥ कोऽयं स्निग्धजने द्वेषः । कृपापि एव नास्ति किं ॥ १६ ॥ जीविताहमियत्काल-माशया

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलिताद्य सा ॥ तदंगीकुरु मां यासि । कथं संप्रति लज्जितः ॥ १७ ॥ व्रातरस्त्वरितायाता —स्तावत्तस्या बजापिरे ॥ भक्तेभ्यो जक्तदात्री ते । मिलिता विमुखोऽसि किं ॥१८॥ मुने त्व- मेव विज्ञो य—न्मुक्त्वा बालामिमां तदा ॥ संप्रत्युद्यौवनां ज्ञात्वा । पारापत इवापतः ॥ ॥ १ए ॥ व्रतं पालयितुं तुर्य—मेतां मुंचसि चेत्तदा ॥ आद्यं लुंपसि ही पादौ । रक्ततो लि- प्यते शिरः ॥ २० ॥ रे रे जंदव व्रतं किं मे । नाहं सोऽस्मीति वादिनं ॥कन्योचे मुनिमग्रेऽपि । जग्ना पंचव्रती तव ॥ २१ ॥ स्थूले जीवे मयि त्यक्त—कृपस्याद्यं क ते व्रतं ॥ नाहं स इति वाचैव । द्वितीयमपि हारितं ॥ २२ ॥ मम चौरयतश्चेतो । रत्नं क च तृतीयकं ॥ शमाया मे हृदि स्थान—कृतस्तुर्यमपि क्षितं ॥ २३ ॥ तृतीयतुर्ययोर्जंगे । जग्नमेवास्ति पंचमं ॥ प्र- पन्नायां मयि पुन—र्जीवति व्रतमादिमं ॥ २४ ॥ यद्वा नाहं स इत्युक्त्या । त्वमेव ज्ञापय- न्नसि ॥ हंसोऽस्मि पुनरेषोऽस्मि । हंसीसंबंधमर्हति ॥ २५ ॥ अथ पित्रापि कन्याया । भूपे- नाप्येत्य कौतुकात् ॥ जृशमभ्यर्थितोऽस्मार्षी—न्महर्षिर्दैववत्तं वचः ॥ २६ ॥ नंष्टुमप्यक्षमः सर्वैः । प्राकारीभूय वेष्टितः ॥ वसत्यपि पुरे वेषं । मोचितः शालकैर्मुनेः ॥ २७ ॥ सोऽपवादप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देनेव । श्रीमतीं परिणीतवान् ॥ पाथोधिपूरवत्कर्म—विपाकः केन रुध्यते ॥ २८ ॥ कन्याया वरणे देव्या । यत्राप ज्ञापसाक्षिकं ॥ अदत्त देवदत्तस्त—द्वित्तमस्मै तदा मुदा ॥ २९ ॥ भुंजानस्य तया साकं । भोगान् प्राग्भवभार्यया ॥ तस्याभूत्तनयः काले । फलं गार्हस्थ्यभूरुहः ॥ ३० ॥ संजाते व्यक्तसंज्ञेऽस्मिन् । बाले सौभाग्यशालिनि ॥ मुक्तमंतर्गृहं साधु—वेषमेष स्वमैक्षत ॥ ३१ ॥ स्वं समुत्स्रष्टुकामोऽथ । श्रीमतीमन्यधत्त सः ॥ प्रिये पुत्रसहायासि । मुंच मामार्ध्ये व्रतं ॥ ३२ ॥ अदत्त्वैवोत्तरं सापि । शोकाद्बाष्पायितेक्षणा ॥ कुतोऽपि तर्कुमानीय । समारभत कर्तनं ॥ ३३ ॥ पुत्रः प्राक शिक्षितस्तस्य । श्रीमतीं लल्लगीर्जगौ ॥ मातस्त्वमपि कर्मेदं । निर्वीरेव करोषि किं ॥ ३४ ॥ जीवत्सु जनकभ्रातृ—पतिपुत्रेष्वपि त्वया ॥ एतच्च किं समारेभे । रोदनं शोकलक्षणं ॥ ३५ ॥ सा प्रोचे वत्स मां मुक्त्वा । त्वत्पिता क्वापि यास्यति ॥ चाद्यापि त्वं शिशुस्तन्मे । वृत्तिरेषैव शाश्वती ॥ ३६ ॥ अद्यापि तारतारुण्य—मकारुण्यश्च मन्मथः ॥ दुर्लंघ्या कुलमर्यादा । न जाने किं भविष्यति ॥ ३७ ॥ वारयिष्याम्यहं यातं । मातस्तातमिति ब्रुवन् ॥ बालोऽकर्कशधीस्तर्कु—मात्तिनज्जननीकरात् ॥ ३८ ॥ लो-

For Private and Personal Use Only

सचक्षुश्चलत्काक—पक्षः किंचित्स्मिताननः ॥ तर्कुध्धृतेन सूत्रेण । स वसारमवेष्टत ॥ ३९ ॥
ऊचे च मातर्मारोदी—र्मारोदीरितवेदना ॥ मया नियंत्रितो बाढं । न तातः क्वापि यास्य-
ति ॥ ४० ॥ वद तात समर्थोऽपि । कथं यास्यस्यतःपरं ॥ नवे वयसि मुक्त्वा मे । मातरं
विरहातुरां ॥ ४१ ॥ सोऽवक् सत्यमिदं पुत्र । बद्धोऽहं वचसैव ते ॥ वेष्टव्यथां वृथा कुर्व—
न्त्येते किं तव तंतवः ॥ ४२ ॥ यावंतस्तंतवः संति । समाः स्थास्यामि तावतीः ॥ ते चासन्
द्वादशैवेति । सोऽस्थाद् द्वादशवत्सरीं ॥ ४३ ॥ ततो द्वादशवर्षेषु । गतेषु लवलीलया ॥ स
दध्यौ ही प्रमादेन । छलितोऽयं जनः कथं ॥ ४४ ॥ यत्पुरात्मयमित्रेण । बोधिरत्नमढौक्यत ॥
तज्जाग्रतोऽपि मेऽहारि । इहा विषयतस्करैः ॥ ४५ ॥ अनार्यैश्वहत्सुपेदे । मनसा प्राक्च्युत-
व्रतः ॥ सर्वथा च्युतचारित्रो—ऽधुना यास्यामि कां गतिं ॥ ४६ ॥ लब्धपोतोऽप्यहं मग्नो ।
लब्धान्नः क्षुधितोऽस्म्यहं ॥ भ्रष्टोऽहं लब्धसार्थोऽपि । ग्लानो लब्धौषधोऽप्यहं ॥ ४७ ॥ लब्ध-
श्रीरपि दुःस्थोऽहं । लब्धविद्योऽप्यहं जडः ॥ यल्लब्धजिनधर्मोऽपि । विषयैर्व्यथितोऽस्म्यहं
॥ ४८ ॥ यद्वा किं चिंतया शुच्यै । संप्रत्यपि तपः कृतं ॥ जावोऽस्ति चेत्तदा पश्चा—दपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूरे न निर्वृतिः ॥ ४९ ॥ निश्चित्येति प्रियां पृष्ट्वा । प्रातः परिजनं च सः ॥ नीडादिवां-
डजो गेहा-न्निर्ययौ व्रतवेषभाक् ॥ ५० ॥ सोऽथ वीरं जिनं नंतुं । पुरं राजगृहंप्रति ॥ प्रचल-
न्नंतराद्राक्षी—द्भटपंचशतीं वने ॥ ५१ ॥ प्रत्यभिज्ञाय तैः सर्वै—र्ववंदे मुनिपुंगवः ॥ सोऽपि
तानुपलक्ष्योचे । कुतो यूयं वनेऽत्र भोः ॥ ५२ ॥ तेऽप्यूचुस्त्वं पलायिष्ठा । विश्वास्यास्मान् यदा
तदा ॥ च्युतन्यासा इव भिया । न भूपमुपजग्मिम ॥५३॥ भवद्दिदृक्षया भ्रांत्वा । भुवं संभूय
भूयसीं ॥ अत्रायाता अतिष्ठाम । जीवंतश्चौर्यचर्यया ॥ ५४ ॥ साधुः कृपोदधिस्तेषां । बोधाये-
दमुपादिशत् ॥ भवद्भिः कुलजैः केयं । प्रारेभे पापजीविका ॥ ५५ ॥ एतद्धनं शिवस्याध्वा
। स्याद्योग्याय निषेवितं ॥ तदेव सेवितं चौर्य—कृते नरकवर्तिनी ॥ ५६ ॥ चौरो हारयति
स्वार्थं । परार्थहरणोद्यतः ॥ साधुस्तु साधयन् स्वार्थं । परार्थायापि कल्पते ॥ ५७ ॥ तद्भोः
स्तैन्यं समुत्सृज्य । भजध्वं संयमश्रियं ॥ माभून्मानुष्यकं पापा । दुःप्रापं भवतां पुनः ॥५८॥
यातबोधा गतक्रोधा । योधास्ते तस्य शिक्षया ॥ आत्तदीक्षा न्यषेवंत । तं चिरस्वामिनं पुनः
॥ ५९ ॥ अन्वितैस्तैर्मुनींद्रोऽथ । कलभैरिव कुंजरः ॥ व्रजन् राजगृहं हस्ति—तापसाश्रममी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यिवान् ॥ ६० ॥ निवाराद्यैर्मृगाद्यैश्च । बहुजंतुक्षयो ह्यतः ॥ तापसा घ्नंति यत्रैकं । वारणं प्रतिपारणं ॥ ६१ ॥ तापसैर्निविडं बद्धो । नारशृंखलया तदा ॥ आलोकत तमायांतं । गजो गजगतिं यतिं ॥ ६२ ॥ वंदेऽहमप्यमुं मुक्त-बंधः स्यां चेदिति द्विपे ॥ ध्यायत्येवात्रुटत्तस्य । शृंखला जीर्णरज्जुवत् ॥ ६३ ॥ सिंधुरे धावमानेऽस्मिन् । मुनिंप्रति विबंधने ॥ इतस्ततो जनोऽत्रस्य—द्धीरधीर्न पुनर्मुनिः ॥ ६४ ॥ अवंदि स पदौ स्पृष्ट्वा । स्वकरेण करेणुना ॥ निर्जितेनेव शौंडीर्यो—न्नत्यगत्यादिभिर्गुणैः ॥ ६५ ॥ मनसा मुनिसारेऽत्र । भूरिभक्तिर्द्विपस्ततः ॥ स्वधाम्नीव वनेऽवीक्ष—ल्लोकानां कृतकौतुकः ॥ ६६ ॥ तं तस्यातिशयं हस्ति—तापसा असहिष्णवः ॥ सर्वेऽप्याजग्मुरूचुश्च । जटिलाः कुटिलाशयाः ॥ ६७ ॥ भिक्षो व्यर्था क्रिया भूरि—जीवपिंडाशिनस्तव ॥ वायं तु धार्मिका कुर्मो । हस्तिनैकेन पारणं ॥ ६८ ॥ पशुना पशुदेश्यस्त्वं । गजेन यदि वंदितः ॥ तत्किं नश्चित्रमित्युक्ते । तैरुवाच मुनीश्वरः ॥ ६९ ॥ एकापि पापाय यथोरुजंतु—हत्या तथा न प्रचुरापि चान्या ॥ अंगस्य भंगाय शिलैककापि । यथा तथा स्यात्किमु कर्करौघः ॥ ७० ॥ स्वार्थसाधितभक्तेषु । मध्याह्ने लोकसद्मसु ॥ अल्पा-

ह्यप्रमाददानस्य । नास्ति हिंसकता मम ॥ ७१ ॥ मांसव्रता न तावद्वः । करुणा करिघातिनां ॥ निःकृपाणां कुतः पुण्यं । निःपुण्यानां क्रियैव का ॥ ७२ ॥ एवं वो लाभमिच्छूनां । मूलच्छितिरुपस्थिता ॥ तद्भजध्वं कृपामेका— मेकांतसुकृतार्थिनः ॥ ७३ ॥ द्विपः कृपास्पदं सौम्यं । यदि मां शरणं गतः ॥ भवद्भ्यो घातकेभ्योऽयं । बिभ्यत्तत्किं प्रकुप्यथ ॥ ७४ ॥ यतेः स्याद्योगसिद्धस्य । महिमा हि स कश्चन ॥ आसतां सुधियो येनो—पासते पशवोऽपि हि ॥ ॥ ७५ ॥ साधोः सुधामुचा वाचा । शांतक्रोधकृशानवः ॥ क्षणेन तापसाः सर्वे । जैनीं दीक्षां प्रपेदिरे ॥ ७६ ॥ तैरन्वितो मुनिर्यात्र—ययौ राजगृहांतिकं ॥ गोशालः संमुखस्ताव—दासीद्दशकुनो यथा ॥ ७७ ॥ जगौऽसौ मर्दितुमना । पाणिना गोक्षुरोत्करं ॥ उन्मादबहुलो वादं । ययाचे मुनिमार्द्रकिं ॥ ७८ ॥ अभाव्यं न भवत्येव । नाशोऽस्ति न च भाविनः ॥ नियतेरिति सावष्टये । वृथा ते संयमश्रमः ॥ ७९ ॥ जंतूनां पौरुषं व्यर्थं । बलिनी भवितव्यता ॥ पश्य मुद्गा न पच्यंते । वह्नियोगेऽपि केचन ॥ ८० ॥ इत्यस्मिन् जल्पति प्रेक्ष्य—माणः खेचरभूचरैः ॥ ऋषिर्बभाषे पाखंडिन् । केयं तेऽलीककल्पना ॥ ८१ ॥ नियतिश्चेत्प्रमाणं ते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेव रारटीषि किं ॥ त्वद्बोधायेति चेन्नासौ । नियतेरौपजानुकः ॥ ८२ ॥ न हि धूमध्वजे-
ध्मादि—सामग्रीरहिताः कचित् ॥ पाच्यमाना नियत्यैव । मुद्गा अपि निरीक्षिताः ॥ ८३ ॥
अन्यच्चाहं क्रियानिष्ठो । नियत्या वान्यथापि वा ॥ अन्यथा चेत्तदा जन्न—प्रसरा सा वरा-
किका ॥ ८४ ॥ नियत्या चेत्तदा किं त—न्निमित्तं कलहायसे ॥ किंच व्याधिः स्वयं शाम्य
—त्येकोऽन्यस्त्वौषधैः पुनः ॥ ८५ ॥ स्वयं जायेत कोऽपि द्रु—रपरो रोपितः खलु ॥ ततो
द्वितीयं नियतेः। पौरुषं मन्यसे न किं ॥ ८६ ॥ एवं निगृह्य गोशालं। स्तूयमानः सुरैर्नरैः ॥ स-
मवसरणं प्राप्तः । सोऽनमच्चरमं जिनं ॥ ८७ ॥ श्रुत्वा तमागतं साधु—माहूत इव तद्गुणैः ॥
सलाज्जयकुमारेण । तत्रागाच्छ्रेणिको नृपः ॥ ८८ ॥ प्रदक्षिणय्य तं भक्त्या । नत्वा च रचितां-
जलिः ॥ तच्चरित्राद्भुतं शंस—न्नन्यधान्मगधाधिपः ॥ ८९ ॥ घनो गुणैस्त्वमाद्धाभू—न्नस्मताप-
सवर्ष्मसु ॥ गोशालकद्वार्चिश्च । युक्तमेव निवारयेः ॥ ९० ॥ तच्चित्रं यत्त्वयाऽत्रोटि । नाह-
करटिशृंखला ॥ ततो मुनिर्मनाग्हास्य—रम्यास्यः क्ष्मापतिं जगौ ॥ ९१ ॥ न दुष्करो मे नृप
बंधमोक्षो । गजस्य मत्तस्य वने बभूव ॥ पुनः स तर्कूध्धृततंतु बंधा—त्सुदुष्करो मे प्रतिभाति मोक्षः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ९२ ॥ इति वृत्तं पठित्वास्य । वृत्तं स्वं वदतोऽभवत् ॥ विशिष्य वीरतां स्तोतुं । मागधो मगधेश्वरः ॥ ९३ ॥ अथाभयं मुनिः प्रोचे । मित्रैष महिमा तव ॥ अनार्यदेशजन्मापि । वंद्येऽहं यन्नरेश्वरैः ॥ ९४ ॥ चकोर इव चंद्रे चे—न्नाधास्यं सौहृदं त्वयि ॥ चारित्रचंद्रिकापानं । तदवाप्स्यमदः कथं ॥ ९५ ॥ अहं तवोपकारस्य । नानृणः स्यां कदाचन ॥ एतद्धर्मीक्षमेव त्वं । सम्यक्त्वं द्योतयेः सदा ॥ ९६ ॥ मुनिं सम्यक्तमानम्य । ययौ राजा यथागतं ॥ सहाभयेन तद्दीक्षा—भावनापावनाशयः ॥ ९७ ॥ केवलैराश्रितः साधु—गुणैरुत्पन्नकेवलः ॥ मुनीश्वरोऽपि स प्राप । समये शाश्वतं पदं ॥ ९८ ॥ अनार्यदेशप्रभवोऽपि मंक्षु । मोक्षं ययावार्द्रकुमारसाधुः ॥ सौहार्दतः श्रेणिकनंदनस्य । कार्या ततः साधुभिरेव मैत्री ॥ ९९ ॥ इति श्रीआर्द्रकुमारकथा समाप्ता.

नन्वार्येभ्योऽन्ये हूणचिणादयो धर्मबाह्या इत्यवसितं, परमंतरद्वीपादिमनुष्याणां का वार्तेत्याह

॥ मूलम् ॥—छपन्नंतरदीवेसु । तह य तीसाइभोगभूमीसु ॥ जे जुअलधम्मिमणुआ । न तेवि धम्मस्स किर जुग्गा ॥१८॥ व्याख्या—इह कुंकलितकोदंडाकारभरतक्षेत्रप्रत्यंचाभूतस्य पूर्वा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परकोटिज्यां जगतीं जित्वा लवणसमुद्रं स्पृष्टवतः पीतप्रज्ञापङ्क्तिसितहेम्नो हिमवतः पर्वतस्य पूर्वांतात्पश्चिमांताच्च द्वे द्वे दाढे समुद्रांतर्निर्गते, चतसृष्वपि तासु प्रत्येकं सप्त सप्त संतीति हिमवन्निश्रयाष्टाविंशतिरंतरद्वीपाः. एवमैरावतक्षेत्रसीमास्थिते शिखरिण्यपि पर्वत एतावंतः संतीति सर्वसंख्ययामी षट्पंचाशत्. एतेषां विशेषस्वरूपं जीवाभिगमादवसेयं. तथा भोगः प्राक्कृतसुकृतफलानुभवः, तदर्हा भूमयो भोगभूमयस्ताश्च हैमवतं हरिवर्षं देवकुरव उत्तरकुरवो रम्यकमैरण्यवतं चेति षट् जंबूद्वीपे, धातकीखंडे द्वादश, द्वादश पुष्करार्धे चेति सर्वसंख्यया त्रिंशत्, एताश्चाकर्मभूमयोऽप्युच्यंते. अत्रोद्भूतानां कृषिवाणिज्यादिकर्मरहितत्वात्, एतेषु षडशीतौ स्थानेषु ये युगलमेव धर्मः स्वभावो येषां ते युगलधर्मिणो मनुजा जायंते, किलेति निश्चये तेऽपि न धर्मस्य योग्याः, धर्मसामग्रीचिंतायां तेऽप्यनधिकृता एवेत्यर्थः, भोगप्रधानत्वात्तेषां. एतेनार्यक्षेत्रोद्भवा एव मनुजा धर्मयोग्या भवंतीति समर्थितं. ॥ ॥ १८ ॥ अथ कुलसामग्रीमाह—

॥ मूलम् ॥—तह्नवि सुसावयकुलं । दुलहं मुत्तागरुव्व बहुसुत्ति ॥ जह्नोदयाउ दीसइ ।

For Private and Personal Use Only

कमेण मुत्ताण परिणामो ॥ १९ ॥ व्याख्या—तत्रार्यक्षेत्रेऽपि मुक्ताकर इव शृण्वंति सद्गु-
पदेशमिति श्रावकाः, शोभनाश्च ते श्रावकाश्च सुश्रावकास्तेषां कुलं दुर्लभं, कथंभूतं ? बहवः
सूक्तयः सुवचनानि यत्र तद्बहुसूक्ति, धर्मज्ञतया तेषां भाषासमितत्वात्. अथ श्रावककुलस्य
विशेषमाह—यत्र श्रावककुले उदयावतारात्प्राणिनामिति गम्यते, क्रमेण सम्यक्त्वदेशविर-
त्यादिरूपेण मुक्तानां सिद्धानां परिणामो दृश्यते, मुक्ताकरपक्षे—बहवः शुक्तयो यत्र तद्बहु-
शुक्ति, यत्र मुक्ताकरे उदकात्स्वातिजलात्क्रमेण मुक्तानां मौक्तिकानां परिणामो दृश्यते.
अयमर्थः—आर्यक्षेत्रं हि समुद्रप्रायं, समुद्रेऽपि मुक्ताकरेष्वेव मेघमुक्तमंभो मौक्तिकत्वेन
परिणमति, न सर्वत्र, तत्र पतितमात्रस्य तस्य क्षारजलसंपर्केण निर्नामनाशात्, एवमार्य-
क्षेत्रेऽपि सत्कुल एव जातो जंतुर्मुक्तत्वं लभते, न शेषेसु. ॥ १९ ॥ तत्रोत्पन्नस्य भव्यस्यापि
स्वभावभ्रंशादित्येतदेवाह—

॥ मूलम् ॥—मिछेसु कूरकम्मसु । कुलेसु भवोवि असरिसेसु गओ ॥ अप्पाणं नासेइ ।
खारजले साइसलिलंव ॥ २० ॥ व्याख्या—म्लेछेषु, जनंगमादिषु क्रूरकर्मसु चाक्रिकादिषु,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

एवंविधेष्वसदृशेष्वयोग्येषु कुलेषु गत उत्पन्नो नव्योऽप्यात्मानं नाशयति, नैर्मल्यप्रतनुकर्मत्वादिस्वस्वरूपाद्भ्रंशयतीत्यर्थः, क्षारजले स्वादुसलिलमिवेति प्रागेव नावितं. ॥ २० ॥ अथ न केवलं म्लेछादय एव दुःकुलत्वेन रूढाः, किंतु मिथ्यादृशोऽपीत्याह—

॥ मूलम् ॥—देवगुरुधम्मतत्ते । जह परिस्काप॒रम्मुहा बुद्धी ॥ तेसुवि कुलेसु जाउ । कुलगव्वं वहइ ही मूढो ॥ २१ ॥ व्याख्या—यत्र येषु कुलेषु जातानां बुद्धिर्देवगुरुधर्मतत्वविषये परीक्षापराङ्मुखी विचारवंध्या वर्तते, हीति खेदे, खेदश्चासमंजसदर्शनात्, किमसमंजसमिति चेदुच्यते—यत्तेष्वपि कुलेषु जातो मूढो मूर्खः कुलिनोऽहमिति गर्वं वहति. इदमत्र हृदयं—इह तत्कुलं वस्तुतः स्तुतिपदं नवति, यत्रोत्पन्नाः प्रज्ञालुतया सारासारताविवेकं विधाय वस्त्वाद्रियंते परिहरंति वा, एतच्च श्रावकाणामेव दृश्यते देवादिसम्यक्तत्वानुरागात्, कुदेवादिमिथ्यात्वपरित्यागाच्च. यत्र पुनरमी देवगुरुधर्मा अस्मत्पूर्वजैः प्रमाणीकृतास्तदेत एव प्रवरा इति वृथागर्वगरलतरलितचेतनाः सारासारविवेकविकलाः कलाधिष्ठातारः सदपि परमतं दूषयंति, असदपि स्वमतं भूषयंति, हंत तेष्वपि कुलेषु जातो यदि कुलमदं धत्ते,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः को नाम न खिद्यत इति गाथार्थः. ॥ २१ ॥ पुनः श्रावककुलस्य शेषकुलेभ्यो नंग्यंतरेण वैशिष्ट्यमाह–

॥ मूलम् ॥—जलगलणणंतकाइय—निसिन्नत्तसुराइविरमणाइयं ॥ जं अन्नेसिं दुग्गं । सो मग्गो सावयकुलेसु ॥ २२ ॥ व्याख्या—जलगलनं प्रतीतं, अनंतकायिका मूलकार्द्रकादयः, निशाभक्तं रात्रिभोजनं, सुरा मदिरा, आदिशब्दादामिषादिपरिग्रहः, तत एषां द्वंद्वः, एतेभ्यो विरमणं निवर्तनं, जलगलनं चानंतकायिकादिविरमणं, च जलगलनानंतकायिकनिशाभक्तसुरादिविरमणं, तदादिर्येषां, कंकतग्रहणसर्पादिमारणातपशय्याप्रस्फोटनादिनियमानां यत्र तज्जलगलनानंतकायिकनिशाभक्तसुरादिविरमणादिकमनुष्ठानं यदन्येषां श्रावकव्यतिरिक्तानां कुले दुश्चरत्वाद् दुर्गं दुर्गप्रायं वर्तते स श्रावककुलेषु बालैरपि सुखासेव्यत्वान्मार्गो राजमार्ग इव भवति. ॥ २२ ॥ अत एव श्रावककुलाय देवा अपि स्पृहंतीत्याह—

॥ मूलम् ॥—सुरलोयंपि सुरिंदा । सुक्खं तं तारिसं अणुहवंता ॥ बोहिसुलहत्तहेउं । सावयकुलजम्म मिहंति ॥ २३ ॥ व्याख्या—व्यक्तार्था. अथ श्रावककुलेषु प्रेष्यभावोऽपि बो-

For Private and Personal Use Only

धिबीजनिबंधनत्वाद्गाढं कमनीय इत्याह—

॥ मूलम् ॥——आयणिऊण जम्मं–तरंमि सुद्दयस्स तारिसं उदयं ॥ सावयकुलेसु पेस-
-त्तणंपि बाढं सुहावेइ ॥ २४ ॥ व्याख्या–सुजगस्य कर्मकृतः श्रावककुलसान्निध्यादधिगतपं-
चपरमेष्ठिमंत्रस्य जन्मांतरे तादृशं त्रिदशानामपि श्लाघ्यमवतारमाकर्ण्य श्रावककुलेषु प्रेष्यत्वं
दासत्वमपि मम बाढं सुखायते, बोधिहेतुत्वेनायतौ स्वर्गापवर्गसुखकारणत्वात्, न पुनः सा-
र्वभौमत्वमपि मिथ्यात्वोपहतं प्रेत्य नरकादिक्लेशमूलत्वात्. यदाह–जिनधर्मविनिर्मुक्तो । मा-
भूवं चक्रवर्त्यपि ॥ स्यां चेटोऽपि दरिद्रोऽपि । जिनधर्माधिवासितः ॥१॥ सुजगस्य कथा चैवं–

अस्त्यंगदेशशृंगार–श्रंपा संपद्धरा पुरी ॥ यस्यां दृष्टो ध्वजेष्वेव । कंपः किल महाबलात्
॥ १ ॥ दधिवाहनभूपाल–स्तत्र लोकमपालयत् ॥ जैत्रो यस्य प्रतापोऽभू–त्खङ्गस्तु करभूषणं
॥ २ ॥ स्मरवीरवधूगर्व–सर्वस्वापहृतिक्षमा ॥ सुजटीत्याजयेत्याख्यां । दधानास्य प्रियाभवत्
॥ ३ ॥ जनौघरंजनो जैन–शासनोपासनोन्मनाः ॥ अभूदृषभदासाख्य–स्तत्र श्रेष्ठी महाधनः
॥ ४ ॥ अर्हद्दासीति तस्यासी–त्प्रेयसी श्रेयसी गुणैः ॥ न हि धर्मेऽपि कामेऽपि । या भर्त्रा

व्यभिचारिणी ॥ ५ ॥ महिषीश्चारयामास । तस्य कर्मकरो वने ॥ जज्ञे न केवलं नाम्ना । सु-
भगः कर्मणापि यः ॥ ६ ॥ अन्यदा मासि माघेऽसौ । महिषीश्चारयन् बहिः ॥ कायोत्सर्ग-
स्थमद्राक्षी—त्कंचिद्ध्यानधरं मुनिं ॥ ७ ॥ ऋषिरेष कथं रात्रि—मत्र स्थातेति चिंतयन् ॥
कथंचिदतिचक्राम । यामिनीं स गृहं गतः ॥ ८ ॥ महिषीः प्रातरादाय । स जगाम वनं पुनः
॥ ववंदे तं च सानंदः । कंदर्पदमनं मुनिं ॥ ९ ॥ तस्य शीतव्यथां हर्तु—मिव सूर्ये समुद्गते
॥ नमस्कारादिमपदं । वदन् व्योम ययौ मुनिः ॥ १० ॥ उत्पपात यया साधुः । सेयं विद्या
खगामिनी ॥ इत्याहृतमतिर्भद्रु । तत्पदं सुभगोऽग्रहीत् ॥ ११ ॥ आसने शयने स्थाने । गमने
भोजनेऽपि सः ॥ नामुंचत्तत्पदं भाग्या—ल्लब्धं तद्धनवद्धनं ॥ १२ ॥ श्रेष्ठी पप्रच्छ तं वत्स ।
त्वमेतज्जंजपीषि किं ॥ सोऽभ्यधत्त मुनेर्लब्धां । विद्यां गगनगामिनीं ॥ १३ ॥ ईभ्योऽवदन्न
विद्यासौ । केवलं व्योमगामिनी ॥ सर्वकामकरी किंतु । स्वच्छचित्त विचारय ॥ १४ ॥ जग-
द्वश्यकरी वैरि—स्तंभिनी बंधमोक्षणी ॥ विद्येयं श्रीकरी मोक्षा—कर्षिणी बुद्धिवर्धिनी ॥१५॥
इमां पुनरनुशिष्टः । समस्तां सततं जपेः ॥ श्रेष्ठीत्युक्त्वा नमस्कारं । तं संपूर्णमपीपठत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

॥ १६ ॥ अथाखंडनमस्कार–परावृत्तिप्रमोदतः ॥ स्वं दासमपि शक्कीयन् । सोऽतिचक्राम वा-
सरान् ॥ १७ ॥ प्राप्ते घनागमे जाते । शाड्वले भूतलेऽखिले ॥ सोऽगात्पुराद्बहिः सर्वा । गृ-
हीत्वा सौरभीरभीः ॥ १८ ॥ श्यामाः पयोभृता धीर–निःस्वना उन्मदिष्णवः ॥ मह्यां महि-
ष्यो गगने । कादंबिन्यश्च रेजिरे ॥ १९ ॥ परक्षेत्रेषु महिषीः । प्रसृता असतीरिव ॥ विनि-
वर्तयितुं झंपां । सोऽदादंतर्नदीजले ॥ २० ॥ स तत्र वज्रकीलेन । विद्धो ध्यायन् नमस्कृतिं
॥ विपद्यर्षभदासस्य । पत्न्याः कुक्षाववातरत् ॥ २१ ॥ तस्मिन् गर्भगते श्रेष्ठि—न्युत्पन्नान् पु-
ण्यदोहदान् ॥ भर्तुः प्रसादतः सर्वान् । यथाकालममानयत् ॥ २२ ॥ सा काले सुषुवे पुत्रं ।
दर्शनानंदमिंदुवत् ॥ सुदर्शनाख्यया ख्यात—स्ततः स ववृधे क्रमात् ॥ २३ ॥ कलासु कुशलः
काले । साधूनां सन्निधौ सुधीः ॥ अधीयानः श्रुतं धर्मं । गृहिधर्ममधत्त सः ॥ २४ ॥ अ-
ध्यारुढः स तारुण्यं । पुण्यमूर्तिरुपायत ॥ महेभ्यनंदिनीं नाम्ना । गुणैरपि मनोरमाम् ॥ २५ ॥
बभूव कपिलस्तस्य । मित्रं राज्ञः पुरोहितः ॥ स्मरस्येव विधुर्वायु—र्दक्षिणात्यो मधोरिव ॥
॥ २६ ॥ एकतानः सदा सद्म । श्रेष्ठिनः स न्यषेवत ॥ स्वगृहं व्यवहारेण । व्रजमानोंतरां-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तरा ॥ २७ ॥ स्वभर्तरि परस्त्रैण—व्यसनाशंकिनी मनाक् ॥ एकांते कपिला कांता । पप्रच्छ कपिलं प्रियं ॥ २८ ॥ नायासि प्रायशो गेह—मायातोऽपि न तिष्ठसि ॥ कांत किं तव वैराग्य—मद्यश्वः सत्यमुच्यतां ॥ २९ ॥ कपिलः प्रोचिवानस्ति । सुहृन्मम सुदर्शनः ॥ व्रजामि यामिनि प्रायः । तस्यैव सदनं सदा ॥ ३० ॥ कः सुदर्शन इत्युक्ते । पत्न्या प्रोचे पुरोहितः ॥ सुदर्शनं न चेद्वेत्सि । वेत्सि तत्किं विशारदे ॥ ३१ ॥ सुदर्शनोऽयमृषभ—श्रेष्ठिसूनुरनूनधीः ॥ आराजरंकं स्वगुणै—रभीष्टो जात्यरत्नवत् ॥ ३२ ॥ औदार्येण घनाघनस्य घटितो बुद्ध्या च वाचस्पतेः । गांभीर्येण सरस्वतो रतिपतेर्देवस्य रूपश्रिया ॥ धीरिम्णा धरणीधरस्य रजनीभर्तुः कलाभिश्च यः । सोऽयं श्रेष्ठिसुदर्शनो विजयते विश्वत्रयीभूषणं ॥ ३३ ॥ तस्य सर्वे गुणा दृष्टा । यत्नः शीले पुनर्महान् ॥ चंद्रस्य जगदुल्लास्यं । कुमुदं तु विशेषतः ॥ ३४ ॥ इत्याकर्ण्य सकर्णा सा । कपिला चपलाशया ॥ सुदर्शनं रमयितुं । चक्रे चिंतां स्मरातुरा ॥३५॥ अन्यदा भूभृदादेशा—त्पत्यौ ग्रामांतरे गते ॥ कपिला फलितं मेने । स्वमनोरथशाखिनं ॥ ॥ ३६ ॥ उपेत्य साभ्यधादिभ्य—मभ्याजीर्णात्पुरोहितः ॥ आमयावी मया विज्ञ । त्वामा-

ह्यति संप्रति ॥ ३७ ॥ परित्यक्तान्यकृत्योऽथ । तया सह सुदर्शनः ॥ मध्ये मित्रगृहं प्राप्तो-ऽपश्यत्तामेव कामिनीं ॥ ३८ ॥ चाटूक्तिनिर्वृषस्यंतीं । पश्यंतीं स्निग्धया दृशा ॥ स्वशीलरत्न-रक्षार्थ—माचख्यौ तां सुदर्शनः ॥ ३९ ॥ यद्भाषसे मृगाक्षि त्व—मेतत्कस्मै न रोचते ॥ परं हंत विधेर्वाम्या-त्क्लीबोऽस्मि करवाणि किं ॥ ४० ॥ भग्नाशा साथ तत्कालं । गृहद्वारमपावृ-णोत् ॥ व्रज व्रजेति जल्पंती । लज्जमाना स्वकर्मणा ॥ ४१ ॥ जालादिव तिमिः पाशा—दिव पक्षी गृहात्ततः ॥ निर्गत्य त्वरया गेहं—श्रितयामासिवानसौ ॥ ४२ ॥ या विलासविषावेशा--द्विवशीकुर्वते जगत् ॥ भुजंगीष्विव नारीषु । विश्वासस्तासु को नृणां ॥ ४३ ॥ शस्त्रीव स्त्री बुधैश्चिंत्या । प्राणहर्त्री प्रमादिनां ॥ भर्त्रा करगृहीतापि । या परंप्रति धावति ॥ ४४ ॥ वरं वज्रनिपातेन । शतधा चूर्णितं शिरः ॥ न तु निर्धर्मनारीवा- विश्वासोपहतं मनः ॥ ४५ ॥ ततः स स्वं मनः साक्षी-कृत्याभिग्रहमगृहीत् ॥ नातःपरं । परगृहं गम्यमेकाकिना मया ॥ ॥ ४६ ॥ तदादि चिंतयन् योषाः । सदोषा निखिला अपि ॥ सदा स्वदारतुष्टोऽभा—द्धर्मे धैर्य विशिष्य सः ॥ ४७ ॥ प्राप्ते शक्रोत्सवेऽन्येद्यु—र्वनं प्राप्तोऽवनीपतिः ॥ समं मंत्रिपुरोधाभ्यां ।

क्रीडा वहुविधा व्यधात् ॥ ४७ ॥ यांत्याः क्रीडार्थमुद्यान—मजयायास्तदामिलत् ॥ नद्या इवांतरनदी । पथि पत्नी पुरोधसः ॥ ४९ ॥ सुदर्शनवधूं वीक्ष्य । वनं यांतीं षडंगजां ॥ केयं रामाभिरामांगी—त्यपृच्छत्कपिलाजयां ॥ ५० ॥ स्वभर्तृसुहृदो भार्या । राज्यश्रीरिव षड्गुणा ॥ मुग्धे मनोरमा सेयं । षट्पुत्रेत्यजयाभ्यधात् ॥ ५१ ॥ सावज्ञं कपिलालापी—देवि किं भाषसे वृथा ॥ सुदर्शनप्रिया नेयं । यद्यस्यास्तनया अमी ॥ ५२ ॥ स हि क्लीबोऽस्ति निःशेष—मनुभूतमिदं मया ॥ इत्युक्त्वा प्रकटीचक्रे । कपिला निजचापलं ॥ ५३ ॥ हसंत्यथ जगौ राज्ञी । निःपुण्ये विदुषि ब्रुवे ॥ अमुना छद्मना मुग्धां । शठः स त्वामवंचयत् ॥ ५४ ॥ स हि षंढः परस्त्रीषु । प्रचंडस्तु स्वयोषिति ॥ अमी षट् तनयास्तस्य । जानातीति जनोऽखिलः ॥ ५५ ॥ तन्निशम्य विलक्षा सा । च्युतलक्षास्त्रयोधवत् ॥ आलापीत्कपिला कोऽयं । देवि दर्पो वृथा तव ॥ ५६ ॥ वाचा तं स्वगृहानीतं । मुग्धाप्यहमरीरमं ॥ त्वं तु योगिनि प्रगल्भापि । प्राभूस्तद्भाषणेऽपि न ॥ ५७ ॥ ब्राह्मणोऽपि द्राविका धत्ता—मेका चंद्रकला मदं ॥ शेषाः स्वस्वप्रियप्रीति-कृतो माद्यंति किं स्त्रियः ॥ ५८ ॥ तद्वाणीभिः कृपाणीभि-रिव भिन्नाजया भृशं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिज्ञामित्यनात्मज्ञा । चक्रे वक्रेण चेतसा ॥ ५९ ॥ शीलशैलाग्रश्रृंगाच्चे—त्पातयामि सुद-
र्शनं ॥ तदा मामत्रयां ब्रुयाः । सत्रयामन्यथा सखि ॥ ६० ॥ कोऽयं मम पुरोऽसत्र—वणि-
ग्मात्रं सुदर्शनः ॥ सुदर्शनधरोऽपि स्याद् । दृष्टायां मयि निर्मदः ॥ ६१ ॥ मृणाललीलया
हेतीः । सहंते ये रणांगणे ॥ न स्पंदंते जटास्तेऽपि । दृग्मात्राभिहता मया ॥ ६२ ॥ एवं
मिथः प्रजल्पंत्यौ । ते गत्वोपवनं बहिः ॥ तत्र रत्वा चिरं सायं । पुनः स्वस्थानमीयतुः ॥
॥ ६३ ॥ राज्ञ्यथो पंडितां धात्रीं । स्वप्रतिज्ञामजिज्ञपत् ॥ सा स्माह मुग्धे कोऽयं । लग्न-
स्तव कदाग्रहः ॥ ६४ ॥ स्वात्मभूमिं परिज्ञाय । प्रतिजानाति नीतिमान् ॥ किमजा प्रति-
जानीते । तरणं सरिदीशितुः ॥ ६५ ॥ अन्ये ते वालुकासद्म—समानमनसो नराः ॥ नारी-
नदीभिरक्षोभ्यो । वज्रस्तंभस्त्वयं पुनः ॥ ६६ ॥ परेऽपि श्रावकाः प्रायः । परस्त्रीषु पराङ्मुखाः
॥ असौ किं पुनराजन्म—शीलशाली सुदर्शनः ॥ ६७ ॥ गुरुवक्त्राब्जजातार्थ—मरंदास्वादषट्-
पदः ॥ रमते रमणीदेह—वर्चोगेहेष्वसौ कथं ॥ ६८ ॥ सुप्रापाः फणिरत्नाब्धि—तलकेसरि-
केसराः ॥ दुरापं परनारीजि—र्वक्त्रः सौदर्शनं पुनः ॥ ६९ ॥ शीललीलायितं तस्य । ख्यातं

For Private and Personal Use Only

क्षितितलेऽखिले ॥ आकाशवल्गनप्रायां । कदाशां तदिमां त्यज ॥ ७० ॥ अन्यथाद्यतया
साधु—शिक्षा ते पंडिते पुनः ॥ प्रतिज्ञाभंजने जाने । जीवितं मरणाधिकं ॥ ७१ ॥ ज्ञात्वा
तवैव साचिव्यं । प्रतिज्ञातमिदं मया ॥ विना वायुबलं धूलि–र्न हि व्योमारुरुक्षति ॥ ७२ ॥
तदेकदा समानीय । निजं नाम कृतार्थय ॥ तस्मिन्नत्रागतेऽशेषं । शेषमीषत्करं मया ॥ ७३ ॥
एवमभ्यर्थिता राज्ञ्या । तदाज्ञामभिगृह्य सा ॥ अभ्यस्यानयनोपायं । वीक्षांचक्रे विचक्षणा ॥
॥ ७४ ॥ एष कामसमः काम—छद्मनानीयते सुखं ॥ इति सा पंडिता काम–मूर्तिं नव्याम-
चीकरत् ॥ ७५ ॥ तां चोत्सवैः सदा साय—मंतःपुरमवीविशत् ॥ एवं च कंचुकिव्रातं । विदुषी
सा व्यशिश्वसत् ॥ ७६ ॥ इतश्च नवनिर्वेदा–दार्षभिः सर्वपर्वसु ॥ प्रतिमास्थोऽतिचक्राम ।
यामिनीः शून्यसद्मसु ॥ ७७ ॥ अन्यदा कौमुदीपर्व–ण्यागते नागरैः सह ॥ विधातुं विविधाः
केली–रवनीशो वनं ययौ ॥ ७८ ॥ महीपतिमनुज्ञाप्य । शिरोर्त्तिच्छद्मना गृहे ॥ मदनासक्तया
तस्थौ । सा हि कूटोक्तिजन्मभूः ॥ ७९ ॥ विधित्सुर्धर्मकर्माणि । चतुर्मासकपर्वणि ॥ प्राभृता-
र्पणतः क्ष्माप–माप्रच्छ्य सुदर्शनः ॥ ८० ॥ अनुज्ञातो नरेंद्रेण । स सर्वमपि वासरं ॥ सरंगो

विदधे चैत्य-परिपाटीमुपोषितः ॥८१॥ सायं निर्माय निर्मायः । पौषधं दुरितौषधं ॥ स गृहस्थो-
उप० ऽपि योगीव । तस्थौ शून्यगृहे क्वचित् ॥ ८२ ॥ सद्ध्यानस्तिमितं प्राणा-यामजातांगलाघवं ॥
चिंता० ज्ञात्वा तलस्थमुद्धृत्य । तं मूर्ध्नाधत्त पंडिता ॥ ८३ ॥ श्रुतामृतभृतः साधु-वृत्तो मांगल्य-
२८९ दर्शनः ॥ सस्मेराब्जमुखो व्रेजे । तन्मौलौ पूर्णकुंभवत् ॥ ८४ ॥ मुक्तकामोऽप्यसौ काम-दं-
भान्निःशंकया तया ॥ मध्ये शुद्धांतमानीय । पुरो राज्ञ्या अमुच्यत ॥ ८५ ॥ खिद्यंती घर्म-
तप्तेव । वेपमाना भयार्त्तवत् ॥ हृष्यंत्याप्तनिधानेव । तं बभाषेऽन्यया रयात् ॥ ८६ ॥ चिरा
जीवितसर्वस्व । चिंतया गोचरीकृतः ॥ सुकृतैः प्राक्कृतैरद्य । त्वं दृशोर्गोचरेऽभवः ॥ ८७ ॥
प्राग्मां गुणैरबध्नास्त्वं । बंधितोऽसि ततो मया ॥ कृते प्रतिकृतं कुर्वन् । जनोऽयं नापराध्यति
॥ ८८ ॥ त्वया रूपश्रिया जिग्ये । कामस्तन्मां त्वदाश्रितां ॥ स बाधतेऽमुना त्वं तु । शक्तो-
ऽपि किमुपेक्षसे ॥ ८९ ॥ सुमते सर्वसत्त्वेषु । समता संमता तव ॥ शरीरेणात्रयोजद-मधु-
ना नाधुनाति किं ॥ ९० ॥ जानाम्यजन्म ते जंतु-जाते जातोदया दया ॥ मयि पंचेषुदू-
नायां । सा किमग्राहि तस्करैः ॥ ९१ ॥ ध्यानं च मुंच मुंचेदं । न ध्यानावसरोऽधुना ॥ प-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रार्त्तिभंजनार्त्तिं मे । हृत्वा ध्यानं ततो भजेः ॥ ९२ ॥ शृंगारवार्धिकल्लोलै—र्विश्वविप्लावकै-
रिति ॥ तद्वचोभिर्न चुक्षोभ । सुरशैल इवार्षभिः ॥ ९३ ॥ पाणिभ्यां सास्पृशत्तं च । कटा-
क्षैर्निशितैरहन् ॥ न्यौंछच्च केशैस्तस्यांहि—मंशदेशे व्यलंबत ॥ ९४ ॥ अगूहन्मध्यमुरूभ्यां ।
स्तनाभ्यां हृद्यताडयत् ॥ बध्ध्वा च वस्त्रांचलेनाशु । तं सर्वांगमधूनयत् ॥ ९५ ॥ एभिर्विला-
सितैस्तस्या । न चकंपे सुदर्शनः ॥ कृकलासीविलासैः किं । कंपते दृढपादपः ॥ ९६ ॥ हंसक-
ध्वनिपादाब्जां । वलित्रयतरंगिणीं ॥ किं सुधादीर्घिकां भूप—प्रियां प्राप्य न खेलसि ॥
॥ ९७ ॥ निशा याति क्रमात्कारस्यं । प्रायेणोत्शृंखलाः खलाः ॥ त्वं च मानाद्रिमारूढो ।
धिग्मां दुर्दैववंचितां ॥ ९८ ॥ जल्पंतीति मुहुश्चक्रे । सोपसर्गान् यथा यथा ॥ आरुरोह परां
कोटिं । ध्यानस्य स तथा तथा ॥ ९९ ॥ स्थूलस्तनस्थले ह्येका—दशश्रोत्रमहाबिले ॥ अ-
रोमहरिति श्याम—शिरोजाभोगभोगिनी ॥ १०० ॥ तृष्णा विवर्धते तस्याः । शरीरमरुमंडले
॥ तादृग्मुनिमुखांभोज—राजहंसी चिखेल न ॥ १ ॥ युग्मं ॥ यस्य माता गृहे नास्ति । तस्य
माता हरीतकी ॥ तस्यामित्यभयख्यायां । स दधौ जननीधियं ॥ २ ॥ अथ सामवचोभि-

For Private and Personal Use Only

स्त—मक्षुभ्यंतं सुदर्शनं ॥ अन्यधाद्भृकुटीभीम—भालदत्तभयाभया ॥ ३ ॥ रे रे यथा यथा
चाटु—शतैरभ्यर्थ्यसे मया ॥ तथा तथा स्वसौभाग्य—गर्वेणैव प्रपूर्यसे ॥ ४ ॥ अद्यापि स्त्री-
चरित्रस्या—नभिज्ञोऽसि वराक रे ॥ अभयास्मि स्वशक्त्याहं । वीरानपि विरेचये ॥ ५ ॥ क-
स्त्वं वणिगणुः स्त्रीभि—र्भ्रंश्यंते भूधना अपि ॥ पातयंति तरूनद्य—स्तृणस्तंबस्य का कथा ॥
॥ ६ ॥ प्रसन्ना जीवितं दत्ते । मेघवृष्टिरिवांगना ॥ अप्रसन्ना पुनः प्राणान् । गृह्णाति जगतो-
ऽपि सा ॥ ७ ॥ सरसे नीरसो दीने । शूरः स्निग्धे च कोपनः ॥ कोऽपि नालोकितः कापि ।
नरस्त्वदपरो मया ॥ ८ ॥ जिजीविषास्ति चेन्मानं । मुक्त्वा मानय मां तदा ॥ नो चेत्प्रया-
सि मत्क्रोध—कृशानौ तृणपूलतां ॥ ९ ॥ एवं चिकीरती वाक्य—गरलं तरलीभृजुः ॥
ध्यानमंत्रभृतस्तस्य । प्राभवन्नोगिनी न सा ॥ १० ॥ दध्यौ सुदर्शनो धिग्मा—मभाग्यानां शि-
रोमणिं ॥ यदेवं कुर्वतः पुण्य—मुपसर्गो ममोत्थितः ॥ ११ ॥ यद्यस्य व्यसनांभोधेः । पारं पश्या-
म्यमुं तदा ॥ मुंचे पोतमिवोत्सर्ग—मन्यथानशनं श्रये ॥ १२ ॥ आभवाभ्यस्तसंभोग—भं-
गीभङ्गीभिराहतः ॥ राज्ञ्या सर्वां निशां नाप । तद्धैर्यभरदो भिदां ॥ १३ ॥ अथालोक्य नमा-

क्रोत्तं । खिन्ना तीक्ष्णशिखैर्नखैः ॥ सा रंजास्तंजसोमालं । विलिलेख निजं वपुः ॥ १४ ॥
उप० पूच्चक्रे च तथा सर्वे-ऽप्याययुर्यामिका यथा ॥ नासान्यस्तद्दशं तत्र । ददृशुस्ते सुदर्शनं ॥१५॥
चिंता० अस्मिन्नेतदसंजाव्य—मिति तैर्ज्ञापितो नृपः ॥ तत्राययौ क्रुधा काल । इव पप्रछ चाभयां ॥
२९२ ॥ १६ ॥ साप्यधाद्दंजभूजांग्य-हीनाहं नाथ किं ब्रुवे ॥ तदा त्वयि वनं याति । यज्ञाता मे
शिरोव्यथा ॥ १७ ॥ तयाकुलीकृताकस्मात् । त्वदादेशादिह स्थिता ॥ यावत्तावदयं भूत । इ-
वायासीत्कथंचन ॥ १८ ॥ चिरं चकार चाटूनि । रिरंसुरसकौ मया ॥ परं स्वशीलरक्षार्थ—
मौनमेव व्यधामहं ॥ १९ ॥ निस्त्रपोऽयं बलात्कार—मपि चक्रे यदा मयि ॥ तदोच्चैः पूत्क-
काराह-मेतदेव बलं स्त्रियां ॥ २० ॥ घटते नात्र कर्मेदं । तमस्तिग्मद्युताविव ॥ ध्यायन्निति
नृपोऽप्राक्षी-दब्रूयोभूयः सुदर्शनं ॥ २१ ॥ कृपालुर्नृपजामिन्या । अन्यायं वक्तुमक्षमः ॥ स
मौनमादधेसंतो । ह्यन्यदोषेष्वनादृताः ॥ २२ ॥ तूष्णीकत्वान्महीनाथ—स्तं निश्चित्यापरा-
धिनं ॥ भ्रामयित्वाखिले पुरे । धीवंध्यो वध्यमादिशत् ॥२३॥ महत्तमस्विनीं राज—दयितामे-
ष नास्पृशत् ॥ इत्याख्यातुमिव ज्योती-रूपः सूर्यस्तदोद्ययौ ॥२४॥ आरक्षैः कारितः सोऽन्य—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुह्याच्छादी गुणाश्रयः ॥ शुत्रायतिं खरारोहं । पटो निर्णेजकैरिव ॥ २५ ॥ तं वधोचितनेपथ्यं
। प्रतिरथ्यां पुरांतरा ॥ भ्रामयित्वा तलारक्षा—श्चक्रुरुद्घोषणामिति ॥ २६ ॥ सुदर्शनोऽयं शु-
द्धांते । स्वलितो वध्यते ध्रुवं ॥ नयनिष्ठो नृपो नात्र । मनागप्यपराध्यति ॥ २७ ॥ अस्मि-
न्नेतदसंभाव्यं । वेत्ति कः कर्मणां गतिः ॥ एषोऽपि कर्मजेयः किं । कोऽयं तैर्हि जगज्जितं ॥
॥ २८ ॥ यद्येषोऽपि भवेदीदृ—क्कद्विश्वासोऽपरस्य कः ॥ इति पंक्तिस्थपौराणा—मालापान-
श्रृणोदसौ ॥ २९ ॥ दध्यौ च जीव क्लीवत्वं । माधा बाधाभरेऽपि रे ॥ दोषः कस्यैष सर्वोऽपि ।
स्वकर्मफलभाग्जनः ॥ ३० ॥ यांति चेद्यांतु मंक्ष्वेव । प्राणाः सत्वरगत्वराः ॥ माभून्मत्तः पुन-
र्जातु । लांछनं जिनशासने ॥ ३१ ॥ दुःखमकृतशीलस्य । नाकालमरणान्मम ॥ इदमेव मह-
द्दुःखं । यद्व्रताशा वृथाभवत् ॥ ३२ ॥ इति ध्यानसुधाधौत-मुखकालुष्यमागतं ॥ गृहाग्रतः
पतिं वीक्ष्य । हृदि दध्यौ मनोरमा ॥ ३३ ॥ अहो पुण्यवतोऽमुष्य । मुखं दुःखेऽप्यकश्मलं ॥
इंदुः किमपरागेऽपि । प्रसत्तिं स्वां समुज्झति ॥ ३४ ॥ वीक्ष्य सद्वृत्तमुख्यस्या-मुष्य साक्षादिमां
दशां ॥ जीवत्यद्यापि पाषाण—हृदया हि मनोरमा ॥ ३५ ॥ आरप्स्यते यदा भर्त्ता । मम

For Private and Personal Use Only

नप० किंचन चापलं ॥ तदा यास्यत्यधो भूमि—र्भ्रशिष्यत्युडुमंडलं ॥ ३६ ॥ सुता गता मृता वा
किं । सर्वाः शासनदेवताः ॥ यदेकापि न सान्निध्यं । मद्भर्तुः कुरुतेऽधुना ॥ ३७ ॥ ततः स्व-
चिता० गृहचैत्ये सा । पूजयित्वा जिनेश्वरान् ॥ चक्रे तदाग्रतः कायो—त्सर्गमेवं कृताश्रवा ॥ ३८ ॥
२०४ पारयामि तदोत्सर्गं । यदा संगच्छते पतिः ॥ नो चेदनशनं मेऽस्तु । सर्वाः शृण्वंतु देवताः ॥
॥ ३९ ॥ मा शोचीः पुत्रि भर्तुस्ते । सन्निहिता वयं सदा ॥ इत्यकस्मान्नभोभाषा—श्राव्रि श्रा-
विकया तया ॥ ४० ॥ इतश्चारोपि शूलायां । तलारक्षैः सुदर्शनः ॥ शूली शीलमहिम्नास्य ।
दधौ स्वर्णारविंदतां ॥ ४१ ॥ दत्ता असिप्रहारास्तै—स्तन्मौलौ मालितां ययुः ॥ हृद्ये काव-
लितां पाणि—पादे त्वंगदतां पुनः ॥४२॥ जय जीव जगज्जैत्र—गुणास्पद सुदर्शन ॥ इति वाक्पु-
ष्पवृष्टिश्च । तदा प्रादुरभूद्दिवः ॥४३॥ नृपस्तत्क्षणमारक्षै—र्विज्ञप्तो जातविस्मयैः ॥ तत्रैत्य गाढ-
मालिंग्य । तुष्टावेवं सुदर्शनं ॥४४॥ सात्विकानां त्वमेवासि । सुदर्शन निदर्शनं ॥ यदेवं देवताः
शील—साद्यमातन्वते तव ॥४५॥ अवश्यं तव देहस्य । संति केचन रक्षकाः ॥ किं वेत्त्यहं-
दयश्चर्म—लोचनो दधिवाहनः ॥४६॥ वितन्वंत्या रजःपूरं । वानावचनवायया । भ्रमितोस्म्यवशो-

हंत । नूधरोऽपि तृणं यथा ॥ ४७ ॥ वंश्य : सद्धर्मसंज्ञोऽपि । क्रिया को न विडंब्यते ॥
ज्यासंगतः क्षिपेच्चापो । वक्रीनूय शरानृजून् ॥ ४८ ॥ अजानतापराद्धं य—न्मया गुणमये
त्वयि ॥ क्षम क्षमस्व सर्वं तत् । क्षमा हि जवदाश्रया ॥ ४९ ॥ सत्यं वद परं येन । प्रत्ये-
मीति महीजुजा ॥ पृष्टः श्रेष्टी जगौ वृत्त-मजयाया यथातथं ॥ ५० ॥ एतन्मम पुरावादि ।
त्वया न किमिति ब्रुवन् ॥ भूपस्तं करिणीस्कंधे । न्यस्यानैषीन्निजं गृहं ॥ ५१ ॥ रुषा जजन्
जुजंगत्व—मजयायां जुवो विजुः ॥ श्रेष्टिना स्ववचोमंत्रै—र्निर्मत्सरविषीकृतः ॥ ५२ ॥ तन्नि-
शम्याजया हीणा । स्वमुद्बध्य विपेदुषी ॥ शुजजावेन केनापि । लेजे वैयंतरीं श्रियं ॥ ५३ ॥
तदजावे निराधारा । जग्ननीडेव पक्षिणी ॥ पलाय्य पाटलीपुत्रं । प्रययौ पंमितापि सा ॥
॥ ५४ ॥ तत्रासौ देवदत्ताया । गणिकाया गृहे स्थिता ॥ घटते ज्रष्टशीलाना—मशीलैः सह
संगतिः ॥ ५५ ॥ संस्नप्य जोजयित्वा च । परिधाप्य विभूष्य च ॥ श्रेष्टिनं स्वगृहे प्रैषी—
न्महर्द्ध्या मेदिनीपतिः ॥ ५६ ॥ तदा च पारितोत्सर्गा । तीर्णसंसारसागरा ॥ मनोरमा यमा-
नंदं । लेजे सैव विवेद तं ॥ ५७ ॥ मनःसमक्रमक्षाम—मतिर्दध्यौ सुदर्शनः ॥ अभवत्कीय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मदेशनां ॥ ७० ॥ व्यंतरी पंकिता देव–दत्ता चान्येऽपि नागराः ॥ श्रुत्वा तद्देशनां के के । न प्राबुध्यंत जंतवः ॥ ७१ ॥ इत्थं विहृत्य वसुधावलये विलीन–मीनध्वजो नवरजो दलयन् जनानां ॥ श्रीमान् सुदर्शनमुनिर्वनिताविरक्तो–ऽप्यालिंगतेस्म शिवनायकया क्रमेण ॥ ७२ ॥ इति श्रीसुनगकथा समाप्ता. ॥ इत्युक्ता श्रावककुलस्य दुर्लनता. अथ गुरोर्दुर्लनतामाह––

॥ मूलम् ॥––विमलंपि कुलं अहलं । जइ लब्भइ धम्मदेसउं न गुरू ॥ पत्तंपि जाणवत्तं । विहलं निज्जामएण विणा ॥ २५ ॥ व्याख्या–सुगमा ॥ २५ ॥ इदानीं गुरोः स्वरूपमाह–

॥ मूलम् ॥–उत्तीसगुणसमेउ । तयनावे अप्पमत्तगीयत्थो ॥ जो सो नौउव गुरु । तरेइ तारेइ नवजलहिं ॥ २६ ॥ व्याख्या––षट्त्रिंशता गुणैः समेतो युक्तो गुरुर्नवति, ते चामी–देसकुलजाइरूवी । संघयणी धीइजुउ अणासंसी ॥ अविकत्थणो अमाई । थिरपरिवाडी गहियवक्को ॥ १ ॥ जियपरिस्सो जियनिद्दो । मज्झत्थो देसकालनावन्नू ॥ आसन्नलद्धपइनो । नाणाविहदेसनासन्नू ॥ २ ॥ पंचविहे आयारे । जुत्तो सुत्तत्थतदुनयविहिन्नू ॥ अहरणहेउकारण । नयनिउणो गाहणाकुसलो ॥ ३ ॥ ससमयपरसमयविऊ । गंजीरो दित्तिमं सिवो

For Private and Personal Use Only

सोमो ॥ गुणसयकलिउं जुत्तो । पवयणसारं परिकहेउं ॥ ४ ॥ आसां लेशतो व्याख्या—देशो मध्यदेशस्तत्रोत्पन्नः सुखाववोधवाग्नवति. कुलं पैतृकं तद्वान् यथोत्क्षिप्तं भारं निर्वाहयति. मातृकी जातिस्तद्युक्तः सुविनीतो नवति. रूपवानादेयवाक्यो नवति. संहननी दृढसंहननो व्याख्यानतपोऽनुष्ठानादिषु न खिद्यति, धृतियुतः कथंचिदलाने न दैन्यं याति. अनाशंसी श्रोतृन्यो न वस्त्रादीहते. अविकत्थनोऽस्वश्लाघी, स ह्यनुद्धतः स्यात्. अमायी न शाठ्यो न शिष्यान् वाहयति. स्थिरपरिपाटिः स्थिरपरिचितग्रंथस्तस्य हि सूत्रं न गलति. गृहीतवाक्योऽप्रतिहतवचः स्यात्. जितपरिषद् परवाद्यक्षोन्यो नवति. जितनिद्रः सूत्रार्थपरिवर्तकः शयालुशिष्याणां शिक्षयिता. मध्यस्थः संवादको नवति. देशकालनावज्ञो यथायोगं देशादिगुणानवबुध्य विहरति हृदयंगमां च देशनां विधत्ते. आसन्नलब्धप्रतिनो वादिनावष्टब्धः सद्यः प्रत्युत्तरदानक्षमो नवति. नानाविधदेशनाषाज्ञो नानादेशजविनेयप्रत्यापयनसमर्थः स्यात्. ज्ञानदर्शनचारित्रतपोवीर्यलक्षणे पंचविधे आचारे युक्तः श्रद्धावान् स्यात्. सूत्रार्थतदुनयविधिज्ञः सम्यगुपसर्गापवादौ वक्ति. उदाहरणहेतुकारणनयनिपुणस्तज्ञम्यान्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावान् सम्यक्प्ररूपयति, नागममात्रमेव प्रमाणीकुरुते. तत्रोदाहरणं—वह्न्यादिसिद्धौ महानसादिर्हेतुर्ज्ञापको धूमत्वादेः कारणं कुंभादेर्मृत्पिंडादि, नया नैगमादयः. ग्राहणाकुशलोऽल्पबुद्धीनपि शिष्यान् भंग्यंतरेण ग्राहयति. स्वसमयपरसमयवित्परमताक्षेपेण सुखं स्वसमयं प्ररूपयति. गंभीरः कृतेऽपि कार्येऽनौत्कर्षं याति. दीप्तिमान् दृष्टोऽपि परवादिनः क्षोभयति. शिवो मारिरोगाद्युपद्रवान् हंति. सौम्यः सर्वजनप्रियो भवति. इत्थंभूत एवाशेषैरपि गुणशतैः कलितः सन् प्रवचनसारमागमरहस्यं परिकथयितुं युक्तो भवति, एते च सूरिगुणाः क्वचिदन्यथापि दृश्यंते, तद्यथा—अट्ठविहा गणिसंपई । चउगुणा नवरि हुंति बत्तीसं ॥ विणओ य चउब्भेओ । छत्तीसगुणा इमे तस्स ॥ १ ॥ अस्यापि व्याख्या—आचारश्रुतशरीरवचनवाचनामतिप्रयोगसंग्रहरूपाष्टविधा गणिसंपच्चतुर्विधा सती द्वात्रिंशत्सूरिगुणा भवंति. तत्र संयमेऽध्रुवोपयोगिता मदरहितत्वमनियतवासित्वमचंचलत्वं चेत्याचारसंपच्चतुर्धा. बहुश्रुतत्वं क्रमोत्क्रमादिवाचनया स्थिरसूत्रत्वं, उत्सर्गापवादादिभिर्विचित्रसूत्रत्वं, उदात्तादिघोषविशुद्धिश्चेति श्रुतसंपच्चतुर्धा. आरोहपरिणाहयोः समत्वं, अहीनांगतयाऽलज्जनीयावयवत्वं, संपूर्णेंद्रियत्वं,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृढसंहननं चेति शरीरसंपच्चतुर्धा. ग्राह्यवाक्यत्वं, मधुरवाक्यत्वं, रागाद्यनिश्रितवाक्यत्वं स्पष्टवाक्यत्वं चेति वचनसंपच्चतुर्धा. योग्यं ज्ञात्वोद्दिशति, समुद्दिशति, अपरिणतादौ दोषसंभवात्तत्रेदमध्ययनं त्वया पठितव्यमिति गुरुवचनमुद्देशः, तस्मिन्नेव शिष्येणाधिते गुरोर्निवेदिते स्थिरपरिचितं कुर्वीति गुरुवचनसमुद्देशः, तथाग्रेतने परिचिते नवं वाचयति, अर्थस्य निर्वाहं करोतीति वाचनासंपच्चतुर्धा. सामान्यतोऽर्थस्यावग्रहणमवग्रहः, अहं किंचित्पश्यामीत्यादि, तदर्थविशेषालोचनमीहा, अयं स्थाणुर्वा पुरुषो वेत्यादि, प्रक्रांतार्थविशेषनिश्चयोऽवायः, स्थाणुरेवायमित्यादि, निश्चितार्थस्य पश्चादपि स्मरणं धरणं धारणा चेति मतिसंपच्चतुर्धा. आत्मनः शक्तिं पुरुषमुपासकादिबलं, क्षेत्रं साधुभावितमितरद्वा, अयं प्रतिवादी राजामात्यो वा सांख्यः सौगतो वेति वस्तु विमृश्य वादमारभते, इति प्रयोगसंपच्चतुर्धा. बालवृद्धादियोग्यक्षेत्रग्रहणं निषद्यादिमालिन्यपरिहाराय वर्षासु पीठफलकादेर्ग्रहणं, यथाकालं स्वाध्यायोपधिप्रत्युपेक्षणाभिक्षादिषु विनियोगः, दीक्षागुरोः श्रुतगुरोः, पूजनं चैते संग्रहसंपच्चतुर्धा. तथा विनयश्च चतुर्भेदः, स चायं—आयारे सुसविणए। वक्खवणे चेव होइ बो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धव्वे ॥ दोसस्सयनिग्घाए । विणए चउद्दे सपमीवत्ती ॥ १ ॥ तत्र स्वयं संयमसमाचरणादिराचारविनयः, सूत्रं चार्थं वाचयतीत्यादिः श्रुतविनयः, अदृष्टधर्मं दृष्टपूर्वमिव ग्राहयतीति विक्षेपणाविनयः, क्रुद्धस्य क्रोधं विनयतीत्यादिर्दोषनिर्घातविनयः, सर्वेऽप्यमी मिलिताः षट्त्रिंशत्. अथवा—समत्तनाणचरणं । पत्तेयं अट्ठ अट्ठ नेदिल्ला ॥ बारसन्नेउ अ तवो । सूरिगुणा हुंति बत्तीसं ॥ १ ॥ यद्वा—वयछक्काइ अट्ठार—सेव आयारमाइ अठेव ॥ पायच्छित्तं दसहा । सूरिगुणा हुंति बत्तीसं ॥ १ ॥ यदिवा—विगहासणा य पिंको । कसायउवसग्गझाणसामाइयं ॥ नासा धम्मो एए । चउगुणिया हुंति सूरिगुणा ॥ १ ॥ ननु यस्मिन्नेते गुणाः सामस्त्येन न स्युः, स किं गुरुरेव न भवतीत्याह—'तयभावेति' कालादिदोषाणां तेषां षट्त्रिंशतो गुणानां समुदितानामभावे सत्यप्रमत्तो गीतार्थश्चेति गुणद्वयसहितोऽपि गुरुर्भवति, तत्राप्रमत्तः क्रियास्ववहितः, स हि परमपि प्रमाद्यंतं निःशंकं वारयति. गीतार्थः सूत्रार्थादिवेदकतया कुशलः, यदाह—सुत्ते अत्थे य तहा । उस्सगाववायभाववबहारे ॥ जो कुसलत्तं पत्तो । पवयणकुसलो तउ छद्धा ॥१॥ अयं हींगिताकारादिभिः परेषां भावमवबुध्य त-

For Private and Personal Use Only

दुचितदेशनया सुखं बोधं जनयतीत्येतद्गुणद्वयस्य मुख्यता, शेषास्तु गुणास्तत्परिकरप्रायाः, य एवंविधः स गुरुः पोत इव प्रवहणमिव स्वयं भवजलधिं तरत्यन्यानप्यनिश्रितांस्तारयति. यदाह—जह लहुदारुविरईओ । पोओ तारेइ गुरुअभारंपि ॥ तह कम्मलहुयपत्तं । सयं तरं तारए अन्नं ॥ १ ॥ ननु गुरुः परं कथं तारयतीत्युच्यते उपदेशद्वारेण, तथा चाह—

॥ मूलम् ॥—जञ्च न मणी न दीवा । न य चंदा न य रवीवि दिप्पंति ॥ तंपि सुगुरुवएसा । अत्थं हेलाइ पयडंति ॥ २७ ॥ व्याख्या—यत्र जीवाजीवादिकेऽर्थे न मणयश्चंद्रकांताद्याः, न दीपा गृहमणयः, न च चंद्राः शीतांशवः, न रवयोऽपि दीप्यंते, बहुवचनं जिनमतापेक्षं, मण्यादयोऽपि यमर्थं न प्रकाशयंतीत्यर्थः, तमप्यर्थं वस्तु सुगुरूपदेशा हेलया सुखेनैव प्रकाशयंति. अयमर्थः—न हि गुरुः करे धृत्वा कंचन संसारात्तारयति, किंतूपदेशदानेन पुण्यपापादिकान् भावांस्तथा कथंचित्प्ररूपयति, यथा संजातवैराग्याः श्रोतारः परिणामविशुद्ध्या स्वयमेव संसारसागरं तरंतीत्युपचाराद्गुरवोऽपि तारका एव. ॥ २७ ॥ उपदेशसारत्वमेव गुरोर्दर्शयति—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—नीणिंति कहं नविया । गंनीराउ नवंधकूवाउ ॥ जइ अवलंबं सुगुरु—वएसरासीउ न करिंति ॥ ३८ ॥ व्याख्या—स्पष्टा, नवरं नीणंतित्ति निर्गमंति. उक्तं च—अज्ञानबन्नदृशां । नविनां नवकूपसंकटे पततां ॥ एकैव नवति गुरुजन—वचनवरत्रा परित्राणं ॥ १ ॥ एवं सद्गुरुस्वरूपमुक्त्वाथ व्यतिरेकमाह—

॥ मूलम् ॥—न य चोयंति पमत्तं । नेव पयासंति विहिपथं सम्मं ॥ सवहचाटुवाई । ते गुरुणो नवपहसहाया ॥ ३९ ॥ व्याख्या—ये गुरवः प्रमत्तं धर्मे मंदादरं साधुं श्रावकं वा वत्स! किं प्रमाद्यसि? पुनः पुनर्दुर्लनेयं सामग्री, विरसावसाना हि विषयाः, कस्तेषु व्यामोहः? परमार्थबंधुर्धर्म एव, न ह्यसावाहत्य मोक्तुं युक्तः, इत्याद्युपदेशैर्न चोदयंति प्रवर्तयंति स्वकृत्येषु, तथा तथाविधाचारविकलतया मास्म लोकेऽस्माकमवज्ञाभूदिति न सम्यग्यथावस्थितं विधिपथं विधिमार्गं साधुश्रावकसामाचारीरूपं प्रकाशयंति, किंतु सर्वत्र पुण्यपापनिर्वृत्ते जने केवललोनावेशाच्चाटु मुखप्रियमेव वदंतीत्येवंशीलाश्चाटुवादिनः, ते गुरवो नवपथं भ्राम्यतां जीवानां सहाया इव नवंति. यदाह—जह लोहसिला अप्पंपि । बोलए तह

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विलग्गपुरिसंपि ॥ इय सारंतो अ गुरु । परमप्पाणं च बोलेइ ॥ १ ॥ इदानीं दृष्टांतगर्भं सद्गुरोर्माहात्म्यं वक्ति—

॥ मूलम् ॥—खीणोवि धम्मधाऊ । पएसिरज्जंमि जं समुल्लसिउं ॥ तं किर सम्मं सेविय। गुरुचरणरसायणस्स बलं ॥ ३० ॥ व्याख्या—गाथार्थः सुगमः, भावार्थस्त्वयं—यथा रोगिणो देहे राजयक्ष्मणा क्षीणोऽपि धातुः सुसेवितेन सम्यग्वैद्योक्तेन रसायणेनोपचर्यते, तथा प्रदेशिभूपते राज्ये नास्तिक्येन क्षीणोऽपि धर्मधातुः सुसेवितेन श्रीकेशिकुमारगुरोर्वचनरसायनेन पुनर्नवीकृत इति. व्यासार्थः कथानकगम्यस्तच्चेदं—

समस्ति केतकीनिव्रृ—द्भूरिवासात्र भारते ॥ चित्रमीश्वरवाल्लभ्यं । न मुंचति कदापि या ॥ १ ॥ तदर्धे श्वेतवीनाम । पूरस्ति स्वस्तिभाजनं ॥ यत्राढ्याश्च कवींद्राश्च । विशिष्टार्थैकदृष्टयः ॥ २ ॥ प्रतापतपनस्तत्र । प्रदेशिभूपतिर्बभौ ॥ मित्रशत्रुदृशं योऽदा—दंभोजकुमुदोपमाम् ॥ ३ ॥ यः स्वयं नास्तिको लोकान् । लौकायतिकशासने ॥ दृढीचक्रे चिरं द्यूत—कारवद् द्यूतदेवने ॥ ४ ॥ यः प्रमादो व्रतानीव । गव्यानीव सुरालवः ॥ पंचापि दूषयामास । शासना-

नि कुवासनः ॥ ५ ॥ प्रत्यक्षैकप्रमाणो यो । जीवस्वर्नरकादिकान् ॥ निह्नुतेस्माखिलानर्थान् ।
सिद्धचौर इवोज्झितः ॥ ६ ॥ शुक्लपक्षाः सदाचार—चतुरा अनगारिणः ॥ न यस्य विविशुर्दे-
शं। मराला इव जंगलं ॥ ७ ॥ सूर्यकांताजवत्तस्य । शौर्यवृत्तिरिव प्रिया ॥ सूर्यवन्महसां रा-
शिः । सूर्यकांतस्तु तत्सुतः ॥ ८ ॥ बभूव सारथिस्तस्य । चित्रश्चित्रधियां निधिः ॥ स ययौ
राजकार्येण । श्रावस्तीं पुरमन्यदा ॥ ९ ॥ अजितामोपदापाणि—र्मिलितस्तत्र भूभुजः ॥ पृ-
थुश्रि श्रीपदाभ्यासे । वासमंदिरमापसः ॥ १० ॥ अन्यदा पुत्रमित्राद्यै—र्युक्तं स्नातमलंकृतं
॥ परिपुरं स तत्रस्थो । यांतं लोकमलोकत ॥ ११ ॥ इंद्रस्कंदमुकुंदादि—यात्रान्यो वा महो-
त्सवः ॥ किं बहिर्विद्यते कोऽपी—ति भृत्यानन्वयुंक्त सः ॥ १२ ॥ तेऽपि ज्ञात्वा जगुः स्वा-
मिं—श्चतुर्ज्ञानमहोदधिः ॥ श्रीपार्श्वनाथसंताने । विश्रुतः श्रुतकेवली ॥ १३ ॥ केशी गणधरः
पुर्या । उद्यानमधुनापुनात् ॥ तमनंतशमं नंतु—मयं याति जनव्रजः ॥ १४ ॥ युग्मं ॥ अथा-
रूढो रथं चित्रो । विनोदेन वनं गतः ॥ प्रणम्य परया प्रीत्या । निषसाद गुरोः पुरः ॥ १५ ॥
पौरव्रातं च चित्रं च । समुद्दिश्याथ केशिना ॥ देशना विदधे धर्म—द्रुमपीयूषसारिणी ॥१६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथाशक्ति प्रपेदाने । धर्मं धीज्ञाजने जने ॥ नामग्राहं गुरुश्चित्र-मपृछद्धर्मकौशलं ॥ १७ ॥
स्वज्ञावजद्रकश्चित्रो । गुरुणा ज्ञाषितस्तदा ॥ महोदयपदं प्राप्त-मिवात्मानममन्यत ॥ १८ ॥
आदाय गुरुतः सार-सम्यक्त्वां द्वादशव्रतीं ॥ राजकार्यमसौ गौणी-कृत्य धर्मं सदा व्यधात्
॥ १९ ॥ श्रावं श्रावं गुरोर्वाचं । सोऽज्ञवन्नवतत्त्ववित् ॥ पायं पायं पयोऽब्दस्य । बद्धमूल इव
द्रुमः ॥ २० ॥ सिद्धसाध्योऽन्यदा चित्रो । व्रजन् निजपुरींप्रति ॥ गुरूणामाग्रहं तेने । तत्रागंतुं
कृतांजलिः ॥ २१ ॥ तेऽप्यूचुः सौम्य सञ्छायं । पुष्पितं फलितं वनं ॥ जूयोजिरजिगम्येत । प-
थिकैर्विहगैरपि ॥ २२ ॥ तदेवानजिगम्यं स्या-द्विलिंगुत्रयसाश्रितं ॥ यः कृषत्यरिवत्पांथ-प-
क्षिणां सहसाक्षिणी ॥ २३ ॥ एवं कुस्वामिना क्रांता । कांतापि श्वेतवी पुरी ॥ कथमाश्रीयते
सद्भि-स्ततः सारथिरज्यधात् ॥ २४ ॥ लब्धोऽप्यलब्धवद्भावी । धर्मोऽयं जगवन्मया ॥ यात्र-
त्प्रदेशिस्वामी मे । धत्ते धर्मविरोधतां ॥ २५ ॥ न तं बोधयितुं शक्तिः । कस्यापि जवतो वि-
ना ॥ विना जनार्दनं केन । दम्यते कालियोरगः ॥ २६ ॥ स्वरूपं स्वप्रज्ञोर्जानन् । नाहं कुर्वे
कदाग्रहं ॥ परं पश्यथ लाजं चे-त्तत्रांचध्वमेकदा ॥ २७ ॥ पूज्यैर्लाजार्थिजिस्तत्र । न चिंत्यं

For Private and Personal Use Only

उप०
चिंता०
३०७

स्वात्मसंकटं ॥ न लाज्जा सुखशीलस्य । वणिजोऽपि कचिद्यतः ॥ २८ ॥ विज्ञप्येति चचा-
लाशु । चित्तः स्वविषयंप्रति ॥ यतिज्ञर्क्किं प्रतिग्रामं । बोधयन् जनतानताः ॥ २९ ॥ प्रातश्च
श्वेतवीं सिद्धं । कार्यं विज्ञप्य भूभुजे ॥ स्थापयित्वांतरुद्यानं । स्वचृत्यानेत्रमन्त्रशात् ॥ ३० ॥
यदा केचिन्नरा अत्रा—यांति भून्यस्तलोचनाः ॥ दंभहस्ताः स्फुरद्धर्म—ध्वजा उध्धृतमूर्ध-
जाः ॥ ३१ ॥ तदांतःकाननं सर्वा—स्तानवस्थाप्य सत्वरं ॥ अनवद्या नित्रेद्यास्ते । कर्णाज्य-
र्णमुपेत्य मां ॥ ३२ ॥ धर्मं व्यधाद्यो मंत्री । रहः स्वगृहमध्यगः ॥ करोति प्रकटां लक्ष्मीं ।
को वा राज्ये कुनायके ॥ ३३ ॥ गुरवोऽपि निजज्ञान—ज्ञातज्ञातव्यमंबराः ॥ चिंतयामासु-
राबुद्ध्य । प्रबोधार्हं प्रदेशिनं ॥ ३४ ॥ यद्यसौ बोध्यते बोध—शक्तिस्तन्नः किमन्यथा ॥ न
वज्रं वज्रमित्याख्यां । लजतेऽद्रिमदारयन् ॥ ३५ ॥ सन्मार्गे स्थापयेन्मिथ्या—दृशमेकमपी-
ह यः ॥ त्रसस्थावरजंतूना—मजयं तेन घोषितं ॥ ३६ ॥ भृंगा इव सरंगास्ते । केतकीमग-
मंस्ततः ॥ अविन्यतो महीपाल—दुर्वाक्कंटकदारणात् ॥ ३७ ॥ लोकान् पथि प्रतिग्राम—
मवस्थाप्य स्वशासने ॥ प्रापुर्विजयरीतिज्ञा । गुरवः श्वेतवीं पुरीं ॥ ३८ ॥ प्राग्वार्णितस्वरूपांस्ता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

—न्निरीक्ष्यांतर्वनं मुनीन् ॥ ते नरास्तेनिरे शुद्धिं । वन्नमागत्य मंत्रिणं ॥ ३९ ॥ दिने तद्वंद-
ने शंक—मानः स्थानस्थ एव सः ॥ अवंदत गुरून् दत्त—सप्ताष्टाभिमुखक्रमः ॥ ४० ॥ मनो
गूढपथत्वेना—परिज्ञेय गमागमं ॥ प्राहिणोद्गुरुसेवार्थै । दिवापि स पुनः पुनः ॥ ४१ ॥ सा-
यं गत्वा गुरून्नत्वा । सोऽवग्नाथ तथा कुरु ॥ जैनो धर्मः प्रथामेति । यथा पृथ्वीशपर्षदि ॥
॥ ४२ ॥ सादीव शूकलमगस्त्युदयोंबुधिं वा । मंत्रीव सर्पमिव पाल इव द्विपेंद्रं ॥ अंभोऽभिषेक
इव दुग्धमुदस्तफेनं । एनं समर्थ शमयस्व नृपं विरुद्धं ॥४३॥ गुरुरूचे न चादृष्टं । वेध्यं वीरो-
ऽपिविध्यति ॥ अदृष्टमातुरं धीमान् । वैद्योऽपि नो चिकित्सति ॥४४॥ काष्टं तक्षापि नादृष्टं ।
सरलीकुरुते क्वचित् ॥ अदृष्टं तं तवाधीशं । बोधयामः कथं वयं ॥ ४५ ॥ मयोपायेन स प्रा-
त—रिहानेय इति ब्रुवन् ॥ चित्रः स्वमंदिरं गत्वा । भूपमूचे निशात्यये ॥ ४६ ॥ नेतर्यें तत्र
कांबोजाः । संति प्राग्ढौकिता हयाः ॥ अद्य गत्वा परीक्षस्व । चतुरश्चतुरोऽपि तान् ॥ ४७ ॥
तेष्वेकं हयमारुह्य । वाह्यालीवर्त्मना नृपः ॥ चित्रेण तां दिशं निन्ये । यत्र ते संति सूरयः ॥
॥ ४८ ॥ दूराध्वक्रमणोत्पन्न—क्लमं प्रस्वेदविक्लिदं ॥ राजानमानयच्चित्रो । वनं निर्ग्रंथपावनं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० ॥ ४९ ॥ छेकैर्वचनवैचित्र्या—न्नीयंते यां दिशं रयात् ॥ संचरंते तया पृथ्वी—पालका बा-
लका इव ॥ ५० ॥ तदा पुरो निविष्टेषु । केषुचिद्भद्रकात्मसु ॥ सुध्वानो विदधानोऽभू—द्ग-
चिंता० णभृद्धर्मदेशनां ॥ ५१ ॥ श्रुता तरुतलस्थेन । देशना सा प्रदेशिना ॥ ऊचे चित्र किमत्रास्ति
३०९ । घरटः कोऽपि कानने ॥ ५२ ॥ चित्र ध्वनिरियं कर्ण—कोटरे मे कटूयसे ॥ स्वामिन्भक्तस्त्व-
मेनं चे—त्तदा वारय वारय ॥ ५३ ॥ गत्वाथ पुनरागत्य । चित्रो भूपमभाषत ॥ देव धर्मं व-
दन्नस्ति । वने कोऽप्येष भिक्षुकः ॥ ५४ ॥ रुषोत्तालोऽथ भूपालो—ऽभ्यधाद्भृकुटिभीषणः ॥
कथं चित्र विवेशासौ । देशेऽस्मिन् मयि रक्षके ॥ ५५ ॥ कदर्थयिष्यतेऽनेन । मद्देशोऽप्यन्यदे-
शवत् ॥ यद्येष ताड्यते बाढं । तदुपैत्यपरोऽपि न ॥ ५६ ॥ एवमेवैवदित्युक्ति—र्राजा चि-
त्रेण संयुतः ॥ चचाल रोषरक्ताक्षो । भूमानुत्कीर्णमुद्गरः ॥ ५७ ॥ चित्रेणाथ भियां धाम्ना—
ऽप्यधीयत नराधिपः ॥ कोऽयं स्वामिन् वृथा भिक्षु—मशके तव विक्रमः ॥ ५८ ॥ पृच्छ्यते स
निजज्ञान—हेतुः किंचिदगोचरं ॥ येनोत्तरप्रदानाया—शक्तो जिहेति स स्वयं ॥ ५९ ॥ ततः
क्षीणाभिमानोऽसौ । रात्रिमादाय नंक्ष्यति ॥ तत् श्रुत्वा नापरोऽप्यत्र । कोऽपि भिक्षुः समे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्यति ॥ ६० ॥ एवं च तव चातुर्यं—यशो जगति रंस्यते ॥ आदत्ते वीरमानी को । भिक्षु-
कथनदुर्यशः ॥ ६१ ॥ साधुस्ते धीर धीरेषा । चित्रमेवमभिष्टुवन् ॥ पुरो गुरुमुदारांगं ।
निरीक्ष्येति जगाद सः ॥ ६२ ॥ पश्य चित्र कियन्मात्र—मेष स्थूलो निरीक्ष्यते ॥ निश्चित-
स्य परान्नस्य । न स्यात्किं स्थूलताथवा ॥ ६३ ॥ मन्ये म्रियेत जठरं । नास्यैकग्रामभिक्षया ॥
दुर्भिक्षं तत्र वृष्टेऽपि । मेघे स्याद्यत्र यात्यसौ ॥ ६४ ॥ किमेवं रारटीत्येव । दह्यमान इवाग्निना
॥ यद्वा किंचिद्दिनायामं । भुक्तमस्य न जीर्यति ॥ ६५ ॥ जेजुर्गुरोस्तरोर्दूरी—भावं भाविवि-
हंगमाः ॥ पूर्वासीनास्तमायातं । दृष्ट्वा द्विपमिवोन्मदं ॥ ६६ ॥ अथ गत्वाग्रतः स्तब्धः ।
कृतकेदारयात्रवत् ॥ भूपः कोपविशामीति । सूरिं पप्रच्छ शाठ्यतः ॥ ६७ ॥ चक्रे स कृतिनां
चक्री । लापमालापगोचरं ॥ राजन् भूमिस्तवैवेयं । यथारुचि तदास्यतां ॥ ६८ ॥ यथा स्था-
नं निविश्याथ । नृपः सोल्लुंठमभ्यधात् ॥ देहानुमाननिर्ह्रादः । किमाचार्य वदन्नसि ॥ ६९ ॥
धर्मं वच्मीति गुरुणा । प्रोक्ते धर्मस्तु कस्तव ॥ किं च धर्मफलं भूपे—नेति पृष्टे गुरुर्जगौ ॥
॥ ७० ॥ धर्मोऽस्माकं दयासत्या—स्तैन्यब्रह्मादिलक्षणः ॥ फलं तत्कारिणो स्वर्गो । नरकस्त्वित-

For Private and Personal Use Only

उप० रस्य च ॥ ७१ ॥ जापयन्निव हुंकारै—र्भूतान् भूमिपतिर्जगौ ॥ वाक्प्रपंचममुं मुंच । वंच्येऽहं
न जवादृशैः ॥ ७२ ॥ लोकेन सह किं वैरं । तत्रास्ति पितृघातजं ॥ येन स्वैरमसौ जोगान् ।
चिंता० भुंजानो दंज्यते त्वया ॥ ७३ ॥ किं नाम पामरप्रायं । मायिन्मामपि मन्यसे ॥ सजासमक्ष-
३११ मक्षोद—क्रमं वक्षि यदीदृशं ॥ ७४ ॥ त्वया जल्पितं यदछं । ये फले पुण्यपापयोः ॥ तौ
स्वर्गनरकौ धूर्तै—रेव स्वमतिकल्पितौ ॥ ७५ ॥ नास्ति स्वर्गोऽत्र तद्भासि—जनानामनि-
रीक्षणात् ॥ अंतर्व्याप्त्या साध्यसिद्धे—रुदाहृतिकथा वृथा ॥ ७६ ॥ एवं निषेधिते स्वर्गे । न-
रकोऽपि निषेधितः ॥ कषितो निष्तुषः पक्षो । ह्येष जात्यसुवर्णवत् ॥ ७७ ॥ तथाहि—बार्ह-
स्पत्यमते विद्वा—नासीन्मम पितामहः ॥ स मामुत्साहयामास । भूताब्रह्मादिकर्मसु ॥ ७८ ॥
अनूदर्हन्मते वद्ध—मतिर्मम पितामही ॥ दयादमादिपुण्येषु । सा मां नित्यं न्ययोजयत् ॥
॥ ७९ ॥ अनावद्धमुखो लोक—स्तदानीमित्यजाषत ॥ राजायं नरकं याता । राज्ञी च त्रिदि-
वं पुनः ॥ ८० ॥ तौ द्वावपि मया मृत्यु—समयेऽज्यर्थितौ जृशं ॥ यायाश्चेन्नरकं स्वश्च । कृत-
कर्मवशौ युवां ॥ ८१ ॥ तदागत्यावबोध्यास्तं । मां प्राणेज्योऽपि वल्लजं ॥ येन कुर्वे सदाध-

र्मे—कर्म निर्मुक्तपातकः ॥ ७२ ॥ तयोः प्रमितयोर्मार्गे—मह्माखोकयं चिरं ॥ दवाग्निद
ग्धः शाखीव । कोऽपि नाविरभूत्पुनः ॥ ७३ ॥ तदादि नरकस्वर्ग-निषेधं दृढधीर्व्यधां ॥ रा-
झेत्युक्ते जगौ सूरिः । पूरयन् ध्वनिनांबरं ॥ ७४ ॥ जनं स्वकर्मरोगार्तं । विषयापथ्यतो वयं
॥ वारयन्तो हितधिया । जवामः किमु वैरिणः ॥ ७५ ॥ तौ स्वर्गनरकौ धूर्तै—रेव स्वमति-
कल्पितौ ॥ इत्युक्तिरेव जवतो । जाति स्वमतिकल्पिता ॥ ७६ ॥ तारतम्यं कचित्ताव—द्भव-
स्थसुखदुःखयोः ॥ विश्रामत्येव वैपुल्य—तारतम्यमिवांबरे ॥ ७७ ॥ जूप तद्यत्र विश्रांतं । तौ
स्वर्गनरकौ मतौ ॥ आह्लादवृद्धिविश्राम—स्थानमेवं शिवोऽपि च ॥ ७८ ॥ यः स्वर्गनरकाजावे
। प्रागुपादीयत त्वया ॥ न कोदपरशुस्पर्श—मपि हेतुः सहेत सः ॥ ७९ ॥ स हि त्वदाश्रि-
तः किं वा । किं वा सर्वजनाश्रितः ॥ आद्यश्चेत्तर्हि पाथोधि—मध्यमीनैर्विरोधजाक् ॥ ८० ॥
द्वितीयश्चेत्तदास्माभि—र्ज्ञानादेवादिदर्शनात् ॥ अयमन्यतरासिद्धो । याति हेतुरहेतुतां ॥
॥ ८१ ॥ चार्वाका एव चेत्सर्व—शब्देन स्युस्तदप्यसत् ॥ अदृष्टो दृष्टिहीनैर्हि । गिरिर्नाजाव-
मर्हति ॥ ८२ ॥ स्तः स्वर्गनरकावेक—शब्दवाच्यत्वतो नृप ॥ घटपेटापटा यद्व—द्व्यतिरेकेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नत्रोंबुजं ॥ ९३ ॥ तस्माद्वियेत एव स्व—र्नरकौ नरनायक ॥ अनागमाश्च चेत्पित्रो—र्व्यामूढोऽसि तदा शृणु ॥ ९४ ॥ विद्यते तेऽनवद्यांगी । सूर्यकांतेति या प्रिया ॥ तदासक्तं नरं चेत्वं । लज्जसे हंसि तद् ध्रुवं ॥ ९५ ॥ हन्यमानस्त्वया वीर । निर्दयं वक्ति यद्वयं ॥ सुकृद्विमुंच मां स्वामिन् । यामि धाम निजं यथा ॥ ९६ ॥ तत्रेति शिक्षया स्वामिन् । त्रो त्रो त्यजत चापलं ॥ चापलस्यैव दोषेण । विडंब्येऽहं महीभुजा ॥ ९७ ॥ रटन्नपीति चाहूनि । स त्वया न विमुच्यते ॥ नरकान्नारकारदै—र्मुच्यते त्वत्पिता कथं ॥ ९८ ॥ किंच–अध्यासीनं सज्ञामध्यं । त्वां दिव्यस्त्रग्विलेपनं ॥ सर्वांगसंगिशृंगारं । वीरविद्रूपरिच्छदं ॥ ९९ ॥ अतिस्वर्गपतिश्रीकं । मातंगो कोऽपि जाषते ॥ आलोचाय सकृद्वचों—गेहमेहि महीपते ॥ १०० ॥ तज्गिरा तां सज्ञां मुक्त्वा । यासि त्वं तत्र चेन्नृप ॥ तदा त्वदंबिका देवी—र्भूतात्रापि समेति सा ॥ १ ॥ योजनानां पंचशती—मूर्ध्वं याति निरर्गलः ॥ मनुष्यलोकदुर्गंधो । नायांति विबुधास्ततः ॥ २ ॥ मुनींद्रोः केवलोत्पत्तौ । जिनजन्मादिपर्वसु ॥ प्राक्प्रेम्णा वा समायांति । नृलोकमपि निर्जराः ॥ ३ ॥ अथ राजा जगौ स्वर्गे । नरकं वा प्रयाति कः ॥ आत्मा

For Private and Personal Use Only

चेत्तर्हि नास्त्यत्र । स एवेति विचार्यतां ॥ ४ ॥ संभूताद्भुतसंघाता—दात्रिर्भवति चेतना ॥
तेषु काले विशीर्णेषु । सा नश्यति निरन्वया ॥ ५ ॥ यैरात्मासौ पृथग्भूतो । भूतेभ्यः परि-
कल्प्यते ॥ तैः प्रत्यक्षप्रमाणेना—नुमानेनागमेन वा ॥ ६ ॥ न भूतेभ्यो विभिन्नोऽसौ । ता-
वदध्यक्षगोचरः ॥ न वा ज्ञेयोऽनुमानेन । तद्धि प्रत्यक्षपूर्वकं ॥ ७ ॥ मिथो विवदमानेना-
गमेनापि न मीयते ॥ यद्वानुमानागमयोः । प्रामाण्यमपि दुर्घटं ॥ ८ ॥ अन्यच्चैको मया
चौरो । धृतः क्षिप्तश्च भाजने ॥ जतुनिश्छिद्रिते लोके—मृतः स गदितः क्षणात् ॥ ९ ॥ न
चौरजीवो निर्गन्तुं—स्तत्र छिद्रमपातयत् ॥ नापरे कृमिजीवाश्च । विशंतस्तेन नास्त्ययं ॥ १० ॥
अथोवाच गुरुर्धीर-ध्वनिध्वनितदिङ्मुखः ॥ भूपेदं स्वसुहृज्ज्योत्स्ना-मुच्यमानं विराजते ॥
॥ ११ ॥ या भूतेभ्यो जृंभमाणा । त्वया प्रोच्यत चेतना ॥ तेषु सत्यसती वा सा । सती चे-
त्किमु नेक्ष्यते ॥ १२ ॥ नेक्ष्यते सानभिव्यक्ते-रिति चेद्रूत्स्यदः कथं ॥ प्रादुर्भावं पुरो वीक्ष्य
। सुज्ञानैवेति वक्षि चेत् ॥ १३ ॥ प्रत्यक्षैकप्रमाणस्य । वक्तुं युक्तमिदं न ते ॥ अस्त्वेतदपि
सा तेषु । विद्यते किं ध्रुवाध्रुवा ॥ १४ ॥ ध्रुवा चेत्तर्हि निर्नाम । नश्यतीति वृथा वचः ॥ अ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० नुत्पन्नाच्युतस्थैर्य—रूपं हि ध्रौव्यलक्षणं ॥ १५ ॥ अध्रुवा चेत्तदा भूतां—तरेभ्यः स्यात्स्वयं
चिंता० च वा ॥ भूतांतरेभ्य इति चे—त्तदा स्यादनवस्थितिः ॥ १६ ॥ स्वयं चेत्तर्हि कायस्य । परि-
णामेऽन्यदापि वा ॥ कायस्यैव परिणामे । न पूर्वमिति रौषि चेत् ॥ १७ ॥ सतीति मुख्यपक्ष-
३१५ स्य । तदा लग्नोपदेहिका ॥ अन्यदापीति चेत्तर्हि । लोष्ट्वादिषु भवेन्न किं ॥ १८ ॥ असत्ये-
वेति चेत्तत्कि—मसदुत्पादनक्रमः ॥ उत्पादयति नो तैलं । सिकताभ्यो बली भवान् ॥ १९ ॥
मधुकधातकीपुष्प—सुगंधर्यादिवस्तुषु ॥ असत्यपि हि जायेत । शक्तिरुन्मादिकेति चेत् ॥
॥ २० ॥ नैवं तेष्वपि सा शक्ति—रस्ति काचन सूक्ष्मिका ॥ अन्यथा शालिसूर्पाज्यै—रपि
माद्येत कश्चन ॥ २१ ॥ सर्वदर्शिभिरात्मायं । प्रत्यक्षेण प्रमीयते ॥ शेषैरप्यनुमानेन । न च
तस्याप्रमाणता ॥ २२ ॥ परभावमजानानो—ऽनुमानस्यापमाननात् ॥ ह्री चार्वाकः सभागर्त्तं ।
किमायाति च वक्ति च ॥ २३ ॥ आप्तोपज्ञः प्रमाणं स्या—दागमोऽपि न संशयः ॥ आप्तो हि
रागरोषाभ्यां । विमुक्तः स हि सत्यवाक् ॥ २४ ॥ अत्रानुमानं ज्ञानं हि । गुणः स न निरा-
श्रयः ॥ अन्वयव्यतिरेकाभ्या—मात्मैव स्यात्तदाश्रयः ॥ २५ ॥ कुर्वेऽकृषि करिष्येऽह—मिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० त्रैकालिकी क्रिया ॥ ज्ञानभूतेषु नो पंगु—जडेषु लभते स्थितिं ॥ २६ ॥ अहं सुखी त्वहं
दुःखी । पुल्लिंगेनेत्यहं ध्वनिः ॥ ज्ञानभूतेषु न क्लीब-जडेष्वाश्रयमश्नुते ॥ २७ ॥ सर्वक्रिया-
चिंता० णामधिभू-रहं प्रत्ययगोचरः ॥ पुण्यपापफलं भोक्ता । संसर्ता च भवार्णवे ॥ २८ ॥ देहाद्भि-
३१६ न्नोऽपि देहेन । संपृक्तः क्षीरनीरवत् ॥ चेतनालक्षणोऽनक्ष-लक्ष्यश्चात्मा विचार्यतां ॥ २९ ॥
युग्मं ॥ किंच—पुंसा नीरंध्रकोष्ठांतः । कृतशंखध्वनिर्बहिः ॥ यथा याति तथा चौर—जीवः
स निरगात्ततः ॥ ३० ॥ नीरंध्रेऽपि यथा लोहे । प्रविशत्याशु शुक्षणिः ॥ कृमिजीवा विशा-
मीश । विविशुस्तत्र ते तथा ॥ ३१ ॥ भूपोऽथाजिदधे सूरे । जीवो यदि सदा सदृक् ॥ त-
त्किं क्षेप्तुं शरं दूरे । युवालं न तु बालकः ॥ ३२ ॥ किं वा वहति भूयांसं । युवा भारं न
चेतरः ॥ श्रुत्वेत्यवोचदाचार्यः । संदेहद्रोहिणीं गिरं ॥ ३३ ॥ युवापि मृदुना चापे-नेषुं दूरं
न निक्षिपेत् ॥ न विहंगिकया कृछ्या । वहेद्भारं च दुर्वहं ॥ ३४ ॥ एवं मृदुलदेहत्वा—न्न
क्षेप्तुं दूरतः शरं ॥ न वा भूरिभरं वोढुं । प्रभूयेत नृपार्भकः ॥ ३५ ॥ यथा स एव च प्रौढ
—चापो दृढविहंगिकः ॥ स्वस्वकार्यक्षमस्तद्व—ज्जीवः पर्याप्तविग्रहः ॥ ३६ ॥ भूपोऽन्यथान्म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या जीवन् । मृतश्चैको मलिम्लुचः ॥ अतोलि न पुनर्नार—भेदोऽमूत्तेन नास्त्यसौ ॥ ३७ ॥
दृतेः पूर्णस्य वातेन । रिक्तस्यापि च तोलने ॥ तुला समा तथांगस्य । सात्मनोऽनात्मनोऽपि
च ॥ ३८ ॥ एवमुत्तरयन् सूरि—रन्यधीयत भूभुजा ॥ स्तेनः कोऽपि मया खड्ग—प्रहारैः खंड-
शः कृतः ॥ ३९ ॥ लुलोके न तु तत्रात्मा । प्रयत्नेनापि वीक्षितः ॥ यद्ययं स्यात्तदीक्ष्येत ।
स्फुरन्मीन इवोदधौ ॥ ४० ॥ गुरुर्जगौ पर्शुघातै—र्दारितेऽरणिदारुणि ॥ वह्निमालोकमानः
स्या—द्यथा मूर्खस्तथा भवान् ॥ ४१ ॥ वह्निर्दारुणि सौरभ्यं । पुष्पे तैलं तिलेऽपि च ॥ तेजः
सूर्योपले वारि—शशांकाश्मन्ययो मृदि ॥ ४२ ॥ शैत्यं हिमे चौष्णमग्नौ । श्चैत्यं सुरसरिज्जले
॥ घृतं दध्न्यंकुरो बीज । इव जीवोऽस्ति वर्ष्मणि ॥ ४३ ॥ एवं तमोघ्नं वाग्ज्योतिः । सूरिसूरे
वितन्वति ॥ स पप्रच्छ सदृग्जंतुः । कथं कुंथुगजांगयोः ॥ ४४ ॥ सूरिः स्माह यथा दीपो । घ-
टस्थस्तं प्रकाशयेत् ॥ महासद्म पुनः प्राप्य । तदपि द्योतयेदसौ ॥ ४५ ॥ एवमात्मा कुंथुदे-
हे । तिष्ठन् शक्तिं समस्य याम् ॥ प्राप्य द्विपवपुः शक्तिं । तादृशीं स्वां प्रकाशयेत् ॥ ४६ ॥
साक्षादात्मानमप्रेक्ष्य । न प्रत्येमि कथंचन ॥ इत्यालापिनि भूपाले । बभाषे श्रुतकेवली ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ४७ ॥ राजन्नमूनि पत्राणि । कंप्यंते केन भूरुहां ॥ वायुना चेत्तदा वायुः । स मे साक्षात्प्रदर्श्यतां ॥ ४८ ॥ अलक्ष्यमपि चेद्वायुं । यत्र कंपानुमानतः ॥ मन्यसे तत्किमात्मानं। न चैतन्यानुमानतः ॥ ४९ ॥ ततः प्रमुदितस्वांतो--ऽवनीकांतोऽन्यथादिति ॥ प्रज्ञो चिराद्विदीर्णोऽयं । कुग्रहग्रंथिरद्य मे ॥ ५० ॥ जीवाजीवादिकान् भावान् । भवदुक्तिसुधांजनैः ॥ भूभूभ्रादीनिवांधोऽहं । स्वामिन् पश्यामि संप्रति ॥५१॥ परं न पूर्वजैः क्षुण्णं । पंथानं मोक्तुमुत्सहे ॥ तन्मुंचन् मुच्यते जंतुः । श्रियापि श्रेयसापि च ॥ ५२ ॥ ऊचे च सूरिणा राजन् । कोऽयं तव मतिभ्रमः ॥ पूर्वजा ह्यनुवर्त्यंते । सत्कर्मस्वेव कोविदैः ॥५३॥ पूर्वजेषु दरिद्रेषु । दिदरिद्रासतीह कः ॥ को वा रोगाभिभूतेषु । तेषु कामयते रुजः ॥ ५४ ॥ यथायःशीसकश्वेत—स्वर्णमाणिक्यखानिषु ॥ प्राप्तासु कुरुते विद्वा—नुत्तरोत्तरसंग्रहं ॥ ५५ ॥ यः पुनः प्राग्मया प्राप्त—मित्ययस्येव सादरः ॥ नोत्तरोत्तरसंग्राही । स शोच्यः खलु बालिशः ॥ ५६ ॥ एवं त्वमपि नास्तिक्यं । प्राक्प्राप्तमिति न त्यजन् ॥ कदाग्रहग्रहग्रस्तः । सतां शोच्यो भविष्यसि ॥ ५७ ॥ एवं केशिकुमारेण । गुरुणा प्रतिबोधितः ॥ मुक्त्वा व्यामोहवन्मोह—मवदन्भक्तिभाग्नृपः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ५८ ॥ प्रभो त्वय्यपराद्धं य—न्मया सोल्लुंठभाषया ॥ तत्क्षमस्व क्षमाशीला । भवंति हि भवादृशाः ॥ ५९ ॥ त्वं मम व्याहृतैर्नाथ । बाधामाबाधकैरपि ॥ ताप्यते ग्रीष्मलूकाभिः । किं वा मेरुवनावनी ॥ ६० ॥ प्रभो मिथ्यात्वपाथोधौ । मज्जंतं मां समुद्धर ॥ पितृभ्यां दुर्विनीतोऽपि । पुत्रो नापह्युपेक्ष्यते ॥ ६१ ॥ चित्र त्वमपि सूरींद्रा—नमूनेव गुरुं कुरु ॥ येनैकधर्मिणोः प्रीति—रावयोः स्याद्भंगुरा ॥ ६२ ॥ चित्रोऽवदत्त्वदाज्ञातः । श्रावस्तीं प्रागहं गतः ॥ अस्मादेव गुरोर्धर्म—मादां रत्नं निधेरिव ॥ ६३ ॥ तन्मिष्टं यन्निजैर्दृष्ट—मिति लोकवचः स्मरन् ॥ धर्मं लगयितुं त्वाम—प्यानयं श्रीगुरूनिह ॥६४॥ भाग्यवानसि धन्योऽसि । यद्गुरोरस्य वाग्जलैः ॥ प्रविक्षालयिषस्यद्य । सद्यः स्वावद्यकश्मलं ॥ ६५ ॥ अथ भूपोऽवदच्चित्र । भृत्यः सत्यस्त्वमेव मे ॥ प्राप्य धर्मनिधिं यन्मे । न न्यधुक्षः कुभृत्यवत् ॥ ६६ ॥ मनोरथरथं पुण्य—पथे मम नियोजयन् ॥ त्वं सम्यक्सारथिश्चित्र । शेषाः शाकटिकाः पुनः ॥ ६७ ॥ चित्रं मित्रमिवालिंग्य । भूपोऽथ गुरुसन्निधौ ॥ सम्यक्त्वभूषणां सम्य—गादत्त द्वादशव्रतीं ॥ ६८ ॥ अरिषड्वर्गमुच्छेत्तुं । धर्मेषु विलसन्मतिः ॥ गुरुणोत्साहयांचक्रे । सेवकः स्वा-

For Private and Personal Use Only

म्निनेव सः ॥ ६९ ॥ ईक्षुवाटकवद्भाव्य—शालावच्छारदाभ्रवत् ॥ राजन् प्राक्सुंदरो भूत्वा ।
माभूः पश्चादसुंदरः ॥ ७० ॥ गंगौघ इव वर्षाभ्र—मिव दूर्वेव सर्वतः ॥ वर्धमानपरिणामो ।
भूयास्त्वं जिनशासने ॥ ७१ ॥ दत्ते धर्मोऽयमाराध्य—मानः स्वर्गादिसंपदः ॥ आत्तमुक्तः पुनः
प्राज्य—दुःखाय प्रभुवद्भवेत् ॥ ७२ ॥ मुक्तास्रजमिवाधाय । हृदि शिक्षां गुरोरिमां ॥ आगत्य
नगरीं भूपो । भृत्यैरेवमघूघुषत् ॥ ७३ ॥ पौराः शृणवंतु यः कोऽपि । भूपमाराद्धुमिच्छति ॥ स
गत्वा धर्ममादत्तां । गुरोः केशिकुमारतः ॥ ७४ ॥ प्रकृत्या भद्रका लोका—स्तद्भूपतिवचस्त-
दा ॥ क्षुधार्त्ता भोजनाह्वान—मिव सम्यक् प्रपेदिरे ॥ ७५ ॥ नक्तंदिवमहीनाथ । महीनाथेन
संदधे ॥ स्वादुवारिरिणोत्तीर्णै—नेव जैने मते मतिः ॥ ७६ ॥ धर्मेणेवात्तरूपेण । यशसेवांग-
धारिणा ॥ श्वेतवी श्वेतविहार—हारिणी तेन निर्ममे ॥ ७७ ॥ सुचेताः केतकीनेता । त्रि-
नेता क्रूरकर्मणां ॥ सप्तग्रामसहस्रेश—श्चतुर्धा राज्यमातनोत् ॥ ७८ ॥ कोशायैकं बलायैक-
मेकमंतःपुराय सः ॥ दयादानाय राज्यस्य । भागं चैकमकल्पयत् ॥ ७९ ॥ त्रिसंध्यं पूजया-
मास । जिनं प्रतिदिनं नृपः ॥ पौषधं पुण्यपोषाय । चतुःपर्व्यां चकार च ॥ ८० ॥ यदादि तेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सद्धर्म—चिंतामथिरलभ्यत ॥ तदादि विषयग्राव—खंडेष्वास्थां व्यमुच्यत ॥ ७१ ॥ शृंगा-
रांभोधिशफरी । सूर्यकांताथ तत्प्रिया ॥ विरक्तेऽस्मिन्नलं भोग—कामा वामा व्यचिंतयत् ॥
॥ ७२ ॥ गृहस्थोऽपि व्रतीवायं । भोगभीरुर्नेही रतिः ॥ प्रतिपन्नः शिवाध्वानं । मां व्याघ्रीमिव
मन्यते ॥ ७३ ॥ हहा कुस्वामिनानेन । विना विषयचारिणा ॥ मम यौवनकल्पद्रु—र्नीतो नि-
ष्फलतां कथं ॥ ७४ ॥ सत्यस्मिन्मयि कोऽप्यन्यो । न रज्येत सचेतनः ॥ को जीवत्युरगे द-
क्षो । जिघृक्षति फणामणिं ॥ ७५ ॥ तदेनं हतकं हत्वा । दत्वा राज्यं स्वसूनवे ॥ कृत्वापरं
पतिं किंचि—द्भविष्यामि सुखास्पदं ॥ ७६ ॥ ददौ सा विषमिश्रान्नं । पत्युः पौषधपारणे ॥ हा
योषिद्विषवल्लीव । मृत्यवे पोषितापि हि ॥ ७७ ॥ वपुर्व्यापिविषावेग—वेदनाविह्वलीकृतः ॥
वध्वा विलसितं बुध्वा । चित्तमाचीकथन्नृपः ॥ ७८ ॥ कथंचिद् ज्ञापयित्वा तं । पत्न्या दुः-
कर्ममर्म सः ॥ सावष्टंभमभाषिष्ट । सुकृतेर्नुर्वैपुर्व्यर्थयात् ॥ ७९ ॥ मम पुण्यफलं दत्वा । माभू-
वन् येऽत्रकेशिनः ॥ केशिनस्ते गणधराः । सुदूरे चित्र संप्रति ॥ ८० ॥ भृत्यो मंत्री सुहच्चि-
त्तं । चित्र पूर्वमभूर्मम ॥ अधुनाराधनाकाले । त्वं गुणज्ञ गुरुर्भव ॥ ८१ ॥ न राज्यं न सुता-

उप० ॥ श्रांतः—पुरिका न च जीवितं ॥ मनो मे परमब्रह्म—लीनमिछति संप्रति ॥ ९२ ॥ विना
धर्मौषधं संप्र—त्यपरत्रौषधे क्वचित् ॥ मा यतिष्टाश्चिराच्चित्र । पुण्यैः प्राप्तोऽस्त्ययं क्षणः ॥
चिंता० ॥ ९३ ॥ चित्रोऽथ तत्प्रसादाना—मित्रुरानृण्यमंजसा ॥ दशधाराधनां साधु—रिव भूपं व्य-
३१२ धापयत् ॥ ९४ ॥ ऊचे च मा क्रुधं कार्षी—र्वीर धीरधुरंधर ॥ पुरापि कामद्रूनाया-मस्यां
देव त्वयोषिति ॥ ९५ ॥ स्वर्गश्रियं चिरात्प्राप्या—मचिराद्ददती तव ॥ प्रशांत सूर्यकांतेयं ।
हितकृन्न तु वैरिणी ॥ ९६ ॥ यद्यथा कारितं तेन । तत्तथा भूभुजा कृतं ॥ ध्यायता बंधुबु-
द्ध्यैव । स्ववधूं वंधकीमपि ॥ ९७ ॥ क्षणाद्देवगुरुध्यान—धूतपातकवीवधः ॥ प्राप पुण्यरथा-
रूढः । सौधर्मं त्रिदिवं नृपः ॥ ९८ ॥ विमानं तत्र सूर्याभं । प्रस्तटेऽस्ति त्रयोदशे ॥ दिव्य-
योजनलक्षाय—त्सार्धद्वादशविस्तृतं ॥ ९९ ॥ तत्रोपपातशय्यायां । प्रलंबितपटांतरे ॥ जीवः
प्रदेशिभूपस्य । देवत्वेनोदपद्यत ॥ २०० ॥ पर्याप्तिं पंचधा दिव्य—र्द्धिवीक्षणवीक्षितं ॥ न-
त्का अप्सरसोऽभ्येत्य । जय नंदेति तं जगुः ॥ १ ॥ मम कृत्यं किमत्रेति । पृच्छंतं तमबूबुधन् ॥
अमरास्तद्विमानस्थाः । सर्वं कृत्यं सुधाभुजां ॥ २ ॥ ह्रदस्नानाभिषेकालं—कारपुस्तकवाचनाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ चैत्यपूजासुधर्मस्था—निवेशौ स क्रमाद्व्यधात् ॥ ३ ॥ विहरंतं महीपीठे । वर्धमानं जिनेश्वरं ॥ अवबुद्ध्यावधिज्ञाना—द्विवंदिषुरभूदसौ ॥ ४ ॥ अथाभियोगिकैर्देवै-र्विचक्रे लक्षयोजनं ॥ विमानं शीघ्रगमनं । जंबूद्वीपमिवापरं ॥ ५ ॥ सामानिकक्रतुभुजां । स चत्वारिंशता शतैः ॥ महिषीणां चतुष्केन । परीवारयुतेन च ॥ ६ ॥ सहस्रैस्त्रिंशता सन्यैः । सेनानीभिश्च सप्तभिः ॥ सहस्रैरंगरक्षाणां । तथा षोडशभिर्वृतः ॥ ७ ॥ अध्यारुह्य विमानं तं । मुक्तमानः सुराग्रणीः ॥ कल्पाच्चचाल सौधर्मा—त्पुरंदर इव श्रिया ॥ ८ ॥ क्रमाद्विमानं संकोच्य । श्वेतभूपालपालितां ॥ पुरीमामलकल्पां च । समागाद्वीरभूषितां ॥ ९ ॥ प्रणम्य त्रिजगन्नाथं । निजं नाम निवेद्य च ॥ ध्यामच्छ्यामितसूर्याभः । सूर्याभ इदमब्रवीत् ॥ १० ॥ सर्वं जिनेश जानासि । त्वं पुनस्त्वदनुज्ञया ॥ समृद्धिं गौतमादीनां । स्वां दिदर्शयिषाम्यहं ॥ ११ ॥ भगवत्यथ तूष्णीके । मौनमेवोचितं प्रभोः ॥ मया पुनर्विधेयैव । भक्तिरेवं स दध्यिवान् ॥ १२ ॥ स वितेने भुजं वामे—तरं तस्माद्विनिर्ययुः ॥ अष्टाधिकं शतं देव—कुमाराः सदृशश्रियः ॥ १३ ॥ भुजाद्वामाच्च तावत्य । एव देवकुमारिकाः ॥ स चक्रे तौर्यिकान् सर्वान्

For Private and Personal Use Only

। जावतस्तावतस्ततः ॥ १४ ॥ ते संभूय तथा चक्रु—र्द्वात्रिंशद्बद्धनाटकं ॥ निजानिमेषता-
लेखै-र्यथा प्राशंसि संसदि ॥१५॥ नाचित्रीयत यश्चित्ते । मूर्धानं यश्च नाधुनात् ॥ यश्च ना-
स्कारयन्नेत्रे । नाभूदस्मिन्न स कोऽप्यभूत् ॥ १६ ॥ नाट्यांगान्यथ संहृत्य । भगवंतं प्रणम्य च
॥ कृतकृत्यतया प्रीतः । सूर्याभः स्वपदं ययौ ॥१७॥ सूर्याभो भगवन् लेभे । कथं संपदमीदृ-
शं ॥ पृष्टः श्रीगौतमेनेति । वीरो धीरोऽभिरालपत् ॥ १८ ॥ प्रदेशी प्रवरः पृथ्व्यां । यो बभौ
वसुभाभुजां ॥ सुकृतैः सांप्रतं प्रष्टः । स बभूव सुधाभुजां ॥ १९ ॥ अयं केशिकुमारस्य । गु-
णिगणभृतो गिरा ॥ पिधाय नरकद्वारं । स्वर्द्वारमुदर्जीघटत् ॥ २० ॥ काले सौधर्मतश्च्युत्वा ।
विदेहेष्ववतीर्य च ॥ नाम्ना दृढप्रतिज्ञोऽयं । भूत्वा मुक्तिं प्रयास्यति ॥ २१ ॥ क सा दुष्कर्मा-
ली नरकगतिविश्राणनपटुः । क तत्पुण्यप्राप्यं त्रिदिवपदवीनिस्तुषसुखं ॥ प्रदेशी यत्यक्त्वा
नरकमगमन्नाकिनगरं । गिरां पारे सोऽयं जयति महिमा कश्चन गुरोः ॥ २२ ॥ इति श्रीप्रदे-
शिराजकथा समाप्ता.

इत्युक्ता गुरुसामग्री. अथ द्वारकमायातां श्रद्धासामग्रीमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥–निसुणिय गुरवयणाणवि । दुलहो देहिण धम्मपरिणामो ॥ जलहरजलसित्ताणं । खित्ताणं पवरवाउव्व ॥ ३१ ॥ व्याख्या सुबोधा ॥ ३१ ॥ एतदेव व्यक्तमाह–

॥ मूलम् ॥––किं कुणइ तास सुगुरो । जेसिं हियये ण वासणावासो ॥ मेहोवि अमेहो ऊ–सरम्मि उप्पाइउं बीयं ॥ ३२ ॥ व्याख्या–सुगुरुः शोभनोऽपि गुरुस्तेषां श्रोतॄणां किं करोति? किं बोधं जनयति ? अपि तु न किंचिदित्यर्थः, येषां हृदये वासनावासः श्रद्धापरिमलो मूलत एव न वर्तते. अथ दृष्टांतमाह–आस्तां कूपारघट्टादयः, स निजाभोगनिरुद्धनभोभागः प्रबलतरगर्जितजर्जरितब्रह्मांडसंपुटः पटुतरविद्युच्चमत्कारद्योतितदिग्वलयो नीरंध्रनीरधाराध्वस्तसमस्तशैलशृंगो मेघोऽप्यूषरे इरिणभूमौ बीजं शाल्यादिकमुत्पादयितुममेघो भवति, बीजोत्पादनरूपस्वभावभ्रंशात्. एवं सद्गुरुरपि श्रद्धारहितानां हृदि बोधिबीजमुत्पादयितुमुद्यतोऽगुरुत्वमेवाश्नुते, बोधकलक्षणस्वभावच्युतेः. ॥ ३२ ॥ अथ सर्वस्यामपि सामग्र्यां भव्यत्वपरीक्षाभावे नैव भवतीत्याह–

॥ मूलम् ॥—लद्धिऊणवि सामग्गीं । भावो भवाण न उ अभवाण ॥ उब्भइ संवपा-

For Private and Personal Use Only

लय—दिठ्ठं नेमिनमणंवि ॥ ३२ ॥ व्याख्या—लब्ध्वापि पूर्वोक्तसामग्रीं मनुष्यजवादिकां जावः पुनः पुण्यपरिणामो जव्या आसन्नसिद्धिगतयस्तेषामेवोल्लसति, न पुनरजव्यानां. अत्रार्थे श्रीनेमिनमने शांबपालकदृष्टांत ' जयत्तीति ' पश्य? तथाहि—नगरी द्वारिकेत्यस्ति । पश्चिमोदधिरोधसि ॥ चतुर्जुजजुजादंम—खंमिताखिलविप्लवा ॥ १ ॥ जगत्क्षेमंकरो नेमिः । पुनानः पृथिवीं पदैः ॥ समं श्रमणसंघेन । तां पुरीं प्रापदन्यदा ॥ २ ॥ चित्तस्थजगवद्भक्ति—सुधोजारानुकारिणीं ॥ गिरं पुरः स्वपुत्राणां । निजगाद गदाग्रजः ॥ ३ ॥ प्रजुं यः कोऽपि पुत्रेषु । प्रातः पूर्वं प्रणंस्यति ॥ अश्वं राज्यस्य सर्वस्व—मिव मत्तः स लप्स्यते ॥ ४ ॥ पालको व्यालकोटिज्यो—ऽधिकक्रौर्यमना अपि ॥ निशायां नंतुमर्हंत—मश्वलोजादधावत ॥ ॥ ५ ॥ मनो विना जिनाधीशं । नत्वा स प्रोचिवानिति ॥ ब्रूया मां प्राक्प्रणंतारं । प्रातस्तातस्य पृष्ठतः ॥ ६ ॥ स्वसद्मन्येव शांबेन । विलंबमसहिष्णुना ॥ पादान्यजन्येत्य सताष्टौ । ववंदे जावतः प्रजुः ॥ ७ ॥ प्रजाते पालकेनाथ । श्रीनाथः प्रार्थितो हयं ॥ त्वं प्राक्केन नतोऽसीति । पप्रछ परमेष्ठिनं ॥ ८ ॥ जगदे जगदिशेन । सम्यग्माध्यस्थ्यशालिना ॥ इव्यतो जावतश्चेति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विधा स्याद्वंदनं हरे ॥ ९ ॥ तत्र मां द्रव्यतोऽनंसी—त्प्राक्पुत्रस्तत्र पालकः ॥ यस्याश्वलाभ-लोभेन । निशि निद्रापि नागता ॥ १० ॥ भावतस्तु ववंदे मां । शांबः प्राक्परमार्हतः॥ ध्यानादध्यक्षतां नीतो । येनाहं दूरवर्त्यपि ॥ ११ ॥ दूरीकृत्य ततो रंक—मिव पालकमर्थिनं ॥ अनिह्नवेऽपि शांबाय । ददावश्वं गदाधरः ॥ १२ ॥ श्रीनेमिनाथे समुपागते य—द्भव्यस्य शांबस्य बभूव भावः ॥ नाभूदभव्यस्य तु पालकस्य । तद्भावमेवानुलभं वदंति ॥ १३ ॥ इति शांबपालकदृष्टांतः—

अथ श्रद्धानंतरं वीर्याचारसामग्रीमाह—

॥ मूलम् ॥—दुलहो सुवसंतगुणो । सद्धालंभेवि वीरियायारो ॥ जमणेण विणा पायं। न चूयवल्लीव सा फलइ ॥ ३४ ॥ व्याख्या—श्रद्धाया गुरुवचनरुचिलक्षणाया लाभेऽपि वीर्याचारस्तदुक्तानुष्ठानंप्रति प्रयत्नो दुर्लभः, कथंभूतः? सुष्ठु वसंतो गुणा ज्ञानादयो यत्र स सुवसद्गुणः, ज्ञानादयो हि गुणा वीर्याचार एव सुष्ठु वसंतीत्यर्थः. यद्वा सुष्ठु शोभना वसंतस्यर्तुराजस्य गुणा वक्ष्यमाणोपपत्तिवशाद्यस्य स तथा. तामेवोपपत्तिमाह—यदनेन वीर्या-

For Private and Personal Use Only

चारेण विना सा श्रद्धा चूतवल्लीव प्रायो न फलति न मोक्षफलदात्री भवति, प्रायोग्रहणं त्वाद्रपदीयचूतवल्लेर्वसंतं विनापि मरुदेवादिनां श्रद्धायाश्च बाह्यप्रयत्नं विनापि फलदर्शनात्. ॥ ३४ ॥ न केवलं श्रद्धा, अन्यदपि सर्वं वीर्याचारेण सिद्ध्यतीत्याह—

॥ मूलम् ॥—कस्सवि एसो कस्सवि । एस्सो अन्नस्स दुन्निवि य लोगा ॥ जे पुण पमायविवसा । दुन्निवि लोगा हया तेसिं ॥ ३५ ॥ व्याख्या—कस्यापि कृषिवाणिज्यादिकर्मसु सततोद्युक्तस्यैष वर्तमानो भवः सिद्ध्यति, इह लोकसिद्धेर्लक्ष्मीमूलत्वात्, लक्ष्म्याश्च विषयमूलत्वात्. यदाहुः—सुव्यवसायिनि कुशले । क्लेशसहिष्णौ समुद्यतारंभे ॥ नरिपृष्टतो विलग्ने । यास्यति दूरं कियल्लक्ष्मीः ॥ १ ॥ कस्यापि पुनरिहलोकनिष्पिपासस्य तपःसंयमादिषु यतमानस्यैष्य आगामी भवः सिद्ध्यति, पुण्योपचयेन स्वर्गापवर्ग प्राप्तेः, अन्यस्य पुनर्व्यवसाये पुण्यकर्मणि च प्रवृत्तस्य द्वावपि लोकौ सिद्ध्यतः, चकारो भेदांतरव्यापकः. एवं वीर्याचारस्य साफल्यमुक्त्वा व्यतिरेकमाह—' जे पुणेत्याद्युत्तरार्धं स्पष्टं. ननु किमनेन प्रयत्नेन नियतिप्रेरिता हि भरतादीनामिव स्वयमेव सिद्धिरुपढौकते इति यो ब्रूते तंप्रत्याह—

॥ मूलम् ॥— जइ तम्भवसिद्धीया । जिणावि चरणंमि उज्जमंति दढं ॥ संदिद्धे नव-
सेवि । ता पमायंति किं इयरे ॥ ३६ ॥ व्याख्या— यदीत्युपदर्शने, तस्मिन्नेव नवे सिद्धियेषां
ते तद्भवसिद्धयो जिनास्तीर्थंकृतोऽपि चरणे सदनुष्ठाने दृढं सर्वबलेनोद्यच्छंत्युपक्रमते, तदेत-
रेऽस्मादृशा नव्यावेऽपि संदिग्धे सति नियतिवादमालंब्य किं प्रमाद्यंति? अयं नावः—इह
स्वस्यावश्यंतया तद्भवे मोक्षं ज्ञात्वा यदि जिनेंद्रा एवमेवासते तदापि ते सिध्यंत्येव, परं
तेऽपि मोक्षस्यायमेवोपाय नान्य इति स्थितिं जानाना यदि चरणमाद्रियंते तदा येषां छद्म-
स्थत्वादद्यापि सम्यग्नव्यत्वमपि दुर्ज्ञानमास्तामासन्नमोक्षता वा दूरमोक्षता वा तेषां कथं
प्रमादं कर्तुं युक्ताः. यदार्षं—तिह्यरो चउनाणी । सुरमहिउं सिज्झियव्वयधुवंमि ॥ अणगूहि-
यबलविरियो । सव्वत्थामेता उज्जमइ ॥ १ ॥ किं पुण अवसेसेहिं । दुक्खक्खयकारणा सुविहि-
एहिं ॥ होइ न उज्जमियव्वं । सपच्चवायंमि माणुस्से ॥ २ ॥ न च नरताद्यालंबनं ग्राह्यं, तेषा-
मपि प्राग्नविकचारित्रनिबंधनत्वात्कादाचित्कत्वाद्धा. यदागमः—पत्तेयबुद्धकरणे । चरणं ना-
संति जिणवरिंदाणं ॥ आहच्च भावकरणे । पंचहिं ठाणेहिं पासछा ॥ १ ॥ किंच—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मूलम् ॥—अपमाए अरिहंतो । पए पए गोयमंपि चोइए ॥ अवराण वरायाणं । ता कीस पमायविस्संजो ॥ ३७ ॥ व्याख्या—यद्यप्रमादेऽप्रमत्तताविषयेऽर्हत्प्रस्तावात् श्रीवर्धमानः पदे पदे पुनः पुनरित्यर्थः, गौतममपि नोदयति प्रवर्तयति, अत्रापि गौतमस्य गणधरत्वज्ञानित्वाप्रमत्तत्वादीन् विशेषान् व्यनक्ति, वर्तमानविभक्तेर्निर्देशस्तत्प्रतिपादकग्रंथानां वर्तमानत्वात्. यत्स्थानांगसूत्रं—समणे जगवं महावीरे गोयमाइसमणे निग्गंथे आमंतित्ता एवं वयासी, किं जया णं पाणा समणाउसो, गोयमाइ समणं जगवं महावीरं उवसंकमंतिरत्ता एवं वयासी, नो खबु वयं देवाणुप्पिया एयमट्ठं जाणामो वा पासामो वा, तं जइ णं देवाणुप्पिया एयमठं नो गिलायंति परिकहित्तए तं इच्छामो णं देवाणुप्पियाणं अंतिए एयमठं जाणित्त ए अज्जोति. समणे जगवे महावीरे गोयमाइसमणे निग्गंथे आमंतित्ता एवं वयासी, दुक्खजया पाणासमणाउसो, से णं जंते डुक्खे केण कडे जीवेणं? कडे पमाएण, से णं जंते डुक्खे कहं च इज्जइ? अपिमाएणत्ति. उत्तराध्ययनेष्वप्युक्तं—लध्धूणवि माणुसत्तणं । आरियत्तं पुणरावि दुल्लहं ॥ बहवे दसुआ मिल्लखुआ । समयं गोयम मा पमायए ॥ १ ॥ ल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्धूणवि आरियत्तणं । अहीणपंचिंदियया हु दुल्लहा ॥ विगलिंदिया हु दीसइ । समयं गोयम मा पमायए ॥ २ ॥ अहीणपंचिंदियत्तंपि से । लन्भे उत्तमधम्मसुई हु दुल्लहा ॥ कुतित्थिनिसेवए जणे । समयं गोयम मा पमायए ॥ ३ ॥ लध्धूणवि उत्तमं सुइं । सद्दहणा पुणरावि दुल्लहा ॥ मिच्छत्तनिसेवए जणे । समयं गोयम मा पमायए ॥ ४ ॥ धम्मंपि हु सद्दहंतया । दुलहया कायेण फासया ॥ इह कामगुणेहिं मुच्छिया । समयं गोयम मा पमायए ॥ ॥ ५ ॥ परिजूरइ ते सरीरयं । केसा पंडुरया हवंति ते ॥ से सव्वबले य हायइ । समयं गोयम मा पमायए ॥ ६ ॥ तिण्णोसि हु अण्णवं महं । किं पुण चिट्ठसि तीरमागओ ॥ अभितुर पारंगमित्तए । समयं गोयम मा पमायए ॥ ७ ॥ यदि भगवानेवं श्रीगौतमस्याप्युपदिशति स्म तदाऽपरेषां वराकाणां धृतिसाहसादिहीनानां किमयं प्रमादस्य विश्रंभो विश्वासः? प्रमादो हि बलात् श्रुतकेवलिनोऽपि भवावर्ते पातयति, ततो भिन्नमित्र इव सर्वथा न विश्वसितव्यमिति. दृष्ट्वाप्यालोकं नैव विश्रंभितव्यं । तीरं नीतापि भ्राम्यते वारिणा नौः ॥ लब्ध्वा वैराग्यं भ्रष्टयोगः प्रमादाद् भूयोभूयः संसृतौ बंभ्रमीति ॥ १ ॥ ननु किमेवमप्रमादे

For Private and Personal Use Only

नृशमुपदिश्यते? यावता स्वहितकामो जंतुः स्वयमेव तत्र प्रवर्त्स्यतीत्याह—

॥ मूलम् ॥—इहलोयपरलोयदुहेसु । आरंभेसु सयं समुज्जमइ ॥ सुहहेउम्मि उ धम्मे । वुत्तोवि जिउ न मूढमई ॥ ३८ ॥ व्याख्या—स्पष्टा, नवरमुक्तोऽपि पौनःपुन्येन शिक्षितोऽप्यथ कदाचिच्छ्रमताहेतुभिः सम्यक्सत्कृत्येषु न यतेत तथापि परिणामतोऽप्रमत्त एव भूयात्. तथाहि—महारंभवतोऽप्यल्पपापानुसंगादित्येतदेवाह —

॥ मूलम् ॥—मा मे इक्कोवि खणो । निद्दाविकहाविणोयमाईहिं ॥ जाउ मुहा इय बुद्धी । न जस्स भणु तस्स कह सिद्धी ॥ ३९ ॥ व्याख्या—मा इति निषेधे, ममैकोऽपि क्षणः कालांशो निद्राविकथाविनोदादिभिर्मुधा धर्मक्रियारहितत्वेन निष्फलोऽयासीत्, तत्र निद्रा प्रमीला, विकथा राजकथाद्या, विनोदा गीतनाट्यानि, युद्धादयश्चित्ताक्षेपहेतवः, आदिशब्दाद्विषयकषायादयः, एतैराक्षिप्तस्य ममैकोऽपि क्षणो मास्म निष्फलोऽभूदित्येवंरूपा बुद्धिश्चिंता यस्य प्रतिक्षणं नोल्लसति, नन्विक्षाक्षेपे, तस्य सर्वथा प्रमादविवशस्य कथं केन प्रकारेण सिद्धिर्भवति? न भवतीत्यर्थः. अप्रमत्ताध्यवसायनिबंधनत्वात्तस्याः. अथ यः सामग्रीं

प्राप्य प्रमाद्यति तस्य दृष्टांतगर्भं निंद्यत्वमाह—

॥ मूलम् ॥—सो नरियसरम्मि ठिउ । तिसिउ बुहिउ व फलियखित्तंमि ॥ जो देइ लहियधम्मा—वसरं पसरं पमायस्स ॥ ४० ॥ व्याख्या—गाथार्थः सुगमः, नावार्थस्त्वयं—यः सरससलिलपूर्णमपि सरः प्राप्य तृषितः, फलितमपि क्षेत्रं प्राप्य क्षुधितश्च तिष्टति स लोके मूर्ख इत्युच्यते, सति संयोगे स्वार्थासाधनात्. तथा पूर्वोक्तयुक्त्या दुर्लजं धर्मावसरं लब्ध्वापि यः प्रमाद्यति सोऽपि मूर्ख एव. मूर्खत्वं दृष्टांतेनाह—

॥ मूलम् ॥—ही बालिसेण सुकया—लसेण बहुविसयलालसेण तहा ॥ पत्ताविं धम्म वेला—वहीलिया बंजदत्तेण ॥ ४१ ॥ व्याख्या—ही इति शोच्यतासूचकमव्ययं, ब्रह्मदत्तेन चक्रिणा तदा पूर्वजवज्रातृसंगमे प्राप्तापि धर्मवेलाऽवहीलितावगणिता हारितेत्यर्थः, प्राप्ताया धर्मवेलाया अवहीलनं बालिशत्वात्. बालिशत्वं च सुकृतालसत्वात्तदपि बहुविषयलालसत्वादत एव शोच्योऽसौ सतामिति, एतद्भावार्थः कथानकादवसेयस्तच्चेदं—

राज्ञश्चंद्रावतंसस्य । साकेतपुरेशितुः ॥ मुनिचंद्रोऽजवत्सूनु—रनूनगुणवैजवः ॥ १ ॥ पु-

रीमुज्जयिनीं पित्रा । दत्तां भुक्त्वातियौवनः ॥ भ्रातुः सागरचंद्रर्षे—र्हर्षेणादत्त स व्रतं ॥
॥ २ ॥ विचरन्नन्यदा सार्थ—भ्रष्टः प्राप्तोऽटवीमसौ ॥ स्वभावजडकैर्दृष्ट—श्चतुर्भिर्गोपदारकैः
॥ ३ ॥ स क्षुत्तृषाध्वसंचार—श्रांतस्तैः पर्यचर्यत ॥ ततो गंतुमिवानृण्यं । तेभ्यो धर्मं जगाद
सः ॥ ४ ॥ प्रबुद्धास्तेऽथ चत्वार—स्तस्मादाददिरे व्रतं ॥ गोपायंतिस्म गोपांगाः । पूर्वं सर्वां-
गिनस्तदा ॥ ५ ॥ ते चत्वारोऽपि संभूय । भूयिष्टं तेनिरे तपः ॥ इव प्राक्पीतपीयूषैः । संजा-
तोत्तरपारणाः ॥६॥ अतिमात्रमलक्लिन्न—गात्रान् वीक्ष्य मुनीश्वरान् ॥ द्वौ तेष्वनिंदतां धर्मं ।
न स्युः सर्वे समाश्रयाः ॥ ७ ॥ सुसेवितेन तपसा । तावपि प्रापितौ दिवं ॥ स्वामिनेव
पदं भृत्यौ । मधुनेव श्रियं द्रुमौ ॥ ८ ॥ ततश्च्युत्वैककालं तौ । जातौ शांडिल्यविप्रतः ॥
दास्यां जयवतीनाम्न्यां । पुत्रौ दशपुरे पुरे ॥ ९ ॥ दासेरौ तौ क्रमात्पित्रा । नियुक्तौ क्षेत्रर-
क्षणे ॥ तत्रैव शयितौ रात्रौ । दष्टौ दुष्टाहिना मृतौ ॥ १० ॥ उत्पन्नौ युग्मरूपौ तौ । मृगौ
कालिंजरे नगे ॥ चरंतौ तत्र जघ्नाते । व्याधेनैकेन पत्रिणा ॥ ११ ॥ तीरेऽथ मृतगंगायाः ।
संप्राप्तौ हंसयुग्मतां ॥ ग्रीवामोटेन निर्जीव—कृतौ वैतंसिकेन तौ ॥ १२ ॥ चित्रसंभूतनामा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नौ । ततस्तौ कासिपत्तने ॥ अभूतां भूतदत्तस्य । मातंगाधिपतेः सुतौ ॥ १३ ॥ सापराधोऽन्यदा मंत्री । नमुचिः शंखभूभुजा ॥ अघाति भूतदत्तेन । व्यापारो हि त्रिषद्रुमः ॥ १४ ॥ भूमिगृहे स्थितः पुत्रौ । यदि शिक्षयसे कलाः ॥ तत्त्वां मुंचामि जीवंतं । मातंगेनेत्यवादि सः ॥ १५ ॥ कदाचिदेतत्क्षीयेत । दौःस्थ्यं कालक्रमेण मे ॥ ध्यात्वेति मंत्रिणा मृत्यु—भीरुणामानि तद्वचः ॥ १६ ॥ नीचस्थो निर्बलः किंतु । स कल्पस्तत्र मंत्र्यसौ ॥ ज्योत्स्नामिवेंदुरुद्योतं । तेने विद्याप्रभाजरैः ॥ १७ ॥ दुश्चरित्रोऽन्यदा मंत्री । रेमे मातंगजायया ॥ स्थापितोऽप्युदरे याति । विक्रियां कश्मलः खलः ॥ १८ ॥ ज्ञाततच्चेष्टितो भूत—दत्तस्तं हंतुमैहत ॥ ते निर्मंतुमपि घ्नंति । जंतुं किंत्वपराधिनं ॥ १९ ॥ निरसारयतां चित्र—संभूतौ तं कलागुरुं ॥ श्वपाकपाकौ सत्कर्म—विपाकाविव मंत्रिणः ॥ २० ॥ निर्गीतंस इव न्यंकुः । पाशमुक्त इवांडजः ॥ व्यावृत्तजीवितव्याशः । स ययौ हस्तिनापुरं ॥ २१ ॥ सेवां सनत्कुमारस्य । तन्वंस्तत्र स चक्रिणः ॥ व्यापारमचिरात्प्राप । तेषां ह्येवैव जीविका ॥ २२ ॥ व्यापारेऽधिगते मंक्षु । पापपंकप्रवर्धने ॥ वर्षाकाल इव श्वानः । पुनः सोऽभून्मदोध्धुरः ॥ २३ ॥ तूर्यत्रयकलाभ्यासं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। दर्शयंतौ सुशिक्षितं ॥ चित्रं तौ चित्रसंभूतौ । कस्य कस्य न चक्रतुः ॥ २४ ॥ इव बद्ध इ-
वाकृष्ट । इवाहूत इवाहृतः ॥ काशीवासी जनः सर्व—स्तावेवोपाचरच्चिरं ॥ २५ ॥ अन्यदा
चर्चरीपर्व—ण्यागते तत्र पत्तने ॥ चर्चरीर्नागरा मध्ये । मातंगाश्च बहिर्व्यधुः ॥ २६ ॥ नाग-
रीश्चर्चरीस्त्यक्त्वा । पौराः कार्मणिता इव ॥ मातंगचर्चरीमीयु—स्तयोर्गीतेषु लोलुपाः ॥ २७ ॥
तद् ज्ञात्वा शंखभूपाल—स्तलारक्षकमादिशत् ॥ पौरान् मलिनयंतौ तौ । वार्येतां श्वपचाविति
॥ २८ ॥ सर्वत्र घोषयस्वेति । यः कोऽप्येतावुपेष्यति ॥ तमंत्यजमिव क्ष्मापः । पुर्यां निर्वास-
यिष्यति ॥ २९ ॥ तथा तेन कृते राज—विरोधात्सा तयोः कला ॥ निरुद्धा निशि भृंगीव ।
तस्थौ हृदयपंकजे ॥ ३० ॥ कदापि कौमुदीपर्व । द्रष्टुं क्लृप्तावगुंठनौ ॥ साशंकौ चौरवन्मध्ये
—नगरं तावविक्षतां ॥ ३१ ॥ तत्रत्यं गीतमाकर्ण्य । तौ मौनं कर्तुमक्षमौ ॥ मंदस्वरेण कं-
ठांत—र्लुठन्नादावगायतां ॥ ३२ ॥ ज्ञातौ गीतानुमानेन । तावन्त्यवर्णचरैर्नरैः ॥ हतौ लोष्टा-
दिभिः श्वास—पूरितास्यौ निरीयतुः ॥ ३३ ॥ नागरैर्निहतौ ताव—द्यावत्तौ प्रापतुर्वनं ॥ कथं-
चित्तत्र मुक्तौ च । जंतू आरण्यका इव ॥ ३४ ॥ तौ दध्यतुर्वृथा जन्मा—वयोर्येनेदृशी कला ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० न सद्भ्यो विषसंपृक्त—क्षीरधारेव रोचते ॥ ३५ ॥ कुलावतां परा भूतिः । स्याद्गुर्वाज्ञाचरणा-
दिभिः ॥ पराभूतिस्तु नौ लेभे—यच्छ्वाद्यैर्नीचजन्मनोः ॥ ३६ ॥ तदिमं मलिनं जन्म । हि-
चिंता० त्वा स्वीकुर्वहे नवं ॥ ध्यात्वेति प्रचलंतौ तौ । महाशैलमपश्यतां ॥ ३७ ॥ तमध्यारोहतामेतौ
३३७ । मृत्यवे कृतनिश्चयौ ॥ तन्मूर्ध्नि विलुलोकाते । साधुं शृंगमिवापरं ॥ ३८ ॥ नतवंतौ मुनिं
तेन । पृष्टौ स्ववृत्तमादितः ॥ तावश्रुधारासिक्तार्त्ति—तप्तदेहाववोचतां ॥ ३९ ॥ अथ तौ मु-
निराचख्यौ । वत्सौ मूढाशयौ युवां ॥ अंगभंगेऽपि किं शुध्ये—दात्मायं कर्मकश्मलः ॥
॥ ४० ॥ हंसो यैर्वायसीचक्रे । छिंथः कर्माणि तानि चेत् ॥ तज्जातु न भजत्येष । पंकिलं दे-
हपल्वलं ॥ ४१ ॥ कर्मणामपराधे हि । देहं किं नो कदर्थ्यते ॥ विकारे पैत्तिके किं वा ।
वातं वैद्यश्चिकित्सति ॥ ४२ ॥ लभ्यंते न मृतैः स्वर्ग—पूलिका हंसतूलिकाः ॥ सर्वत्र पुण्यही-
नानां । दरिद्राणामिवापदः ॥ ४३ ॥ तद्धर्ममेव सेवेथां । यदि स्थः सुखलालसौ ॥ विना ज-
लाशयं क्वापि । किमु स्यात्कमलोदयः ॥ ४४ ॥ इति तद्वचसा बुद्धौ । श्लथीकृतदुराशयौ ॥
उद्यतौ कर्मघाताय । सद्यस्तौ भेजतुर्व्रतं ॥ ४५ ॥ विज्ञातश्रमणाचारौ । चरंतौ वसुधातले ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तपोभिः प्राप्तलब्धी तौ । जग्मतुर्हस्तिनापुरं ॥४६॥ तत्र जोगवने योगं । साधयामासतुर्मुनी
॥ साक्षान्नारीनरानेक—स्खलितास्खलिताशयौ ॥ ४७ ॥ कुर्वाणो ग्रीष्मतपना—तपवद्दुस्सहं
तपः ॥ संजूतः प्राविशन्मध्ये—पुरं पारणकेऽन्यदा ॥ ४८ ॥ चरन्नमुचिना तेन । स दृष्टोऽप्यु-
पलक्षितः ॥ प्रायेण क्रूरदृश्वानो । गृध्रा इव नियोगिनः ॥ ४९ ॥ मावादीदत्र मद्वृत्त—मेष
मातंगदारकः ॥ इति तं योगिनं योधै—र्नियोगी निरवासत् ॥ ५० ॥ निर्गतोऽपि पुरात्ताड्य-
मानस्तैरकुपन्मुनिः ॥ कालकूटोऽतिमथिता—दञ्जूद्दुग्धोदधेरपि ॥ ५१ ॥ दिधक्षुर्नगरं ध्याता
—ननस्तैजसलेश्यया ॥ सज्वालाधूमलहरीः । सोऽमुंचत्प्रलयाग्निवत् ॥ ५२ ॥ सार्वजौमः
स्फुरद्धूम—ध्यामलीकृतलोचनः ॥ मत्वा मुनेर्महाकोपं । जृत्येज्यो निर्ययौ पुरात् ॥ ५३ ॥
गलितानंदमाक्रंद—परपौरपरिच्छदः ॥ उपेत्य मुनिमानम्य । चक्रच्चै योजितांजलिः ॥ ५४ ॥
यते यस्त्वयि कोपोऽसौ । तत्पानीये प्रदीपनं ॥ सा स्थास्यति क्षमा कुत्र । यदि त्वमपि कुप्य-
सि ॥ ५५ ॥ धक्ष्यामहेऽग्निनानेन । वयमेव न केवलं ॥ तवापि धक्ष्यते ध्यानो—पञ्चं पुण्यं प्र-
सीद तत् ॥ ५६ ॥ तावच्चित्रोऽपि तत्रागा—त्तेनापि प्रतिबोधितः ॥ पौरैरप्यनुनीतश्च । संजूतः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शमभूरभूत् ॥ ५७ ॥ चक्रिण्यथ गते साधू । तदैवोद्यानमागतौ ॥ अशनाद्यसनाधारा-द्दूर-
कृत्यानशनं श्रितौ ॥ ५८ ॥ अद्य जैने मयि क्ष्मापे । केनासौ कोपितो मुनिः ॥ इति पृष्ठ नृ-
पोऽज्ञासी—न्नमुचेः कर्म तच्चरैः ॥ ५९ ॥ बध्ध्वाथ मंत्रिणं भूपो । नीत्वा साध्वोः पुरोऽवदत्
॥ ब्रूतं किमस्य कुर्वेऽहं । युष्मदाशातनाकृतः ॥ ६० ॥ गृहीतगृहसर्वस्वो – ऽवध्यकोटिमुपाग-
तः ॥ नमुचिर्मुमुचे जीवन् । राज्ञा साधूपरोधतः ॥ ६१ ॥ दुष्कर्मणा कृतघ्नानां । निरागस्तु
विरोधिनां ॥ आत्मैव तस्य वैरी स्यात् । षष्ठस्थ इव लग्नपे ॥६२॥ सहापरपुरंध्रीभिः । स्त्रीरत्नं
चक्रवर्तिनः ॥ सुनंदा नंतुमागच्छ—त्तावात्तानशनौ मुनी ॥ ६३ ॥ सानंदं वंदमानायाः । सु-
नंदायाः सुकोमलां ॥ संभूतो यमुनावेणी—श्यामां वेणीमवैक्षत ॥ ६४ ॥ वेणीदंडमिषात्का-
मे—नासिना स्वेन ताडितः ॥ महौजा अपि चुक्षोभ । मुनिः कस्तंप्रति प्रभुः ॥६५॥ तस्या-
मथ निजं स्थानं । गतायां स व्यचिंतयत् ॥ अहो दृशोः सुधासत्रं । रूपमस्या मनोहरं ॥ ६६ ॥
नराः संतीह केऽपीह—ग्वनिताभोगभाजनं ॥ अस्मादृशास्तु ही सृष्टा । विधिना गर्भदुर्भ-
गाः ॥ ६७ ॥ एवंविधवधूभोगा—नाप्यासं हि भवांतरे ॥ यद्यस्ति तपसोऽमुष्य । फलं क-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० ल्पतरोरिव ॥ ६८ ॥ एवं निदानं कुर्वाणं । सिषेच वचनामृतैः ॥ चित्रः कामाग्निना दीप्तं ।
तं जीमूत इव द्रुमं ॥ ६९ ॥ बंधो कल्पद्रुमाराध्य । कंभूतोऽयं किमीहसे ॥ किं चिंतामणि-
ता० मासाद्य । याचसे काचमंकनं ॥ ७० ॥ मृगतृष्णांभसैवैणः । कूटस्वेनेव बालकः ॥ द्वीपश्चर्म-
२४० द्वीपेनेव । त्वं स्त्रिया वंच्यसे किमु ॥ ७१ ॥ ग्रासां मलमयं देहं । कस्तदर्थं तपःक्षयः ॥ तप-
स्ते दातुमीष्टेतां । सिद्धिश्रियमपि क्षणात् ॥ ७२ ॥ एवमुक्तोऽपि चित्रेण । न निदानं मुमो-
च सः ॥ क्षुधितो बालिशः ग्रासं । किंपाकस्य फलं यथा ॥ ७३ ॥ प्रपाल्यानशनं काले । ह्री-
नवंशोऽप्यसेवत ॥ स्वः सौधर्ममसौ धर्म—प्रभावाद्बंधुना युतः ॥ ७४ ॥ चित्रजीवस्ततश्च्यु-
त्वा—ल्पकर्मासन्नसिद्धिकः ॥ पुरे पुरिमतालाख्ये । महेभ्यस्यांगभूरभूत् ॥ ७५ ॥ इतश्चास्त्य-
धिपंचालं । कांपिल्यपुरपत्तनं ॥ यच्चारुताजितः स्वर्गो । ह्रियैवादृश्यतां गतः ॥ ७६ ॥ तत्रा-
भूद्ब्रह्मभूपालो । जयश्रीकेलिपल्वलं ॥ यत्पाणिकमले खड्ग—भृंगः खेलत्यहर्निशं ॥ ७७ ॥ ब-
लिनी सरसेनेव । चुलनी तस्य वल्लभा ॥ संभूतजीवस्तत्कुक्षिं । भेजे देवभवाच्च्युतः ॥ ७८ ॥
चतुर्दशमहास्वप्न—सूचितं सुषुवे सुतं ॥ चुलनी नलिनी पद्म—मिव पद्मानिकेतनं ॥ ७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मदत्ताख्यया ख्यातः । प्ररोह इव भूरुहः ॥ सोऽवर्धत क्रमाद्बालः । समं पितृमनोरथैः ॥ ॥७०॥ कणेरुदत्तः कुर्वीशः । पुष्पचूलोंगदेशराट् ॥ कटकः काशिभूपालो । दीर्घः कौशलिको नृपः ॥ ७१ ॥ चत्वारः सुहृदोऽभूव—न्नमी ब्रह्ममहीपतेः ॥ वक्षस्काराद्रिनिर्मेरु—रिवासौ तैरराजत ॥ ७२ ॥ एकत्रैव पुरे वर्ष—वारकेण निवासिनः ॥ कांपिल्यपत्तने तस्थु—स्ते पंचापि कदाचन ॥ ७३ ॥ ब्रह्मताल इवोत्ताल—स्कंधोऽकस्माद्व्यपद्यत ॥ शिरोवेदनया ब्रह्म—दत्ते द्वादशवार्षिके ॥ ७४ ॥ कृतनिर्हृतिनिर्माण—ब्रह्माभ्यासं विना कृताः ॥ सुहृदस्ते दधुर्दुःखं । युक्तं सुचिरयोगिनः ॥ ७५ ॥ मित्रैश्चतुर्भिरप्येभि—र्ब्रह्महीनैर्बभौतेरिव ॥ न हि किंचनसामर्थ्य—मित्यशोचन् प्रजा अपि ॥७६॥ कृतायामौर्ध्वदेहिक्यां । क्रियायां ब्रह्मभूभुजः ॥ ब्रह्मदत्तं निवेश्यांके । सुहृदस्तेऽवदन्मिथः ॥७७॥ बालः पाल्योऽयमस्माभिः । स्थितैर्वर्षक्रमादिह ॥ एवं च ब्रह्मभूपस्य । मैत्री स्यात्परिरक्षिता ॥ ७८ ॥ ततो दीर्घबलं दीर्घं । बालपालनलालसं ॥ तत्र मुक्त्वा ययुः स्वं स्वं । नगरं सुहृदस्त्रयः ॥ ७९ ॥ अवाप्य प्रभुतां तत्र । दीर्घो गुप्तानपि क्रमात् ॥ शुल्कीव वस्तुजातानि । ब्रह्मकोशानव्यजालयत् ॥ ८० ॥ कोशेष्वासरसो भेजे । कुल-

For Private and Personal Use Only

नीं नलिनीमिव ॥ मलिनश्चपलो दीर्घ–भ्रमरो मित्रवल्लभां ॥ ९१ ॥ ज्ञात्वा तच्चापलं धीमान्।
मंत्री धनुराचिंतयत् ॥ कोशसारेषु दारेषु । लुब्धस्तावदयं प्रभोः ॥ ९२ ॥ दूर्वास्तंबः खरस्येव
। क्षेत्रं मत्तकिरेरिव ॥ पशोरिव तरुर्दंति—पोतो मृगपतेरिव ॥ ९३ ॥ युवती कामुकस्येव ।
राहोरिव सुधाकरः ॥ कटकाद्यैः किमस्यायं । बालो रक्षितुमर्पितः ॥ ९४ ॥ युग्मं ॥ चुलनी
चालनीवासौ । विषयेषु तुषेष्विव ॥ पुण्यसारपरित्यागा—ल्लुब्धा चेल्लुभ्यतां ततः ॥ ९५ ॥
यत्पुनः सुहृदाजन्म । दीर्घोऽसौ दीर्घदर्श्यपि ॥ द्विधाभूद्ब्रह्मणो वैरी । तन्मनोऽतिदुनोति मे
॥ ९६ ॥ कदापि लब्धप्रसरः । कुमारं यौवनोन्मुखं ॥ हंत्येष निर्विशेषस्त–ज्जीवंतोऽपि वयं
हताः ॥ ९७ ॥ ध्यात्वेति ब्रह्मदत्तस्य । रक्षार्थं स विचक्षणः ॥ पुत्रं वरधनुःसंज्ञं । सेवाव्या-
जाद्ययोजयत् ॥ ९८ ॥ तेनोक्ते दीर्घवृत्तांते । कुमारोऽदर्शयत्क्रुधं ॥ जीमूतो विद्युदुद्योत—
मिवासावंतरांतरा ॥ ९९ ॥ संयोज्य कोकिलां काके–नाख्यत्सोंतःपुरेऽन्यदा ॥ यः कोऽप्येता-
विवान्यायं । कर्ता घात्यः स मे ध्रुवं ॥ १०० ॥ तत् श्रुत्वा दीर्घभूपालः । कालदष्ट इवाकुलः
॥ चुलिन्यालपितो वीर । क्षीरकंठाद्बिभेषि किं ॥ १ ॥ रमयित्वैकदा नाग—हस्तिनीं मृगह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तिना ॥ कुमारः पूर्ववज्जाल्पन् । राज्ये दीर्घेण दर्शितः ॥ २ ॥ हंस्या सह बकं बध्वा । कु-
मारोऽत्रोचदन्यदा ॥ लोका विलोकतामेतौ । हन्येते दुर्नयौ मया ॥ ३ ॥ ऊचेऽथ चुलनीं
दीर्घो । मर्मविद्ध इवार्त्तिभूः ॥ भद्रे विमृश हृद्दृष्ट्या । नास्त्यत्र कुशलं मम ॥ ४ ॥ हंत वि-
श्वसिमोऽमुष्य । कथं सिंहशिशोरिव ॥ अरुंतुदमिदं यस्य । वचोऽपि क्रकचोपमं ॥ ५ ॥ मां
स्थापयितुकामासि । चेत्तदेनं विनाशय ॥ ऊनता पुत्ररत्नानां । का समुद्रे मयि प्रिये ॥ ६ ॥
पुत्रः प्राणोपमः स्त्रीणां । प्राणेभ्योऽप्यधिकः प्रियः ॥ इति सा तद्वचोऽमंस्त । धिग्योषिज्जन-
साहसं ॥ ७ ॥ स्वान् पुत्रानपि हंति याति मलिना वक्त्रा गतेऽप्यागते । प्राणिप्राणितवैरि-
भिः प्रकुरुते क्रीडां भुजंगैः सह ॥ नृणां चित्तबिलं गता वृषकुलं मृष्णाति तृष्णातुरा । सा
योषिद्भुजगी तदेव कुतुकं यद्विश्वविश्वासभूः ॥ ८ ॥ प्रोचे सा कामचंडाल — साचिव्यविग-
लत्कृपा ॥ व्यापाद्य एव मे पुत्रो । नाथ रक्ष्यं च दुर्यशः ॥ ९ ॥ अयं विवाहव्याजेन । हंतुं
शक्यो न चान्यथा ॥ रिपुवत्प्रकटं पुत्र — पातो दुष्कीर्त्तिदोहदः ॥ १० ॥ नवोढः प्रथमं सैष
। शायितो जतुसद्मनि ॥ प्रच्छन्नानलदानेन । भस्मसात्क्रियते निशि ॥ ११ ॥ चुलनी तल्लिनी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूत—विवेकेत्यात्तनिश्चया ॥ पुष्पचूलं नृपं स्वीयं । बंधुं कन्यामयाचत ॥ १२ ॥ एकतो जा-
तुषं वास—वेश्म साकारयन्नवं ॥ वासवेश्मानुमानेन । तत्कूटं विविदे धनुः ॥ १३ ॥ सोऽथ
व्यजिज्ञपद्दीर्घं । पुत्रो मे त्वां निषेवतां ॥ वृद्धोऽहं साधयिष्यामि । तीर्थाणि त्वदनुज्ञया ॥
॥ १४ ॥ कूटोपायमयं धीमान् । कर्ता किंचिद्वहिर्गतः ॥ यथा तथा वा स्थाप्यस्त—द्धिमृश्ये-
त्यवदन्नृपः ॥ १५ ॥ वयं प्राघूर्णका एव । राज्यजारक्रमो जनान् ॥ राज्यं न त्वां विना जा-
ति । निर्लोचनमिवाननं ॥ १६ ॥ तीर्थाणि संति किं दूरे । तीर्थं ह्यात्मैव निर्मलः ॥ गंगातीरे
स्थितोऽत्रैव । तत्त्वं तत्त्वोचितं कुरु ॥ १७ ॥ इत्युक्तो भूभुजा मंत्री । गंगातीरमुपेत्य सः ॥ द-
दानो दानमर्थिभ्यः । सत्रागारमवाहयत् ॥ १८ ॥ द्विगव्यूतां सुरंगां च । सत्रागारादकारयत्
॥ सोऽविसंवादिभिः पुंभि—राजातूपनिकेतनं ॥ १९ ॥ तेनैव दीर्घदुर्मंत्रं । पुष्पचूलोऽपि बो-
धितः ॥ प्रैषीत्पुरुपरीवारां । दासेरीं दुहितुः पदे ॥ २० ॥ कांपिल्यमागता सापि । राजपुत्री-
ति पप्रथे ॥ स्वर्णपित्तलयोर्भेदं । वेत्त्यसंकेतितो न हि ॥ २१ ॥ सिद्धिर्मदीप्सितस्यासी—
दासन्नेत्युज्ज्वलाननां ॥ चुलनीं सुतवीवाह—तुष्टां मेने महाजनः ॥ २२ ॥ चुलन्या सोऽच-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० लन्यायः । कुमारः पर्यणाय्यते ॥ दासेयीं दर्शितप्रीत्या—क्षणे संपूर्णलक्षणे ॥ २३ ॥ प्रजि-
ध्ये नव्यभवने । नवोढस्तनयस्तया ॥ दुष्कर्मपरिणत्येव । जंतुर्यमनिकेतनं ॥ २४ ॥ भाग्येने-
चिंता० वांगिनां मंत्रि—पुत्रेणात्यक्तसन्निधिः ॥ जजागार निजागार—मध्ये वार्तारसेन सः ॥ २५ ॥
३४५ अजिह्मब्रह्मभूर्यावद् । ब्रह्मदत्तः स्वपित्यथ ॥ तावज्ज्वालाकुलं वास—वेश्मावैक्षत सर्वतः ॥
॥ २६ ॥ किमेतदिति तेनोक्तो । मातुर्वृत्तं सुहृज्जगौ ॥ संक्षिप्यांत्यदिने सर्वं । सुवक्तेव कथा-
नकं ॥ २७ ॥ आसन्नागारमत्रास्ति । सुरंगा तातकारिता ॥ त्वत्पदप्रह्वक्षोणी—मिमामित्यप्य-
बोधयत् ॥ २८ ॥ भूवः पुटं पटं जीर्ण—मिव भित्वा सुहृद्यतः ॥ सुरंगां सोऽविशन्मुक्त्वा ।
। दासेयीं दुर्दशामिव ॥ २९ ॥ सुरंगा सा सुरंगासी—न्मातुरप्यधिका तयोः ॥ स्वगर्भमपि
निघ्नत्या । गर्भे निक्षिप्य तायिनी ॥ ३० ॥ द्वौ नरौ भूर्दधौ कुक्षौ । मृतेऽपि ब्रह्मणि प्रिये ॥
भविता च प्रियैकस्य । स्त्रीवृत्तं वेत्ति कोऽथवा ॥ ३१ ॥ द्वे प्रिये ब्रह्मणोऽभूतां । चुलन्येकापरा
च भूः ॥ हंति स्वपुत्रमप्याद्या । सपत्न्यप्यपरावति ॥ ३२ ॥ सहास्यमिति जल्पंतौ । तौ निर्गत्य
सुरंगया ॥ जागरूकं पुरोऽमात्यं । योगींद्रमिव नेमतुः ॥ ३३ ॥ पूर्वं सज्जीकृतौ तेन । स्वरावं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तौ तरस्विनौ ॥ विमानाविव मर्त्यानां । तावेवारोहतां हयौ ॥ ३४ ॥ अस्पृशंताविव क्षोणीं । दीर्घदुर्नाथदूषितां ॥ पंचाशद्योजनीं गत्वा । हयौ पंचत्वमागतौ ॥ ३५ ॥

वाहयंतौ पदौ वाह—युगादप्यधिकं ततः ॥ आसन्नं कोष्टकग्रामं । कुब्राचौ जग्मतु-र्मृदु ॥ ३६ ॥ मूर्धजानपि नारायाा । मन्वानौ मुक्तमंक्षनौ ॥ तत्राचीकरतां चूला—शेषौ तौ शीर्षमुंडनं ॥ ३७ ॥ पिदधे वसुधेशश्री—पिशुनं पटबंधतः ॥ श्रीवत्सं सुहृदो मंत्री—पुत्रः सूर्यमिवांबुदः ॥ ३८ ॥ यज्ञोपवीतिनावात्त—दंडौ काषायचीवरौ ॥ ब्रह्मपुत्रब्रह्मदासा—विति क्लृप्तनिजाभिधौ ॥ ३९ ॥ अनुष्ठितयुती दौःस्थ्य—मापन्नावपि तावुभौ ॥ ईक्षांचकार तं ग्रामं । विशंतौ कश्चन द्विजः ॥ ४० ॥ युग्मं ॥ अजोजयदसौ भक्त्या । तावानीय स्वमंदिरं ॥ ब्रह्मपुत्राय दत्वा च । वस्त्रे कन्यामढौकयत् ॥ ४१ ॥ कन्येयं किमनिष्टा ते । यद्वोढेनेव सन्मणी ॥ योज्यते त्रिकुणानेन । मंत्रीति निजगाद तं ॥ ४२ ॥ सोऽप्युवाच पुराचष्ट । कश्चिन्नैमित्तिको मम ॥ ग्रामेऽत्र पटकच्छन्न—श्रीवत्सो भिक्षुरेति यः ॥ ४३ ॥ दद्याः स्वनंदिनीं तस्मै । स हि चक्री भविष्यति ॥ तदस्मै वितराम्येनां । मेनां हिमवते यथा ॥ ४४ ॥ पर्यणैषीत्कु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मारोऽथ । कन्यां बंधुमतीति तां ॥ उत्तिष्ठते पुरो जोगा । जोगिनां नश्यतामपि ॥ ४५ ॥
रोहिण्येव विधुः साकं । तया वासकमेककं ॥ विधाय स प्रगेऽचाली —न्निर्वृत्तिर्न हि सद्धियां
॥ ४६ ॥ प्रांतग्रामं गतः श्रुत्वा । रूद्धान् दीर्घजटैः पथः ॥ उत्पथेन चलन्नाप । क्ष्मापपुत्रो म-
हाटवीं ॥ ४७ ॥ तृषयाकुलितस्तत्र । प्राहिणोन्मित्रमंत्रसे ॥ वटछाये स्वयं लीनो । मीनो
वारीव स स्थितः ॥ ४८ ॥ सरसः सरसं वारि । मंत्रीसुर्यावदानयत् ॥ तावद्दीर्घजटै रुद्धः ।
स मेघोऽवग्रहैरिव ॥ ४९ ॥ तत्संकेतात्तृषार्त्तोऽपि । रंहसा खंजयन् मृगान् ॥ नानारण्यान्य-
तिक्रामन् । कुमारः प्रपलायत ॥५०॥ कुक्कुरेष्विव सिंहस्य । शक्तिरेषु न जाति मे ॥ इत्यसौ
नित्यशौर्योऽपि । नाजूदीर्घजटानजि ॥ ५१ ॥ द्व्यहं भ्रांत्वा तृतीयेऽह्नि । तापसं तापसंकुलः ॥
पुरः सर इवालोक्य । सद्वृत्तं मुमुदेतरां ॥ ५२ ॥ पूर्वं मृदुगिरा पश्चा —त्पयसा परितोषितः
॥ मात्रेव बालस्तेनासौ । स्वमाश्रममनीनयत् ॥ ५३ ॥ समस्तपुनश्शृंगारो । दधानः प्रकटा ज-
टाः ॥ पुरः कुलपतिस्तेन । न्यग्रोध इव वीक्षितः ॥ ५४ ॥ स्नेहेन जनकस्यासौ । ववंदे ब्रह्म-
सूनुना ॥ पुत्रप्रेम्णा तमालिंग्य । सोऽप्यानंदयदाशिषा ॥ ५५ ॥ पृष्टश्चागमने हेतुं । स्वकथां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स यथातथां ॥ जगौ प्रीणितविश्वस्य । विश्वस्य पुरतो मुनेः ॥ ५६ ॥ स्मेरास्योऽथ मुनिः प्रा-
ह । त्वं भ्रातृव्याविदन्नपि ॥ आगतोऽसि स्ववेश्मैव । ब्रह्मराजानुजोऽस्मि यत् ॥ ५७ ॥ त्वमत्र
तिष्ठ मा चिंतां । कृथाः सन्निहिते मयि ॥ ब्रह्मवृक्षा अमी ब्रह्म—सूनो सन्तु मुदे तव ॥
॥ ५८ ॥ वचसा तस्य सातस्य । हेतुना तत्र स स्थितः ॥ कुशली कुशलं प्राप । शास्त्रशस्त्र-
स्वकर्मसु ॥ ५९ ॥ अन्यदा शरदायासी—ध्वांते वारिदवैरिणि ॥ स्मेरांभोजानना यत्र । रा-
जीविन्यो विरेजिरे ॥ ६० ॥ वर्षानियंत्रितैः पुष्प—फललाभाय तापसैः ॥ यद्भिः स ययौ राज
—कुमारः काननं तदा ॥ ६१ ॥ भ्रमन् वने गजेंद्रस्य । पश्यन्नव्यां पदावलीं ॥ तापसैर्वा-
रितोऽप्येष । केसरीवान्वधावत ॥ ६२ ॥ स पंचयोजनीं गत्वा । कुंजरं नरकुंजरः ॥ मल्लो म-
ल्लमिवाह्वास्त । योध्धुमुत्कलिकाकुलः ॥ ६३ ॥ अवलिष्ट बलिष्टं तं—प्रतिमत्तो मतंगजः ॥
तावन्योन्यमयुध्ध्येतां । दुर्धरौ विजयाशया ॥ ६४ ॥ तावज्जगर्ज पर्जन्यः । कुमारस्येव सेव-
कः ॥ पलायत च तद्धारा—नाराचैराकुलः करी ॥ ६५ ॥ व्यावृत्तो ब्रह्मभूः पश्य—न्नन्नितों-
बुमयीं महीं ॥ प्राप्तो नवमिवारण्यं । जगादे मार्गतश्च्युतः ॥ ६६ ॥ उत्तीर्य क्रमवर्धिष्णु—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीचिनिचयभीषणां ॥ दुर्दशामिव देहस्थां । पुरः कांचन निम्नगां ॥ ६७ ॥ शैषे सर इत्रापश्च
। व्योमेवातारकं दिवा ॥ ददर्शामानुषं तीरे । तस्या नगरमेककं ॥ ६८ ॥ युग्मं ॥ प्रविष्टस्त-
दसौ जात—कौतुकोऽपश्यदग्रतः ॥ नारीवृत्तवदत्यंत—गहनां वंशजालिकां ॥ ६९ ॥ वंशजा-
लीविगलितौ । स्फुरत्खड्गे निरीक्ष्य सः ॥ कृपाणमकृषत्कोषा—त्पद्मकोशादिवालिनं ॥ ७० ॥
सोऽवाहयदसिं वंश—स्तंबे स्तंबेरमाकृतिः ॥ छिन्नं वंशैः सह शिरो—ऽपश्यत्कंप्राधरं पुरः ॥७१॥
वल्गुलीकरणात्कोऽपि । धूमपानरतो नरः ॥ हतो हंत मया मंतु—रिति स स्वमगर्हति ॥
॥ ७२ ॥ यद्वा मम यमस्येव । का कृपेति विचिंतयन् ॥ इतस्ततो भ्रमन्नेष । नंदनोद्यानमै-
क्षत ॥ ७३ ॥ तदंतर्द्युपतिज्योति—रसहिष्णु मणिमयं ॥ वीक्ष्य सप्तक्षणं मंक्षु । सौधमध्या-
रुरोह सः ॥ ७४ ॥ तस्योपरितले कन्यां । कांचित्कांचनसच्छविं ॥ रतिरंभारमारूपो—स्थानप-
लीमिवैक्षत ॥ ७५ ॥ स्वःस्त्री वैहासिकी ह्यसि । का त्वं चिंतातुरेव किं ॥ इति वीरावतंसेन
। तेनोक्ता निजगाद सा ॥ ७६ ॥ रूपश्रीकोश कोऽसि त्वं । किमिहागमनं च ते ॥ त्वयोदिते
स्ववृत्तांते । वक्ष्याम्यनुनिजां कथां ॥ ७७ ॥ बाले पंचालभूपाल—कुलांकुरमवेहि मां ॥ इहा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गमं भ्रमन्नाना—देशदर्शनकौतुकी ॥ ७७ ॥ इति प्रोक्ते कुमारेण । जगौ सा स्मेरलोचना ॥
कटाक्षमिश्रैर्हर्षाश्रै—रर्घ्यं दुर्वाम्बू तन्वती ॥ ७९ ॥ अहो भाग्यमहो भाग्यं । प्राणेश यदद्य-
श्यथाः ॥ पुण्यानि तानि पुष्टानि । भूयासुर्दर्शितोऽसि यैः ॥ ८० ॥ को वक्तीदं पुरं शून्यं । यत्र
त्वं नाथ वीक्ष्यसे ॥ शून्यां मन्ये महीमन्यां । स्वामिन् या मुमुचे त्वया ॥ ८१ ॥ जानेऽहं
ब्रह्मदत्तोऽसि । कुमार त्वं कलानिधिः ॥ विद्धि मां पुष्पचूलस्य । राज्ञः पुष्पवतीं सुतां ॥ ८२ ॥
पिता मां तुभ्यमेवादा—दहं त्वत्संगमोत्सुका ॥ नाट्योन्मत्ताख्यखेटेन । खेलंती निष्कुटेऽहृ-
षि ॥ ८३ ॥ प्रासादमत्र निर्माय । मायाशक्त्यात्र नूतनं ॥ मां मुमोच पुनर्नायं । मद्दृशं सो-
ढुमीश्वरः ॥ ८४ ॥ विद्यां साध्धुमसौ धूम—पानाढ्यंशालिकां ययौ ॥ विद्या सेत्स्यति तस्या-
द्य । तद्भक्त्योद्धृत्यते स मां ॥ ८५ ॥ निर्विघ्नं स मया जघ्ने । कुमार इति जल्पति ॥ कुमार-
भंगे वल्लीव । भृशोद्भ्रासा बभूव सा ॥ ८६ ॥ गांधर्वविधिना भावि—स्त्रीरत्नं परिणीय तां
॥ रममाणो निशां निन्ये । सकलां स कलामिव ॥ ८७ ॥ अश्रूणोन्मश्रूणं प्रात-रसौ व्योमा-
ध्वनि ध्वनिं ॥ क एष ध्वनिरेवं च । तेन पृष्टाभ्यधत्त सा ॥ ८८ ॥ नाथ खंडा विशाखा च ।

For Private and Personal Use Only

उप० भगिन्यौ तस्य पाप्मनः ॥ धृतस्वबंधुवीवाहो—पस्करे आगते इमे ॥ ७९ ॥ तत्त्वं तिष्ठ क्षणं
दूरे । यावद्वृत्ते तवोदिते ॥ त्वयि रक्तं विरक्तं वा । कलयामि तयोर्मनः ॥ ८० ॥ रक्ते चे-
चिंता० त्वयि ते रक्तं । चालयिष्यामि तद्ध्वजं ॥ तदागच्छेर्विरक्ते चे—त्ततः श्वेतं तदा व्रजेः ॥ ८१ ॥
३५१ युग्म्यां बंधुजिरेकस्य । खगाभ्यां भूमिगामिनः ॥ प्रभो प्रभवतोऽप्याभ्यां । सह युक्तो न ते
रणः ॥ ८२ ॥ अथ दूरे निलीयास्था—त्कुमारो ध्वजदत्तदृक् ॥ स्वयशः श्वेतमद्राक्षी—न्नृ-
त्यंतं च क्षणाद्ध्वजं ॥ ८३ ॥ विग्रहो मे सह स्त्रीभ्यां । त्रपादायीति चिंतया ॥ बहुकुर्वन्
प्रियोक्तिं तां । प्रतस्थे निर्भयोऽपि सः ॥ ८४ ॥ क्रामंश्चिरमरण्यानीः । स मानी सायमैक्षत
॥ कुहुभ्रष्टैः करैरिंदो—रिव नीरैर्भृतं सरः ॥ ८५ ॥ ततः स्नानपयःपान—मथितोरुपथश्रमः
॥ उत्तीर्णः सरसो बाला—मालुलोक स कांचन ॥ ८६ ॥ पुष्पेषु तृणपूर्त्यर्थ—मिव पुष्पाणि
चिन्वती ॥ धीरस्यापि कुमारस्य । गतिविघ्नी बभूव सा ॥ ८७ ॥ आकर्षंती मनस्तस्य । कटा-
क्षैरंकुशैरिव ॥ मान्यतः प्रावृतस्कंधं । स्वभावोऽयं हि योषितः ॥ ८८ ॥ सोऽपि तां लोपित-
स्वास्थ्यां । पश्यन् वलितया दृशा ॥ नाभापि को ह्यविज्ञात—तद्भावां विशतिवाहिनीं ॥ ८९ ॥

स्वदासी शिक्षयित्वाथ । प्रजिध्ये कन्यया तया ॥ मद्दो मदनवत्तिष्ठे—न्मदनाग्रेः पुरः कि-
यत् ॥ २०० ॥ दत्ते प्राभृतदंभात्ते । स्वात्मानं सास्मदीश्वरा ॥ इत्युक्त्वा दासिका तस्य । फ
लपुष्पाद्यढौकयत् ॥ १ ॥ एहि देहजितानंग—रूपेदं पुरतः पुरं ॥ जल्पंत्येवेति तं निन्ये ।
पुरांतर्मंत्रिसद्म सा ॥ २ ॥ प्रियप्राप्तिप्रमोदिन्या । नंदिन्या भूपतेरयं ॥ प्रहितोऽस्ति त्वदावा-
से । वासनीयः सुखं निशि ॥ ३ ॥ प्रातर्विहितशृंगार—श्वानेयो भूभुजः सभां ॥ इत्युक्त्वा
नागदत्तस्य । मंत्रिणः स न्यवर्तत ॥ ४ ॥ युग्मं ॥ तदा तदाकृतिज्ञात—गुणग्रामेण मंत्रिणा
॥ सेव्यमानः सुखं तत्र । सुष्वाप स्वौकसीव सः ॥ ५ ॥ प्रातःकालेन पूर्वाद्रि—चूलां निन्ये
दिवाकरः ॥ मंत्रिणा स च भूपाल—पर्षदं विश्वहर्षदः ॥ ६ ॥ अभ्युत्थाय तमर्घाद्यै—रन-
र्घ्यगुणवैभवं ॥ पर्यणाययदुर्वीशः । पुत्र्या श्रीकांतया सह ॥ ७ ॥ तदंगदीर्घिकारंगैः । सर्वाप-
त्तापमल्पयन् ॥ रहः कदापि स प्राक्षी—मप्राक्षीत्तां कुमारराट् ॥ ८ ॥ अज्ञातकुलशीलाय ।
विदेशादागताय मे ॥ प्रिये प्राणप्रियापि त्वं । पित्रा कथमदीयथाः ॥ ९ ॥ सा जगौ राजगौ-
रव्य—गुणस्वामिन्निशम्यतां ॥ राजा शबरसेनोऽभू—द्वसंतपुरपत्तने ॥ १० ॥ तत्पुत्रोऽसौ पिता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० मे हि । दायादैः समुदायिभिः ॥ राज्यान्निर्वासितो भोगी । कीटिकाभिर्बिलादिव ॥ ११ ॥
ततः पल्ल्यामिहायातो । ग्रामघातादिकर्मभिः ॥ स्वभृत्यानेव पुष्णाति । क्षीरनीरैस्तरूनिव
चिंता० ॥ १२ ॥ ऊर्ध्वं चतुर्णां पुत्राणा— मस्याहं दुहिताभवं ॥ संहितानामुपायानां । विभूतिरिव
३५३ भूभुजः ॥ १३ ॥ मामसौ धामसौहित्य—स्येत्युचे मुक्तशैशवां ॥ मम सर्वे द्विषो भूपा—
स्तत्त्वं स्वैरं वरं वृणु ॥ १४ ॥ तदादि सरसस्तीरं । हंसीवाहमसेविषि ॥ गतागतकृतो मार्गे ।
पथिकांश्च निरैक्षिषि ॥ १५ ॥ मन्मनोऽक्षिर्मरुतरु— ष्विव पांथेषु निःस्पृहः ॥ नेत्रास्यांह्रिभि-
रंभोज—वनेऽलं त्वय्यरज्यत ॥ १६ ॥ मयि योग्यानुरागायां । पिताप्राक्षीन्न ते कुलं ॥ को-
कीमयूर्योः सूर्याब्द—प्रीतौ कस्तत्कुलेक्षकः ॥ १७ ॥ अन्यदा श्वसुरे धाट्ये । चलिते स स-
हाचलत् ॥ ग्रामे च लुंट्यमानेऽगा—त्कुमारः केलये सरः ॥ १८ ॥ विधायाराम विश्राम—म-
विश्रामलवारिणि ॥ विशन् सरसि सोऽद्राक्षी—न्मित्रं वरधनुं पुरः ॥ १९ ॥ सोऽनभ्रादभ्रवृ-
ष्ट्याभं । तं वीक्ष्य मुमुदेतरां ॥ सोऽप्यागत्य कुमारस्य । न्यपतत्पदपद्मयोः ॥ २० ॥ स रोदन्
कंठमालंब्य । कुमारमपि रोदयन् ॥ तेनैवाश्वासितश्चाभू—त्कथंचिद्वचनक्षमः ॥ २१ ॥ मित्र

For Private and Personal Use Only

दीर्घजटव्याघ्रे । रुद्धोऽपि मृगवत्तदा ॥ कथं मुक्तोऽसि । तेनेति पृष्टो वरधनुर्जगौ ॥ २२ ॥ शृणु वीर तदा नीरं । धृत्वा नीरजिनीपुटैः ॥ अपीतजल एवाहं । बद्धे पल्वलात्ततः ॥ २३ ॥ दृष्टोऽहं दीर्घपुरुषैः । परुषं ताम्रितैश्च तैः ॥ क स रे ब्रह्मदत्तोऽस्ती—ति पृष्टो मौनमाश्रयं ॥ ॥ २४ ॥ पुनस्तैस्ताड्यमानस्त्वां । व्याघ्राघातं न्यवेदयं ॥ तत्स्थानं दर्शयेत्स्येभिः । पुरश्चक्रे बलादपि ॥ २५ ॥ संकेतं दृष्टिमार्गे ते । कृत्वाहं न्यपतं भुवि ॥ हे भूस्त्वं नौ तदारकः । किं नाद्येतीव भाषितुं ॥ २६ ॥ परिव्राकृद्दत्तगुलिकां । क्षिप्त्वास्ये तत्प्रभावतः ॥ निःसंज्ञोऽहं मृतधिया । तैरौझिषि वनांतरे ॥ २७ ॥ गतेषु तेषु गुटिका—माकृष्य मुखकोटरात् । नष्टं रत्नमिव दृष्टुं । भवंतमहमभ्रमं ॥ २८ ॥ गतश्च कंचन ग्रामं । तत्राद्राक्षं तपोनिधिं ॥ वसुभागं परिव्राज—माजन्म सुहृदं पितुः ॥ २९ ॥ स मया समयागत्य । प्रणतः प्रीतिभाजनं ॥ कुमार कुशलोदंत—मप्राक्षीत्तातवत्तव ॥ ३० ॥ मयाप्युक्त्वा भवद्वृत्तं । पृष्टो निजपितुः कथां ॥ शोकेनापूरित इव । निःश्वस्येति जगाद सः ॥३१॥ तदा जतुगृहे दग्धे । दग्धमेकं वपुः प्रगे ॥ दीर्घो निरीक्ष्य दुःखाग्नि—दग्धं मेने स्वमेव सः ॥ ३२ ॥ गतरंगः सुरंगाग्रे । वीक्ष्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तार्क्ष्यपदावलीं ॥ धनोर्धिया गतावेता-विति तस्मै चुकोप सः ॥ ३३ ॥ स त्वां शोधयितुं
योधा—नादिदेश समंततः ॥ तावद्भनुः पलायिष्ट । त्रस्तः सिंहादिव द्विपः ॥ ३४ ॥ निशीव
मालतीमाला । मणीवावकरोत्करे ॥ सरुषा तेन तद्भार्या—ऽक्षेपि चांडालपाटके ॥ ३५ ॥
इति जल्पत एवास्य । दुःखाच्चेतनयागतां ॥ तामन्येद्युमित्रागत—न्मूर्छाजाजो ममापि सा
॥ ३६ ॥ क्षणेन शैत्यनिलयै—रनिलैरासचेतनः ॥ करोमि सांप्रतं मातु—श्चितामेवमाचिंतयं
॥ ३७ ॥ ततः कापालिकीभूया—गमं कांपिल्यपत्तनं ॥ विट्शूकर इवाभ्राम्यं । परितोंति ज-
पाटके ॥ ३८ ॥ इह भ्राम्यसि भिक्षो कि-मिति पृष्टोऽहमंत्यजैः ॥ कल्पोऽयं मम मातंगी—
विद्याया इत्यभाषिषि ॥ ३९ ॥ जनन्या रक्षकं मित्री-कृत्य तेन व्यजिज्ञपम् ॥ मातर्नमति
कौडिन्यो । वयस्यस्तनयस्य ते ॥ ४० ॥ मातुर्मातंगगेहेषु । भ्रमन्नमनपूर्वकं ॥ अन्यदा गुटि-
कागर्भं । बीजपूरकमार्पयं ॥ ४१ ॥ तदा स्वादात्परिभ्रष्ट-संज्ञा जाता मृतेव सा ॥ तां ता-
दृशीं तलारक्षो—ऽज्ञापयद्दीर्घभूभुजः ॥ ४२ ॥ दीर्घादवाप्य तादृग्हा—देहं श्वपचपाटकं ॥
आजगाम तलारक्ष—स्तदाहमगमं तदा ॥ ४३ ॥ तां दिधक्षुं तलारक्ष-माचख्यौ शठधीरहं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अस्या दाहः क्षणेऽमुष्मि—न्ननर्थाय महीभुजः ॥ ४४ ॥ तत् श्रुत्वा स न्यवर्तिष्ट । विश्व-
स्तो मयि लिंगिनि ॥ यदाहुः सर्वदंभेषु । व्रतदंभं सुदुस्तरं ॥ ४५ ॥ प्राक्प्रीत्या पुरुषः प्रोचे
। जनन्यारक्षको मया ॥ शवेनानेन साध्नोमि । विद्यां यद्यनुमन्यसे ॥ ४६ ॥ ओमित्युक्तवता
तेन । सममादाय मातरं ॥ सौरभेयीमिवाकर्ष । वह्निश्चांडालपाटकात् ॥ ४७ ॥ गत्वा पितृ-
गृहं साय—मकार्षं मंगलादिकं ॥ प्रत्येति न विना दंभं । लोकः प्रायो बहिर्मुखः ॥ ४८ ॥
पूर्देवीभ्यो बलं दातुं । तन्मित्रं प्रैषमातुरः ॥ मातुरास्येऽपरां क्षिप्त्वा । गुटिकां तामचेतयं ॥
॥ ४९ ॥ अनिर्वच्य स्वमावेद्य । निवार्य रुदतीं च तां ॥ स्कंधमारोप्य वेगेन । कद्ग्राममगामहं
॥ ५० ॥ मुक्त्वा तातसुहृद्देव—शर्मविप्रस्य तां गृहे ॥ पुनस्त्वां द्रष्टुमभ्राम्यं । क नु मित्रं
विना धृतिः ॥ ५१ ॥ नगाद्रिनगरग्राम—समग्राममप्यहर्निशं ॥ वीक्ष्यमाणः क्रमादद्य । माग्य-
भाग्यैरिहागमं ॥ ५२ ॥ अथ तस्मै कुमारोऽपि । निजं वृत्तमवोचत ॥ तयोर्वार्तयतोरेवं । पु-
रुषः कश्चिदाययौ ॥ ५३ ॥ आहुर्ग्रामेऽत्र दीर्घस्य । जटाश्चित्रपटान्विताः ॥ लोका ईदृग्नरद्वंद्वं
। कापि दृष्टं तदुच्यतां ॥ ५४ ॥ तत् श्रुत्वा तादृशौ वीक्ष्य । युवामहमिहागमं ॥ कुर्वीया-

For Private and Personal Use Only

थामथ स्वेष्ट—मित्युदित्वा जगाम सः ॥ ५५ ॥ युग्मं ॥ तान् जेष्यामीति जल्पंतं । कुमारं मंत्रिभूर्जगौ ॥ सिंहस्येव श्वजिः स्वामि—न्नेभिः कस्तव विक्रमः ॥ ५६ ॥ जिंघा इजमिवोन्मत्तं । समये दीर्घमेव तं ॥ इति तस्य गिराचाली—त्कुमारस्तादृशां क जीः ॥ ५७ ॥ गहनेनाध्वना यांतौ । गमिकाध्यायिनाविव ॥ तौ कौशांब्यां गतौ वार्ता—विनोदाविदितश्रमौ ॥ ५८ ॥ वने सागरदत्तस्य । श्रेष्टिनो बुद्धिलस्य च ॥ अपश्यतां रणं रोष—ताम्रयोस्ताम्रचूडयोः ॥ ५९ ॥ तौ स्वस्वस्वामिना लक्ष—पणबंधेन योधितौ ॥ चंचुघातैर्नखव्रातै—र्युयुधाते मिथश्चिरं ॥ ६० ॥ तरुणं क्षीणतारुण्यो । विक्रांतं हीनविक्रमः ॥ कुक्कुटं सागरेऽन्यस्या—जयद्बुद्धिलकुक्कुटः ॥ ६१ ॥ सागरं मंत्रिभूः प्रोचे । त्वत्पक्षी पक्षिणामुना ॥ किं फणी गोनसेनेव । जिग्ये जात्योऽप्यजातिना ॥ ६२ ॥ सागरानुज्ञया तस्य । पश्यन् पादौ कुपक्षिणः ॥ कीना शमासुरीश्लक्ष्णा । अयःशुचीरबोधि सः ॥ ६३ ॥ तद् ज्ञात्वा दुर्यशोभीरु—स्तस्मै बन्नममन्यत ॥ लक्षार्धं बुद्धिलः सोऽपि । कुमारं तदजिज्ञपत् ॥ ६४ ॥ शूचीः शल्यमिवाकृष्य । पदयोः पक्षिणः क्षणात् ॥ लघुहस्तः कुमारस्तौ । पुनर्योद्धुमढौकयत् ॥ ६५ ॥ हेलया हील-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यामास । विपक्षो जात्यपक्षिणा ॥ न क्षुल्लकोद्योतवत्तस्य—जयः कचन शाश्वतः ॥ ६६ ॥
स्वागारं सागरो निन्ये । रथमारोप्य तावथ ॥ अजीष्टभोगसंयोगा—स्तत्र तौ तस्थतुः सुखं
॥ ६७ ॥ इतश्चात्र पुरे श्रेष्ठी । धनप्रवर इत्यनूत् ॥ ऊर्ध्वं तस्याष्टपुत्राणां । जज्ञे रत्नवती सु-
ता ॥ ६८ ॥ सा खर्वितशचीरूप-गर्वा निर्वाणशैशवा ॥ आरराध वने यक्षं । प्राप्तुकामा वरं
वरं ॥ ६९ ॥ आख्यद्यक्षः प्रसन्नस्तां । पुत्री दैवादिहेति यः ॥ श्रीवत्सांकः सुहृद्युक्त—स्त्व-
द्भ्रातुः कुक्कुटाहवे ॥ ७० ॥ स नावी सार्वनौमस्ते । जविष्यत्यचिरात्प्रियः ॥ श्रुत्वेति मुदिता
यक्षं । सा विशिष्य न्यषेवत ॥ ७१ ॥ बंधुकुक्कुटयुद्धे तं । तदा वीक्ष्य हृदीश्वरं ॥ विरहा
नलदग्धांगी । कापि प्राप न सा धृतिं ॥७२॥ मयि कामामयार्त्तांया—मयं मुक्तामयः किमु ॥
इति कंठाध्धृतोत्कंठा । सा हारमुदतारयत् ॥ ७३ ॥ आर्यपुत्रस्य मित्राय । देह्येतमिति वादि-
नी ॥ सह लेखेन तं हारं । सा तापस्याः करे ददौ ॥ ७४ ॥ तदार्थं बुद्धिलः प्रैषी—त्तदा नृ-
त्येन मंत्रिणे ॥ तौ यांतौ स्वामिकार्येण । संयुज्येतेस्म वर्त्मनि ॥ ७५ ॥ बुद्धिलानुचरं वी-
क्ष्य । स्वतः सत्वरगत्वरं ॥ हस्ते तस्यार्पयत्प्रीत्या । हारं लेखं च तापसी ॥ ७६ ॥ तत्सर्वं

For Private and Personal Use Only

मंत्रीपुत्राय । दत्वा बुद्धिलसेवकः ॥ प्रेक्षमाणे क्ष्मानाथ—पुत्रे व्यावर्तत क्षणात् ॥ ७७ ॥ हारः क एष मत्स्वामि—नामांको लेख एष कः ॥ इति ध्यातं वरधनुं । सैवोपेयाय तापसी ॥ ७८ ॥ दत्वाशिषं तयो रत्न—वत्या वृत्तं निवेद्य च ॥ अवाप्तप्रतिलेखा सा । मंत्रिपुत्रान्न्य-वर्तत ॥ ७९ ॥ तल्लेखवीक्षणोद्भूत—हल्लेखः क्ष्मापभूरपि ॥ तं तापमाप यत्राप—श्चंदनान्य-प्युदासते ॥ ८० ॥ तौ शोधयति कौशांबी—पतौ दीर्घनिदेशतः ॥ अगोपायन्निजे धाम्नि । सागरः सारत्नांकवत् ॥ ८१ ॥ पुरीं परिजिहीर्षू तौ । सायायत्वान्निशामुखे ॥ मार्गं संप्रेषया-मास । कियंतमपि सागरः ॥ ८२ ॥ सागरे वलिते थांतौ । तौ वनांतरपश्यतां ॥ तारामिव दिवः भ्रस्तां । कांचिद् द्युतिमतीं कनीं ॥ ८३ ॥ स्वःस्त्रीजिरिव युक्तेषु । शस्त्राकीर्णे रथे स्थि-ता ॥ लग्ना किमीयती वेला । युवयोरिति सावदत् ॥ ८४ ॥ आवां कौ सुभ्रु वेत्सीति । कु-मारेणोदिता जगौ ॥ दोषापि दंतद्युतिभि—र्दर्शयंतीव सादिनं ॥ ८५ ॥ त्वद्विरहसंतप्तां । यक्षस्तुष्टोऽन्यधत्त मां ॥ भवस्तव वनछाया—मद्य संगंस्यते निशि ॥ ८६ ॥ स एव ब्रह्मदत्तो-ऽसि । विद्धि रत्नवतीं च मां ॥ एह्येहि रथमारोह । मारो हंति त्वया विना ॥ ८७ ॥ कुमारे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽथ रथारूढे । क गम्यमिति जल्पति ॥ धनावहपितृव्योक्ता । सावग् राजगृहे पुरे ॥ ७७ ॥
वाहौ स वाहयामास । मगधानज्ञि निर्जयः ॥ तस्याः निःसीमसौंदर्यं । धैर्यं च हृदि जाव-
यन् ॥ ७ए ॥ तिष्ठंति वज्रपातेऽपि । तृणस्पर्शेऽपि बिन्यति ॥ साहसं साध्वसं चापि । स्त्रीणां
किंचिदलौकिकं ॥ ए० ॥ कालस्य सोदरीं शैल—दंतुरां श्वापदातुरां ॥ जगाहे कांचिदटवीं ।
पुरः क्ष्मापतिनंदनः ॥ ए१ ॥ सुकंटकः कंटकश्च । तत्र चौरचमूपती ॥ अरुन्धां तद्रथं मार्ग—
द्रुमाविव सुसंहतौ ॥ ए२ ॥ वर्षत्सु विशिखासारै—स्तद्वीरेषु घनेष्विव ॥ उदस्थायिकुमारेंद्रो
। धनुषा तरसमातये ॥ ए३ ॥ शरसंघर्षजाताग्नि—सिद्धेन वनदेवताः ॥ प्रीणिताश्चौरबलिना
। बलिना ब्रह्मसूनुना ॥ ए४ ॥ जघ्नयोश्चौरसेनान्यो-रथासौ मित्रसारथेः ॥ रथस्यांके रणश्रांतः
। शिष्ये सा रत्नवत्यपि ॥ ए५ ॥ निश्चिंते ब्रह्मतनये । शयाने सुखनिद्रया ॥ प्राप्य प्रातर्नदीं
रथ्यौ । तुरगौ तस्थतुः स्वयं ॥ ए६ ॥ वेगाधिक्येन निद्रालुः । सहसा स्खलिते रथे ॥ गत-
निद्रः कुमारेंद्रो । न रथे मित्रमैक्षत ॥ ए७ ॥ गतः स्यादंजसे कापी—त्याह्वत्तारस्वरेण तं ॥
अनासप्रतिवाग्रक्त-क्लिन्नां धूर्वीमलोकत ॥ ए८ ॥ तत्क्षणं मूर्छितो लब्ध—संज्ञश्च व्यलपत्तरां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ सखे रुषेव मां सुप्तं । विहाय क्व गतो भवान् ॥ ९९ ॥ हुं ज्ञातं मित्र नष्टोऽसि । उक्त्वा
तास्ताः सहापदं ॥ दूरीभूतोऽसि तेन त्वं । मत्तोऽद्यापि ध्रुवापदः ॥ ३०० ॥ विरहो दुःसह-
स्तेऽभू—न्मनागपि मया पुरा ॥ विमना किमनापृच्छ्य । दूरं गच्छसि सांप्रतं ॥ १ ॥ नाद्यापि
पैतृकी राज्य—लक्ष्मीरासादितास्ति सा ॥ मुंचन्मामेवमस्थाने । मित्र न त्रपसे कथं ॥ २ ॥
मित्रोदयेऽप्यमित्रोऽहं । तमसा पूरितोऽस्मि ही ॥ यः सुभिक्षे बुभुक्षार्त्तः । स जीवति किय-
च्चिरं ॥ ३ ॥ स प्रेयस्या सुबुध्ध्येव । क्रंदन्नेवमबोध्यत ॥ धीर मा धीरतां मुंच । शांतं शांतम-
मंगलं ॥ ४ ॥ क्वचित्तवैव कार्येण । मंत्री संभाव्यते गतः ॥ न हि तस्यापदः शंक्याः । सो-
ऽपि मित्रं तवैव यत् ॥ ५ ॥ नात्र स्थातुं चिरं युक्त—मरण्यरुदितेन किं ॥ स्थानप्राप्त्या पु-
नर्विष्वक् । क्रियते तद्गवेषणं ॥ ६ ॥ ततो मगधदेशस्य सीमग्रामं जगाम सः ॥ सदाकृति-
रिति ग्रामे—शेन निन्ये स्ववेश्म सः ॥ ७ ॥ किं शोकार्त्त इवासीति । पृष्टस्तेन जगाद सः ॥
सखा मे चौरसंग्रामे । ग्रामेश क्वाप्यगादिति ॥ ८ ॥ सोऽपि प्रत्ययितैः पुंभिः । शोधयित्वा-
खिलाटवीं ॥ लब्धमेकं कुमाराय । रुधिराङ्कं शरं ददौ ॥ ९ ॥ स बाणालोकनिर्णीत—मित्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृत्युः क्षुधातुरः ॥ जाग्रदाग्रहतो ग्रामे—शस्य तत्र निशि स्थितः ॥ १० ॥ तृतीययामे ग्रा-
मेऽत्र । प्राप्तांश्चौरान् स भूयसः ॥ लीलया दलयामास । घरट्टश्चणकानिव ॥ ११ ॥ कथंचि-
दनुगच्छंतं । निर्वर्त्य ग्रामनायकं ॥ सोऽगात्पुरं राजगृहं । द्विपो राजगृहं यथा ॥ १२ ॥ वि-
श्रामार्हं बहिरसौ । प्रविष्टस्तापसाश्रमं ॥ मुमोच न्यासवत्तत्र । दयितामुपतापसं ॥ १३ ॥ पुरं
च प्रविशन् वर्य—वेश्मवातायनस्थिते ॥ अपश्यत्कन्यके मूर्ते । स्वर्नृलोकश्रियाविव ॥ १४ ॥
ते तमित्यूचतुर्मुक्त्वा । यज्जनं प्रेमभाजनं ॥ अगास्तदा सदाचार—सार तत्किं तवोचितं ॥
॥ १५ ॥ सोऽन्यधात्को जनः प्रेम—पात्रं तं च कदात्यजं ॥ के युवां कः पुनर्गृहं । ततस्ते प्र-
त्यवोचतां ॥ १६ ॥ अत्रागच्छ यथा वच्मः । सोऽथ तद्गेहमाविशत् ॥ प्रीणितः स्नानपानाद्यै
—स्ताभ्यामेवमभाषत ॥ १७ ॥ अस्ति वैताढ्यनामाद्रि—र्नवकूटोऽपि सच्छ्रियः ॥ न च दुर्व-
र्णतामेति । श्वेतधातुमयोऽपि यः ॥ १८ ॥ तत्रास्ते दक्षिणश्रेण्यां । नगरं शिवमंदिरं ॥ तत्रा-
भूज्ज्वलनशिखो । राजा विद्याधरेश्वरः ॥ १९ ॥ प्रिया विद्युच्छिखा तस्य । विद्युद्धारिमुचो यथा
॥ नाट्योन्मत्तस्तयोः पुत्रः । प्रकृत्या स्त्रीषु लोलुपः ॥ २० ॥ आवां स्वसा विशाखा च । तस्य

For Private and Personal Use Only

प्राणप्रिये सुते ॥ कदापि सह तातेन । जग्मिवाष्टापदाचलं ॥ २१ ॥ तत्र नत्वा जिनश्रेणीं । रक्ताशोकतरोस्तले ॥ चारणर्षीं समं ताते—नावंदिष्वहि सादरं ॥ २२ ॥ शुश्रुवुः श्रमणा-ज्ज्येष्टा—न्निर्मदधर्मदेशनां ॥ तातोऽपृछत्ततो ज्ञानी । कोऽनयोः कन्ययोर्वरः ॥ २३ ॥ नाथ्यो-न्मत्तवधं कर्ता । यः स जर्त्तानयोरिति ॥ श्रुत्वा मुनिवचस्तात—श्चावामाधिमधिष्महि ॥ ॥ २४ ॥ आवाभ्यामथ विज्ञप्तं । तात किं खिद्यते वृथा ॥ स्ववंधुवधमूलेन । विवाहेनावयो-रलं ॥ २५ ॥ ततः सन्निहितीभूय । सदा जोगगतस्पृहे ॥ भ्रातुर्देहमरक्षावा—क्षिगोलमिव पक्ष्मणी ॥ २६ ॥ सोऽन्यदा पुष्पचूलस्या—हरत्पुत्रीं स्मरातुरः ॥ ततः परं स्वयं वेत्सि । वच्चः किं भ्रातृदुर्नयं ॥ २७ ॥ श्रुत्वा पुष्पवतीवक्त्रा—द्भ्रातुर्घातं तवागमं ॥ तापशैत्ये शरद्रात्री । इव जेजिव तत्क्षणं ॥ २८ ॥ ततो वीक्ष्यावयो रागं । रजसा पुष्पवत्यपि ॥ जवत्पलायने हेतुं । केतुं श्वेतमचालयत् ॥ २९ ॥ आवां च त्वामनु भ्राम—कास्मानमिव शूचिके ॥ मंजुलोहे चिरं भ्रांते । पुनर्न क्वचिदाप्नुवः ॥ ३० ॥ विनोपक्रममद्य त्वं । दृष्टस्तनौ समुद्रह ॥ कुमारै-र्मारयन् मारः । कुमार किमुपेक्षसे ॥ ३१ ॥ गांधर्वेण विवाहेन । कुमारः स्वीचकार ते ॥ रय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्धितरंगाढ्ये । गंगासिंधू इवोदधिः ॥ ३२ ॥ स्थित्वा तत्र निशां प्रैषी—त्पुष्पवत्यंतिकं स ते
॥ क्षणात्ते च तदोकश्च । तिरोऽभूत्सर्वमभ्रवत् ॥ ३३ ॥ अथाश्रमं गतोऽपश्य—न्नासौ रत्नवतीं
प्रियां ॥ कन्या काप्यत्र दृष्टेति । नरं पप्रच्छ कंचन ॥ ३४ ॥ सोऽवदन्नाथ नाथेति । क्रंदंतीं
ह्यस्तने दिने ॥ अनायि नायिका कापि । तत्पितृव्यालयं मया ॥ ३५ ॥ समं तेन कुमारोऽपि
। धनावहगृहं ययौ ॥ सोऽप्युत्सवैर्नवै रत्न—वतीं तेन व्यवाहयत् ॥ ३६ ॥ संसारे सारता-
बुद्धिं । दधानः प्रियया तया ॥ सोऽन्यदा कर्तुमारेभे । स्वमित्रस्यौर्ध्वदेहिकं ॥ ३७ ॥ उ-
पोषित इव स्वैरं । भुंजाने विप्रमंडले ॥ विप्रवेशो वरधनु—र्द्वारमेत्याब्रवीदिति ॥ ३८ ॥
जानेऽहं क्रियते भोज्य—मेतद्वरधनोः कृते ॥ विप्रौघैर्भोजितेऽप्येत—त्पुनस्तं नोपतिष्ठते ॥
॥ ३९ ॥ भुंक्ते वरधनुः साक्षा—च्चेन्मां भोजयथाधुना ॥ आस्तां देहेनात्मनापि । मम तस्य च
नांतरं ॥४०॥ तं श्रुत्वा श्रुतिपीयूषं । व्याहारं द्वारमागतः ॥ वपुर्वयोवचोभिस्तं । लक्षयामास
भूपभूः ॥ ४१ ॥ द्वैतं भेत्तुमिवालिंग्य । गाढं नीत्वांतरालयं ॥ ब्रह्मदत्तेन पृष्टोऽसौ । निजं वृ-
त्तमवोचत ॥ ४२ ॥ नाथ त्वयि तदा सुप्ते । रुद्धोऽहं क्रूरतस्करैः ॥ बाणेनाहत्य केनापि । द-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्युना पातितो रथात् ॥ ४३ ॥ रुधिराघ्राणमत्ताश्वे । रथे सत्वरचारिणि ॥ मयि लीने द्रुमां-
तश्च । निराशास्तस्करा ययुः ॥ ४४ ॥ अतीत्योत्पथचारेणा—रण्यानीं ग्रामग्रामतः ॥ प्रवृत्तिं
प्राप्य ते ग्रामा—धिपादिह समागमं ॥ ४५ ॥ कुमारोऽथाज्यधान्मित्र । वदास्मान्निरपौरुषैः
॥ एवं रंकैरिव स्थेयं । शत्रुत्रस्तैः कियच्चिरं ॥ ४६ ॥ अत्रांतरेऽस्मिन्नगरे—ऽकस्मात्कोलाह-
लाकुले ॥ दत्तकर्णः कुमारेंद्रः । शुश्रावेति जनध्वनिं ॥ ४७ ॥ स्तृणींस्तृणीयन् कदली—दली-
यन्नसिपंजरं ॥ मुस्तास्तंबमिवोन्मूल्या—लानं धावत्यसौ द्विपः ॥ ४८ ॥ बालेयं तृणपूलीव
। क्लीवद्दग्जग्रसेऽमुना ॥ कोऽप्यस्यारक्षको नास्ति । ही निर्वीरा वसुंधरा ॥ ४९ ॥ तत् श्रुत्वा
सत्वरं सत्व—रंगतो नागमभ्यगात् ॥ आह्वास्त च कुमारस्तं । योध्धुमुद्धृतदोर्युगः ॥ ५० ॥
जिहेषि किं न कन्यायां । पाप व्यपारयन् करं ॥ चेत्सामज समर्थोऽसि । तदेहि पुरुषोऽ-
स्म्यहं ॥ ५१ ॥ हतो वैदेशिको हंते—त्याक्रंदमुखरे जने ॥ त्यक्त्वा बालामधाविष्ट । द्वि-
पस्तंप्रति निःकृपः ॥ ५२ ॥ सदभ्यस्तः पटुस्थामा । वामावर्त्तं परिभ्रमन् ॥ भ्रमयित्वा चि-
रं मेद—स्विनं सोऽखेदयद् द्विपं ॥ ५३ ॥ आरुह्य दत्तदंतांह्रि—र्दंतिनं केसरीव सः ॥ उरु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संदंशकाक्रांत—कंठं कुंभमदं व्यधात् ॥ ५४ ॥ वशीकृत्यांकुशेनाथ । नरनाथगृहं गतः ॥ सो-
ऽवभाद् द्विपमालाने । स्तंभे बालमिवोद्धतं ॥ ५५ ॥ तत्रैत्य कौतुकी भूप—स्तं वीक्ष्यावग्म-
हाजनं ॥ सिंहः पौरो रविप्रेक्ष्यो । विधुर्नीरंकुरेष कः ॥ ५६ ॥ मुखं चंद्रसखं कीर्ति—स्तंभ-
सान्ययुजौ भुजौ ॥ उरः सरित्तटव्यूढं । तेजस्त्वस्य गतोपमं ॥५७॥ उक्ते धनावहेनाथ । तच्च-
रित्रे यथातथे ॥ ददौ तस्मै नृपः कन्या । भूयसीः पारितोषिकैः ॥ ५८ ॥ तटिनीभिरिवां-
भोधि—र्लताभिरिव भूरुहः ॥ ताराभिरिव तारेश—स्ताभिर्भ्राजे स भूपभूः ॥ ५९ ॥ प्रीतैः
पदे पदे पौरै—र्गीयमानगुणोत्करं ॥ भ्रमयत्यंचलं काचि-ज्जरत्यूचे तमन्यदा ॥ ६० ॥ पत्तने
वित्तनेतास्मि—न्नस्ति पुण्यजनप्रियः ॥ श्रेष्ठी वैश्रमणो नाम । चित्रं नाप्तः कुबेरतां ॥ ६१ ॥
तत्पुत्री श्रीमती नाग—कराद्या मोचिता त्वया ॥ तदाद्यीव्रति पुन्नाग । सा तवैव करग्रहं ॥
॥ ६२ ॥ ततस्तामुपयेमेऽसौ । श्रेष्ठिना विहितोत्सवः ॥ सुबुद्धेर्मंत्रिणः पुत्रीं । नंदां वरधनुः
पुनः ॥ ६३ ॥ तौ क्रमाद्विक्रमाधिक्या—त्ख्यातिं क्षितितले गतौ ॥ अभियावभियोगाद्वयौ
। काशीं पुरमुपेयतुः ॥ ६४ ॥ काशीशः कटको ब्रह्म—पुत्राय परमोत्सवैः ॥ कन्यां कटकव-

For Private and Personal Use Only

उप० चिंता० ३६९

त्याख्यां । कार्यसिद्धिमिव त्वदात् ॥ ६५ ॥ स मैत्रीं मित्रपुत्रत्वा—त्प्रमना न मनागपि ॥
तुष्टयंश्चतुरायास्मै । चतुरंगां चमूं ददौ ॥ ६६ ॥ पुष्पचूलः कणेरुश्च । धनुर्मंत्रीश्वरश्च सः ॥
ब्रह्मदत्तं तदा नेजुः । काले दीपमिव युतः ॥ ६७ ॥ चलाचलचमूचाल—चालिताचलचूलकः
॥ चचाल प्रतिपंचालं । चौलनेयोऽचलद्रुचः ॥ ६८ ॥ अथ दूतमुखेनैवं । दीर्घः कटकमन्य-
धात् ॥ अस्मासु बालमित्रेषु । कोऽयं ते युद्धकृज्वरः ॥ ६९ ॥ दूतेनैवाचदत्सोऽपि । मित्राय
मित्रनंदनं ॥ स्वस्थाने स्थापयंतः कि—मुपलभ्यामहे त्वया ॥ ७० ॥ सख्यं ब्रह्मक्षितीशेन
। यादृशं त्वमपालयः ॥ न्यायस्यैकसमानत्वा—त्तादृग्वयमपि त्वया ॥ ७१ ॥ बालस्त्रीघातमि-
त्रान्य—धनस्त्रीद्रोहलक्षणं ॥ पंचालमिव पंचाल—मद्य मित्र विमोच्यसे ॥ ७२ ॥ अथ जालै-
रिवानीकै—र्ब्रह्मभूर्धीवरोऽरुणत् ॥ सदीर्घमपि कांपिल्यं । सग्राहमिव पल्वलं ॥ ७३ ॥ स्वांग-
रक्षाक्षमे सार—मंत्रे सन्निहिते सुते ॥ बलात्क् चुलनी नीता । शाकिनीवात्यजत्पुरं ॥७४॥
सूर्यांशुजिरिव क्रांत—स्तत्सैन्यैर्दीर्घभूपतिः ॥ निर्यियासुः पुरात्कोल—कुणस्तल्पादिवाजवत्
॥ ७५ ॥ यो यो दीर्घजटो मीन । इवाब्धेर्निर्ययौ पुरात् ॥ स स ब्रह्मजुवो योधै—र्बकोटैरिव

जभ्रसे ॥ ७६ ॥ उदस्तो भूपतिर्दीर्घो । दीर्घपृष्ठ इवोत्फणः ॥ निर्ययौ स्फारफूत्कारो । बिला-द्दिव पुरादथ ॥ ७७ ॥ रथान् भंजन् भटान् निघ्नं—स्तुदस्यन् गजवाजिनः ॥ क्षणं ब्रह्म-भुवः सैन्ये । दीर्घोऽभूत्प्रलयानिलः ॥ ७८ ॥ रुषं रोमांचदंभेन । वहन्नंकुरितामिव ॥ ब्रह्मदत्तो दुढौकेऽथ । योध्धुं तेन सह स्वयं ॥ ७९ ॥ वर्षन् सांद्रशरासारै—स्तन्वन् रुधिरवाहिनीं ॥ स महामेघवद्दीर्घ—भटानां दुस्सहोऽजनि ॥ ८० ॥ कुर्वंतो दिवि देवाना—मद्भुतं विजयै-षिणौ ॥ युयुधाते मिथस्तौ द्वौ । शस्त्राशस्त्रि भुजाभुजि ॥ ८१ ॥ अथोदयाय चक्रार्को । ब्र-ह्महस्तनभस्तले ॥ चित्रं यत्तेन दीर्घस्य । दीर्घनिद्रोदपाद्यत ॥ ८२ ॥ उत्पन्नो द्वादशः सोऽयं । चक्रवर्तीति वादिनः ॥ तदानीं ववृषुः पुष्पै—र्नम्राब्दा इव नाकिनः ॥ ८३ ॥ पौरा मुमुदिरे दीर्घ-क्षये ब्रह्मांगजोदये ॥ शांते दवे प्रफुल्ले चा-राले को वा न मोदते ॥ ८४ ॥ जित्वा व-र्षशतेनाथ । षट्खंडामपि मेदिनीं ॥ क्रियमाणोत्सवैः पौरै—र्ब्रह्मदत्तोऽविशत्पुरे ॥ ८५ ॥ वर्षै र्द्वा-दशभिर्दत्ता—भिषेको देवमानवैः ॥ स सहस्रैश्चतुःषष्ट्या । विललास मृगीदृशां ॥ ८६ ॥ फ-लं निदानवृक्षस्य । पुष्पवत्यस्य वल्लभा ॥ बभार सर्वशुद्धांतः—पुरंध्रीषु धुरीणतां ॥ ८७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

मधूत्सवेऽन्यदा दास्या । दत्तं कुसुमकंदुकं ॥ निरीक्ष्येद्दक्रमडाक्षं । कापीत्यूहां बभूव सः ॥
॥ ८८ ॥ जातिस्मरः स्मरन् पंच । पूर्वजन्मानि भूपतिः ॥ दृष्टपूर्वीदृशं देव—भवे स ध्यात-
वानिति ॥ ८९ ॥ तं पूर्वभवसोदर्यं । स सस्मार यथा यथा ॥ तथा तथा मनस्तस्या—भव-
त्संगमोत्सुकं ॥ ९० ॥ अथोपलब्धये तस्य । श्लोकार्धमिति सोऽपठत् ॥ आस्व दासौ मृगौ
हंसौ । मातंगावमरौ तथा ॥ ९१ ॥ राज्यार्धं लभते योऽमुं । श्लोकार्धं पूरयेदिति ॥ राज्ञोक्ते
सा समस्याभू—त्प्रियातोऽपि प्रिया नृणां ॥ ९२ ॥ रूपध्येव समस्याभूत् । परं तस्या अपूर-
णात् ॥ पौराश्चतुष्पदा जाता—स्तेषां मौर्ख्यं हि लक्षणं ॥ ९३ ॥ इतश्च स हि चित्रात्मा ।
संजातो धनिनः कुले ॥ श्रीषु स्त्रीषु च वैराग्यं । जातजातिस्मृतिर्ययौ ॥ ९४ ॥ पित्रोरनुज्ञ-
या प्राप्य । चारित्रं चारुधीरसौ ॥ भूतले विहरन्नाप । कांपिल्योद्यानमन्यदा ॥ ९५ ॥ तं
श्लोकार्धमुच्चरंतं । विद्यामिव पुनः पुनः ॥ तत्रारघट्टिकं कंचि—देकचित्तं ददर्श सः ॥ ९६ ॥
एषा नौ षष्ठिका जाति—रन्योन्याभ्यां वियुक्तयोः ॥ इति तं पूरयामास । श्लोकं जातिस्म-
रो मुनिः ॥ ९७ ॥ संपूर्णं ग्राहितः श्लोकं । मुनींद्रेणारघट्टिकः ॥ कूपं मुक्त्वा ययौ भूपं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साम्राज्यार्धजिघृक्षया ॥ ९८ ॥ यावन्मध्येस नं श्लोकं । सोऽपाठीदशठाशयः ॥ तावत्प्रमोदा-
कुलितः । क्ष्मापतिः प्राप मूर्छनां ॥ ९९ ॥ हन्यमानोऽथ सामंतैः । सोऽरटन्मां विमुंचत ॥
ममोच्चाटनमंत्रोऽयं । प्रदत्तः खलु साधुना ॥ ४०० ॥ स्वस्थीभूतोऽथ भूपालो । दत्वास्मै पा-
रितोषिकं ॥ तेनैव दर्शिताध्वागा—दुद्यानं सपरिच्छदः ॥ १ ॥ चिरात्स बांधवालोक—हर्ष-
रूढमना नृपः ॥ मुनिमानम्य शुश्राव । धर्मतत्वकिरं गिरं ॥ २ ॥ प्रतापाग्निज्वलद्द्वेषि—
शलभा सुलभाः श्रियः ॥ एक एवांगिनां धर्मः । शर्महेतुः सुदुर्लभः ॥३॥ मानुषं प्राप्य दुः-
प्रापं । ये धर्मे स्युः प्रमद्वराः ॥ प्रांते शोचंति ते प्राप्त-च्युतसिद्धरसा इव ॥ ४ ॥ मनुष्यद्रोः
फलं फल्गु । विषयाः संयमः पुनः ॥ पेशलं फलमित्याहु—स्तद्ज्ञास्तत्त्वं गृहाण भोः ॥ ५ ॥
अथोचे भूपतिर्भ्रातः । सौख्येद्धैः क्रियते तपः । प्राप्तसौख्यास्तु तत्कुर्युः । किमुल्लाघा इवौषधं
॥ ६ ॥ बंधुराः सिंधुराः श्यामा । रामा अनिधनं धनं ॥ देवाः सेवाकृतस्तत्किं । यल्लाभाय
भजे तपः ॥ ७ ॥ असंदिग्धसुखं राज्यं । ससंदेहसुखं व्रतं ॥ बलाबलविधिज्ञोऽसि । ग्राह्यं
त्याज्यं च किं बुधैः ॥ ८ ॥ तत्पंचजन्मसोदर्य । व्रतं त्यज पुरं व्रज ॥ प्राज्यं राज्यं विभज्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप० वां । भुंजीवहि यथा सुखं ॥ ९ ॥ मुनिः स्माह महाभाग । भोगाः किं मम नाभवन् ॥ मो-
क्षांतरायभूतत्वा—त्तानत्याक्षमहं पुनः ॥ १० ॥ जानन्नपि तपो जाति—स्मृत्या कल्पद्रुमा-
चिंता० यितं ॥ करीरेष्विव भूतघ्नो । भोगेषु किमु मुह्यसि ॥ ११ ॥ प्राग्जन्मपुण्यैः प्राप्तोऽसि । ध्रुवं
 दिव्यामिमां श्रियं ॥ संप्रत्यकृतपुण्यस्तु । भ्रातः किं लप्स्यसे पुरः ॥ १२ ॥ आयुः स्वल्पं रु-
जोऽभ्यर्णा । ध्रुवनाशं च यौवनं ॥ विषयाः प्रांतविरसाः । कोऽयं मोहो वृथा तव ॥ १३ ॥
उपदेशैर्न चक्र्येति । यदा बोधिं मनागपि ॥ तदा भजन्मुनिर्मौनं । न हि ते निष्फलोक्तयः
॥ १४ ॥ विचरन् वसुधापीठे । प्रलये कर्मणां मुनिः ॥ उत्पन्नकेवलज्ञानः । प्रपेदे पदमव्ययं
॥ १५ ॥ चक्राधिपोऽतिचक्राम । कामभोगैकलालसः ॥ सप्तवर्षशतीं भृंगो—भोजलुब्धो नि-
शामिव ॥ १६ ॥ कदाचिच्चक्रिणं कोऽपि । विप्रः परिचितो जगौ ॥ यदश्नामि स्वयं देव । भो-
जनं तत्प्रदेहि मे ॥ १७ ॥ विना स्त्रीरत्नमन्नं मे । न हि कस्यापि जीर्यते ॥ जीर्येद्वानर्थकृत्त-
स्या—दिति राज्ञा न्यषेधि सः ॥ १८ ॥ धिक्त्वामशनदानेऽपि । कदर्यमिति विब्रुवन् ॥ स
विप्रः सकुटुंबोऽपि । राज्ञा स्वान्नमभोज्यत ॥ १९ ॥ तत्कुटुंबं ततो रात्रौ । सोन्मादमभवत्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

था ॥ प्रावर्तत व्यवस्थाभि—त्पशुधर्मो यथा मिथः ॥ २० ॥ कुटुंबे कैरव इव । प्रातर्विद्रा-
यतां गते ॥ विडंबितोऽमुना सोऽह—मित्यकुप्यन्नृपे द्विजः ॥ २१ ॥ तद्द्रोहचिंतासायेपः ।
सोऽपश्यन्नगराद्बहिः ॥ जावालं तरु पत्राणि । काणयंतं दृषत्कणैः ॥ २२ ॥ भविष्यत्यमुना भू-
प—वैरनिर्यातनं मम ॥ ध्यात्वेति तमगौरव्यं । गौरवेण जगाद सः ॥ २३ ॥ गजारूढो धृ-
तछत्रो । राजमार्गेण याति यः ॥ त्वं तस्य गोलिके क्षिप्त्वा । चक्षुषी आकृषेः सखे ॥ २४ ॥
धनदानेन मानेन । द्विजेन परिवर्तितः ॥ ॐमिति प्रतिपेदे स । पशुपालेषु का मतिः ॥२५॥
सोऽथ कुड्यांतरे क्वापि । कुड्यमत्स्य इव स्थितः ॥ पार्श्वचारिणि चक्रेशे—ऽचिराच्चिक्षेप गो-
लिके ॥ २६ ॥ हार्दं चेदक्षि नास्त्यस्य । तदावां निःप्रयोजने ॥ इतीव गोलिकास्पर्शा—त्तस्य नेत्रे
निरीयतुः ॥ २७ ॥ मृता धृता गताः सुप्ताः । क्षीणा मत्ता इवामराः ॥ अंगस्था न ररक्षुस्तं ।
हंत कः कर्मणां प्रभुः ॥ २८ ॥ अंगरक्षैर्निरीक्ष्यासौ । पशुपालो गले धृतः ॥ ताड्यमानोऽव-
दद्विप्रं । मूलमन्याय भूरुहः ॥ २९ ॥ स्फुरत्कोपेन भूपेन । सकुटुंबोऽपि स द्विजः ॥ क्षणा-
न्निजघ्ने का वेला । भोगिनो भेकघातने ॥ ३० ॥ क्रोधदावानलस्तस्य । भूभृतः कठिनात्मनः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ सर्वान् विप्रतृणांकूरान् । मध्येपुरमशोषयत् ॥ ३१ ॥ अथादिदेश सोऽमात्यं । मात्यंतमें न
मत्सरः ॥ यावन्न मुंचसि स्थालं । द्विजनेत्रैर्भृतं पुरः ॥ ३२ ॥ रौद्राध्यवसितं नृपं । मत्वा मं-
त्री महामतिः ॥ श्लेष्मातकफलैः स्थाल—मापूर्य पुरतोऽमुचत् ॥ ३३ ॥ मृद्गस्तानि मही-
जानि —राखापीदिति पार्श्वगान् ॥ एष एव क्षणो जाति । सारः सकलजीविते ॥ ३४ ॥
स्त्रीरत्नपुष्पवत्यंग—संगमे नापि सा धृतिः ॥ द्विजाक्षगोलकस्पर्शे । याद्य मायति मे हृदि
॥ ३५ ॥ श्लेष्मातकफलान्येवं । मृद्गता द्विजदृग्धिया ॥ अतिचक्रमिरे तेन । समाः क्रूरेण
षोकश ॥ ३६ ॥ स्मृत्वापि स्वजवं मुनीश्वरमपि प्राप्याग्रजं प्राक्तनं । श्रुत्वाप्यस्य शुभा गिरो
व्रतफलं सम्यग्विदित्वापि च ॥ जातः पापकपूरहेतुविषयेष्वेवांतिमश्चक्रनृ—चेद्द गृद्धस्तदसौ
विपद्य नरकं सर्वांतिमं लब्धवान् ॥ ३७ ॥ इति ब्रह्मदत्तकथानकं समाप्तं. ॥ एवं च प्रमाद-
विवशानां निंद्यतामुपदर्श्य विवेकिभिः सम्यक्सामग्रीमवाप्य पुण्यकृत्येष्वप्रमादः कार्य इत्या-
वेदितम्. ॥ मज्जन्मध्ये स वार्धेस्तरणिमतिदृढां प्राप्य नैवाधिरूढो । निःस्वो विश्वोपकार क्ष-
ममरतरुं प्राप्य नैवाश्रितोऽसौ ॥ रोगग्रस्तः स सिद्धौषधमधिकबलं प्राप्य नात्र प्रवृत्तः । सं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सारार्त्तोऽपि लब्ध्वा नरजवमजवद्यः प्रमत्तः स्वकार्ये ॥ १ ॥ आयुःसिद्धिसमृद्धिसत्वधिषणा-सौजाग्यशोजायशो—जाग्यारोग्यकलाविलासविजुता अस्यद्जुताः सर्वतः ॥ तुष्टे यत्र जगत्-त्रयीतनुमतामाविर्जवंत्याजवं । रक्ष्यः स प्रयतैः प्रमादरिपुतः सद्धर्मचिंतामणिः ॥ २ ॥ इति श्रीमदंचलगछाधिराजश्रीमहेंद्रप्रजसूरिशिष्यश्रीजयशेखरसूरिविरचितायां स्वोपज्ञोपदेशचिं-तामणिटीकायां धर्मसामग्रीजणनाधिकारो द्वितीयः समाप्तः ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादक्षटाधरितदिव्यसुधासमूहम् ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितम् ॥२॥ युग्मं.

—— ——

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनजास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीउपदेशचिंतामणेः द्वितीयो भागः समाप्तः. ॥

For Private and Personal Use Only